Substance, country-made paper. 13 × 5½ inches. Folia, 46–151, of which foll. 90–99, 129 are missing. Lines, 10 on a page. Character, Nāgara of the 18th century. Appearance, old and discoloured. Defective at both ends and in the middle.

The work is well known. It presents the essential points in the leading works of the Upaniṣad.

71A, इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपाद-शिष्येण श्रीशङ्करानन्दभगवता विरचित उपनिषद्रत्न आत्मपुराणे कौषीतकीसारार्थप्रकाशे इन्द्रप्रतर्दनाख्यानं नाम द्वितीयोऽध्यायः ।

87A, ०र्गाग्यजातशत्रुसंवादो नाम तृतीयोऽध्यायः ।

128B, ०बृहदारण्यकमधुकाण्डसारार्थप्रकाश ऋषभ(?)संवादो नाम चतुर्थोऽध्यायः ।

8262.

2669. *Ātmapurāṇa* or *Upaniṣadratna.*
By Śaṅkarānanda.

Substance, country-made paper. 7½ × 4 inches. Folia, 661, there are three leaves after 8 which do not seem to belong to this MS. Lines, 9 on a page. Extent in ślokas, 660. Character, Nāgara of the 19th century. Appearance, discoloured.

The present MS. is in the same handwriting as the MS. No. 2658 and contains the 11th chapter of Śaṅkarānanda's *Ātmapurāṇa.*

See IO. Catal. No. 2362.

On the obverse of the last leaf :

इति आत्मपुराणगर्भोपनिषद्रत्ने एकादशोऽध्यायः । ११
उत्तरार्द्धम् ।

8263.

2650. *Ātmapurāṇa* or *Upaniṣadratna.*
By Śaṅkarānanda.

Substance, country-made paper. 8 × 4 inches. Folia, 62. Lines, 8 on a page. Extent in ślokas, 610. Character, Nāgara of the 18th century. Appearance, discoloured and worn-out. Complete.

See our No. 310.

The MS. contains the 18th chapter of *Ātmapurāṇa.* See the analysis of the work in IO. Catal. No. 2362. The 59th leaf of the MS. seems to be replaced by another leaf bearing the same page-mark.

8264.

8605. *Ātmapurāṇa* or *Upaniṣadratna.*
By Śaṅkarānanda Bhagavat, a pupil of Ānandātmā.

Substance, country-made paper. 12 × 5 inches. Folia, 227. Lines, 15 on a page. Extent in ślokas, 11,000. Character, Nāgara. Date, Saṃvat, 1835. Appearance, good. Complete.

Complete in 227 leaves and in 18 chapters. Printed. (See L. 182).

1st chapter :—ऐतरेयसारार्थप्रकाश.

8265.

8389. **अष्टोत्तरसहस्रमहावाक्यावली**

Aṣṭottarasahasramahāvākyāvalī.
Compiled from 108 Upaniṣads.
By Rāmacandrendra, disciple of Vāsudevendra Sarasvatī.
With an exhaustive commentary in Tripāṭha form.

Substance, country-made paper. 15 × 7 inches. Folia, 128. Character, Nāgara. Date, Saṃvat 1927. Appearance, fresh. Complete. Written in a bold, beautiful hand.

Beginning :

ॐ श्रीमद्दिग्वाधिष्ठानपरमहंससद्गुरुश्रीरामचन्द्राय नमः ॥
यो विध्यादिविदेहान्तमहावाक्यार्थविग्रहः ।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥

यः पूज्यो यतिभिः स्वधर्मनिरतैर्ध्यायन्ति यं योगिनो
येनान्तं निगमान्तवेद्यमनिशं यस्मै हविर्दीयते ।
यस्मात् स्थावरजंगमं समभवद्यस्यांशमात्रो वरो
यस्मिन् लीनमिदं प्रणौमि सततं तं वासुदेवं गुरुम् ॥
नत्वा श्रीवासुदेवेन्द्रपादपद्मेरहृदयम् ।
ग्रथ्यते वै महावाक्यरत्नावलिरियं मया ॥

अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः । तत्रैकविंशति-शाखा ऋचः नवाधिकशतं शाखा यजुषः सहस्रशाखाः साम्नः पञ्चाशच्छाखा अथर्वणस्य । एकैकस्याः शाखायाः एकैकोपनिषत् । आहृत्य अशीतिसहितशताधिकसहस्रसंख्याका उपनिषदः । तासु श्रीरामचन्द्रेण रामदूताय सारतरोपनिषदः अष्टोत्तरशतसंख्याका उपदिष्टाः ॥

From the commentary:

तथाच मुक्तिकोपनिषत्—साष्टोत्तरशतोपनिषन्नामश्लोका लिख्यन्ते ॥

ईशकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥ १ ॥
ब्रह्मकैवल्यजाबालश्वेताश्वोहंसआरुणिः ।
गर्भो नारायणो हंसो बिन्दुनादशिरःशिखा ॥ २ ॥
मैत्रायणी कौषीतकी बृहज्जाबालतापिनी ।
कालाग्निरुद्रमैत्रेयीसुबालक्षुरिमन्त्रिका ॥ ३ ॥
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम् ।
तेजो नादो ध्यानविद्यायोगतत्त्वात्मबोधकम् ॥ ४ ॥
परिव्राट् त्रिशिखी सीता चूडानिर्वाणमण्डलम् ।
दक्षिणामूरभं स्कंदं महानारायणद्वयम् ॥ ५ ॥
रहस्यं रामतपनं वासुदेवञ्च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षुं महच्छारीरकं शिखा ॥ ६ ॥
तूर्यातीतं च संन्यासं परिव्राजाच्छमालिका ।
अव्यक्तैकाक्षरं पूर्णासूर्याध्यात्मकुण्डिका ॥
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् ।
त्रिपुरातपनं देवी त्रिपुरा कठभावना ॥

हृदयं पुण्डरीभस्मस्नात्तगणदर्शनम् ।
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥
गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम् ।
शाट्यायनि-हयग्रीवं दत्तात्रेयं च गारुडम् ॥
कलिजाबालिसौभाग्यरहस्यञ्च मुक्तिके ॥
इति ईशाद्यष्टोत्तरशतोपनिषदां शाखाभेदं दर्शयति । etc.

etc.

The commentary begins :

ॐ श्रीगणेशाय नमः ।
महावाक्यरत्नावलीपदयोजना । प्रार्थना—
अनन्तशक्तिमन्दोहपूर्णस्य परमात्मनः ।
विघ्नविध्वंसिनीं शक्तिं गणराजमुपास्महे ॥
हरि वों ॥
श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुश्रीरामचन्द्राय नमः ॥
ईशाद्युपनिषत्पद्मोद्यन्महावाक्यकलेवरम् ।
विकलेवरकैवल्यं रामचन्द्रपदं भजे ॥
विश्वाधिष्ठानसन्मात्रवासुदेवेन्द्रमूर्त्तये ।
श्रीदेशिकस्वरूपाय परस्मै ब्रह्मणे नमः ॥

From the commentary :

4B. तत्र दशोपनिषदः ऋग्वेदगताः शुक्लकृष्णभेदेन यजुषः एकपञ्चाशत् तत्र शुक्लयजुषः एकोनविंशतिः कृष्णयजुषो द्वात्रिंशत् सामः षोडश आथर्वणास्यैकत्रिंशत् आहृत्याष्टोत्तरशतं ईशाद्यष्टोत्तरशतोपनिषदां पूर्वाचार्यप्रकाशितत्वं दर्शयति । तत्र गौडपादाचार्यैः प्रकाशितत्वं दर्शयति माण्डुक्योपनिषद्व्याख्याता । श्रीमत्शङ्कर-भगवत्पादाचार्यैर्दशोपनिषदः पञ्चब्रह्मसंहितापिनी च शङ्करानन्दैः सदाशिवब्रह्मेन्द्रैः स्वयंप्रकाशानन्दाद्यैश्च द्वात्रिंशोपनिषदः विद्या-रण्याचार्यैरष्टोत्तरशतोपनिषदो व्याख्याताः । महावाक्यरत्नावल्या-ख्यायिकायाः त्रयोदशधा विभागं दर्शयति ॥ प्रकृते तु—

रामचन्द्रेणोपदिष्टे रामदूताय धीमते ।
ईशाद्यष्टोत्तरशतोपनिषद्यादसां पतौ ॥

निमज्ज्याच्च महावाक्यरत्नावलिरुदाहृता ।
विभाव्यते विभागेन सा त्रयोदशधा पुनः ॥
तत्रादौ विधिवाक्यानि बन्धमोक्षपराणि च ।
अविद्धद्वेयवाक्यानि जगन्मिथ्यापराणि च ॥
तथोपदेशवाक्यानि जीवेशैक्यपराणि च ।
ब्रह्मविन्मननाख्यानि जीवन्मुक्तिपराणि च ॥
ब्रह्मानुभूतिरूपाणि तत्समाधिपराणि च ।
अष्टस्वरूपवाक्यानि फलवाक्यान्यनन्तरम् ॥
विदेहमुक्तिवाक्यानि लिख्यन्तेऽन्विष्य तत्क्रमात् ॥

18A. विधिप्रकरणविवरणं सम्पूर्णं ; 21A. ॐ तत्सदिति सार्द्धान्तिकबन्धमोक्षवाक्यान्येकविंशत् ; 24A. सार्द्धान्तिकाविद्धनिन्दावाक्यान्येकविंशतिः ; 27B. जगन्मिथ्याप्रकरणविवरणं सम्पूर्णं ; 34B. पञ्चोत्तरद्विशतं उपदेशमहावाक्यप्रकरणं सम्पूर्णं ; 38B. जीवब्रह्मैक्यप्रकरणविवरणं सम्पूर्णं ; ॐ तत्सदिति सार्द्धान्तिकजीवब्रह्मैक्यवाक्यान्यष्टाविंशत् ; 42A. सार्द्धान्तिकमननवाक्यान्येकोनचत्वारिंशत् ; 59B. जीवन्मुक्तिप्रकरणविवरणं सम्पूर्णं ; 71B. श्रीसार्द्धान्तिकस्वानुभूतिवाक्यान्यष्टादशोत्तरशतं ; 77B. इति श्रीसार्द्धान्तिकसमाधिवाक्यानि पञ्चाशत् (५०५)। 81A. नानालिङ्गस्वरूपमहावाक्यविवरणं सम्पूर्णं ; इति सार्द्धान्तिकनानालिङ्गस्वरूपवाक्यानि द्वात्रिंशत् । 87B. सार्द्धान्तिकपुंलिङ्गस्वरूपवाक्यानि त्रिंशत् ; पुंलिङ्गस्वरूपविवरणं सम्पूर्णं । 89A. सार्द्धान्तिकस्त्रीलिंगस्वरूपवाक्यानि द्वादश ; स्त्रीलिंगस्वरूपमहावाक्यविवरणं सम्पूर्णं । 95B. सार्द्धान्तिकनपुंसकलिंगस्वरूपवाक्यानि एकोनचत्वारिंशत् ; नपुंसकलिङ्गप्रकरणविवरणं सम्पूर्णं । 99A. सार्द्धान्तिकात्मस्वरूपवाक्यानि चत्वारिंशत् ; 102A. सार्द्धान्तिकसर्वस्वरूपवाक्यानि चत्वारिंशत्—सर्वस्वरूपप्रकरणविवरणं सम्पूर्णं । 108A. ॐ तत्सदिति सार्द्धान्तिकब्रह्मस्वरूपवाक्यानि त्रिनवतिः ; 112A. सार्द्धान्तिकाष्टस्वरूपवाक्यानि द्वाविंशत्यधिकत्रिशतं सार्द्धान्तिकावधिशिष्टस्वरूपवाक्यानि षट्त्रिंशत् ; 126B. सार्द्धान्तिकविदेहवाक्यानि सप्तसप्ततिः ।

Last colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दलब्धस्वान्तरामचन्द्रेन्द्रग्रथितेशाद्यष्टोत्तरशतोपनिषत्सारसंग्रहभूताष्टोत्तरसहस्रमहावाक्यावली परिपूर्णा ।

Post-colophon :

ग्रन्थविंशत्यधिकसप्तशतं ॐ ॥ श्रीमद्दिग्वाधिष्ठानपरमहंस-
सद्गुरुश्रीरामचन्द्रार्पणमस्तु ॥

The text ends :

वस्तुतो निर्विशेषात्मा चिपान्नारायणोस्म्यहम् ।
यन्महावाक्यसिद्धान्तं मुक्तवित्तैकगोचरम् ॥
वासुदेवेन्द्रसंज्ञं तं नौमि सर्वात्मकं महः । इति ॥

The commentary ends :

श्रीवासुदेवेन्द्रशिष्योपनिषदब्रह्मयोगिना ।
महावाक्यरत्नजातकिरणावलिरीरिता ॥
महावाक्यरत्नजातकिरणा ग्रन्थसंचयः ।
द्विपञ्चाशत्संख्यातो द्विद्विसहस्रमुदीरितम् ॥ ॐ ॥

Post-colophon :

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । संवत् १९२७ ।

8266.

8603. *Aṣṭottarasahasramahāvākyāvalī.*
Compiled by Rāmacandrendra, the pupil of Vāsudevendra Sarasvatī, with a commentary entitled

महावाक्यरत्नजातकिरणावली

Mahāvākyaratnajātakiraṇāvalī.

Substance, country-made paper. 10½ × 5 inches. Folia, 113. Lines, 12 on a page. Extent in ślokas, 3,000. Character, Nāgara. Date, Saṃvat 1920. Appearance, new. Complete.

Text and commentary, complete in 113 leaves, dated सम्वत् 1920 कार्त्तिकमासे शुक्लपक्षे द्वादश्यां रविवासरे.

It begins with a salutation to Rāmacandra, then to Vāsudeva and Vāsudevendra in three verses :

अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः । तत्रैव विंशति-शाखा ऋचः, नवाधिकशतशाखा यजुषः, सहस्रशाखाः साम्नः, पञ्चाशच्छाखा अथर्वणस्य । एकैकस्याः शाखाया एकैकोपनिषत् । आहृत्याशीतिसहितशताधिकसहस्रसङ्ख्याका उपनिषदस्तासु

श्रीरामचन्द्रेण रामदूताय सारतरोपनिषदः अष्टोत्तरशतसङ्ख्याका उपदिष्टाः। तथाच—मुक्तिकोपनिषत्स्थाष्टोत्तरशतोपनिषन्नाम-श्लोका लिख्यन्ते।

(१) ईश (२) केन (३) कठ (४) प्रश्न-
(५) मुण्ड (६) माण्डुक्य (७) तित्तिरिः।
(८) ऐतरेयञ्च (९) छान्दोग्यं
(१०) बृहदारण्यकन्तथा॥
(११) ब्रह्म (१२) कैवल्य (१३) जाबाल-
(१४) श्वेताश्व (१५) हंस (१६) आरुणिः।
(१७) गर्भो (१८) नारायणो (१९) हंसो
(२०) बिन्दु (२१) नाद (२२) शिरः (२३) शिखा॥
(२४) मैत्रायणि (२५) कौषीतकी
(२६) बृहज्जाबाल (२७) तापनी।
(२८) कालाग्निरुद्र (२९) मैत्रेयी
(३०) सुबाल (३१) क्षुर (३२) मन्त्रिका॥
(३३) सर्वसारं (३४) निरालम्बं (३५) रहस्यं (३६) वज्रसूचिकम्।
(३७) तेजो (३८) नादध्यानविद्यायोगतत्त्वात्मबोधकम्॥
परिव्राट्त्रिशिखासीताचूडाऽनिर्वाणमण्डलम्।
दक्षिणाशरभं स्कन्दं महानारायणद्वयम्॥
रहस्यं रामतपनं वासुदेवञ्च मुद्गलम्।
शाण्डिल्यं पैङ्गलं भिक्षुं महच्छारीरकं शिखा॥
तुरीयातीतसन्न्यासपरिव्राजाक्षमालिका।
अव्यक्तैकाक्षरं पूर्णं सूर्याक्ष्यध्यात्मकुण्डिका॥
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम्।
त्रिपुरातपनं देवी त्रिपुराकठभावना॥
हृदयं कुण्डलीभस्म रुद्राक्षगणदर्शनम्।
तारं सारं महावाक्यं पञ्चब्रह्माग्निहोत्रकम्॥
गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम्।
शाट्यायनिहयग्रीवं दत्तात्रेयं च गारुडम्।
कलिजाबालिसौभाग्यरहस्यरुद्राक्षमुक्तिके॥

तत्र दशोपनिषद ऋग्वेदगताः। शुक्लकृष्णभेदेन यजुषः एक-पञ्चाशत्, तत्र शुक्लयजुष एकोनविंशतिः, कृष्णयजुषो द्वात्रिंशत्, साम्नः षोडश, अथर्वणस्य एकत्रिंशत्—आहृत्याष्टोत्तरशतं। तत्र

गौडपादाचार्यैर्माण्डुक्योपनिषत् व्याख्याता। श्रीमच्छङ्करभगवत्-
पादाचार्यैर्दशोपनिषदः पञ्च रुद्रा नृसिंहतापिनी च शङ्करानन्दैः
सदाशिवब्रह्मेन्द्रैः स्वयम्प्रकाशानन्दाद्यैश्च दाक्षिणात्योपनिषदः विद्या-
रण्याचार्यैरष्टोत्तरशतोपनिषदो व्याख्याताः।

रामचन्द्रेणोपदिष्टे रामदूताय धीमते।
ईशाद्यष्टोत्तरशतोपनिषद् यादसां पतौ॥
निमज्ज्याच्च महावाक्यरत्नावलिरुदाहृता।
विभाव्यते विभागेन सा त्रयोदशधा पुनः॥
तत्रादौ विधिवाक्यानि बन्धमोक्षपराणि च।
अविद्यज्ञेयवाक्यानि जगन्मिथ्यापराणि च॥
तथोपदेशवाक्यानि जीवेशैक्यपराणि च।
ब्रह्मविन्मननाख्यानि जीवन्मुक्तिपराणि च॥
ब्रह्मानुभूतिरूपाणि तत्समाधिपराणि च।
अस्तस्वरूपवाक्यानि फलवाक्यान्यनन्तरम्॥
विदेहमुक्तिवाक्यानि लिख्यन्तेऽन्विष्य तत्क्रमात्॥

The end:

विध्यङ्घ्रिबन्धमुद्गुल्फो ह्यविद्यज्ञेयजङ्घकः।
जगन्मिथ्याजानुदेशस्त्वपदेशोरुदेशकः॥
ब्रह्मात्मैक्यकटिदेशो विद्वन्मननाभिकः।
जीवन्मुक्ताख्यदहरः स्वानुभूतिकरद्वयः॥
ससमाधिस्कन्धदेशः सस्वरूपाख्यकन्धरः।
फलभूतमहावाक्यफलो वैदेहमस्तकः॥
एवंविध्यादिदेहान्तमहावाक्यकलेवरः।
वस्तुतो निर्विशेषात्मा त्रिपान्नारायणः स्वयम्॥
यन्महावाक्यसिद्धान्तमुक्तचित्तैकगोचरम्।
वासुदेवेन्द्रसंज्ञं तं नौमि सर्वात्मकं महः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रसरस्वतीचरण-
कमलमकरन्दलब्धस्वान्तः रामचन्द्रेन्द्रग्रथितेषाद्यष्टोत्तरशतोपनिषत्-
सारसंग्रहभूताष्टोत्तरशतमहावाक्यावलिः परिपूर्णा ग्रन्थो विंशत्य-
धिकसप्तशतम्।

The extent of the commentary is द्विपञ्चाशत्सङ्ख्यतोऽधिद्विसहस्र-मुदीरितम् ।

See IO. Catal. No. 3183, L. 3135 (*Kiraṇāvalī*), 3136.

8267.

3182. अष्टोत्तरसहस्रमहावाक्यरत्नावली (अष्टोत्तरशतोपनिषत्सारसंग्रहभूता)

Aṣṭottarasahasramahāvākyaratnāvalī
(Aṣṭottaraśatopaniṣatsārasaṃgrahabhūtā).
By Rāmacandrendra, disciple of Vāsudevendra Sarasvatī.

Substance, country-made paper. 13 × 4¼ inches. Folia, 27. Lines, 9 on a page. Extent in ślokas, 720. Character, Bengali. Appearance, fresh. Complete.

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमदासुदेवेन्द्रसरस्वतीचरण-कमलमकरन्दलम्पटान्तरामचन्द्रेन्द्रग्रथितेऽद्य (?)ष्टोत्तरशतोपनिष-त्सारसंग्रहभूताष्टोत्तरसहस्रमहावाक्यरत्नावलिः परिपूर्णा ।
ग्रन्थविंशत्यधिकसप्तशतं समाप्तम् ।
ॐ तत्सत् ।

Beginning :

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः ।
यो विध्यादिविदेहान्तमहावाक्यार्थसंग्रहः ।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥
यः पूज्यो यतिभिः स्वधर्मनिरतैर्ध्यायन्ति यं योगिनो
येनैतन्निगमान्तवेद्यमनिशं यस्मै हविर्दीयते ।
यस्मात् स्थावरजङ्गमं संभवद्यस्यां समाजोवरो(?)
यस्मिन् लीनमिदं प्रणौमि सततं तं वासुदेवं गुरुम् ॥
नत्वा श्रीवासुदेवेन्द्रपादपङ्केरुहद्वयम् ।
ग्रथ्यते वै महावाक्यरत्नावलिरियं मया ॥
1B, तथाच मुक्तिकोपनिषदस्याष्टोत्तरशतोपनिषन्नामश्लोका लिख्यन्ते .....
.....

2A, आह्त्याष्टोत्तरशतम्। तत्र गौडपादाचार्यैर्माण्डुक्योपनिषद्व्याख्याता। श्रीमत्शङ्करभगवत्पादाचार्यैर्दशोपनिषदः पञ्चरत्नानृसिंहतापनी च शङ्करानन्दैः सदाशिवब्रह्मेन्द्रैः स्वयम्प्रकाशानन्दाद्यैश्च द्वाविंशदुपनिषदः विद्यारण्याचार्यैरष्टोत्तरशतोपनिषदो व्याख्याताः। प्रकृते तु—

रामचन्द्रेणोपदिष्टे रामादूताय धीमते।
ईशाद्यष्टोत्तरशतोपनिषत् यादसां पतौ॥
निमज्ज्याच्च महावाक्यरत्नावलिरुदाहृता।
विभाव्यते विभागेन सा त्रयोदशधा पुनः॥
तत्रादौ विधिवाक्यानि बन्धमोक्षपराणि च।
अविद्वज्ज्ञेयवाक्यानि जगन्मिथ्यापराणि च॥ इत्यादि, इत्यादि।

8268.

10572. उपनिषत्सार *Upaniṣatsāra.*

With a commentary.

Substance, country-made paper. 10¾×5 inches. Folia, 25. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Complete.

This appears to be a poetic version of Śaṅkarācārya's *Dvādaśamahāvākyāvalī*, embodying the contents of the leading Upaniṣads.

Beginning:

(Comm.) यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया।
भाति नो भाति यत् ज्ञानात्तदस्मिन् ब्रह्मचित्(त्)सुखम्॥
तदेवं सर्वोपनिषदर्थसारसंग्रहं(ग्रहं)गद्यबंधप्रबंधेन संक्षेपतो युक्त्योपदिश्य पुनरप्युक्तमेवार्थजातं पद्यबंधप्रबंधेन सोपस्करं विस्तरेणोपदेष्टुकामो भगवान् भाष्यकारः पद्यग्रंथारंभे ग्रंथप्रतिपाद्यपरदेवतानमस्कारूपं मंगलं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति—चैतन्यमिति।

(Text) ॐ नमः शिवाय—
चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम्।
यत् सर्वविषयातीतं तस्मै सर्वविदे नमः॥ १॥
समाप्य क्रियाः सर्वा दारात्माधानपूर्विकाः।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे॥ २॥

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ।
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रिया ॥ ३ ॥
धर्माधर्मौ ततोऽङ्गसत् देहयोगस्तथा पुनः ।
एवं नित्यप्रवृत्तोयं संसारश्चक्रवद्भ्रमम् ॥ ४ ॥

It ends:

कोष्ठादिव विनिष्कृष्टः कार्यकारणवर्जितः ।
यथापिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः ॥

Colophon:

उपनिषत्सारः समाप्तः ।

8269.

11125. **अवधूतानुभूति** *Avadhūtānubhūti.*

By Aṣṭāvakra.

Substance, country-made paper. 10×4 inches. Folia, 20, of which foll. 3 and 4 are missing. Lines, 9 on a page. Character, modern Nāgara. Appearance, fresh. With two stray leaves.

The first and the last colophons:

2B, इति श्रीअष्टावक्रविरचितमात्मानुभवोपदेशप्रकरणम् ।
इति श्रीमदष्टावक्रसंख्याक्रमादिकव्याख्यान समाप्त एकविंसम-
प्रकरण २० शुभमस्तु ॥

8270.

9786. **अष्टावक्रगीता** *Aṣṭāvakragītā.*

With a commentary by Viśveśvara.

Substance, country-made paper. 10½ × 5½ inches. Folia, 35. Lines, ? on a page. Extent in ślokas, 1,400. Character, Nāgara. Appearance, old. Prose and verse. Generally correct. Complete.

It goes also under the name of *Avadhūtānubhava*.
See H. P., 1, 13.

The commentary begins thus:

श्रीगणेशाय नमः ।
श्रीमन्नृसिंहविभवे गरुडध्वजाय
पापत्रयोपशमनाय भवौषधाय ।
क्षुण्णाहिदृश्चिकजलाग्निभुजङ्गरोग-
क्षोभ्यव्ययाय हरये गुरवे नमस्ते ॥

सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रसूक्तस्य दीपिका तन्यते परा ॥ २ ॥

इह खलु ज्ञानविज्ञानसम्पन्नः परमकारुणिकोऽष्टावक्रमुनिः मुक्तिकामनया समुपेतं कञ्चित् शिष्यं शमदमाद्यधिकारस्वीकारोपदेशपूर्वकं आत्मतत्त्वमुपदिशति—मुक्तिमिच्छसीति ।

It ends:

अवधूतेति—अवधूतानुभूतिरूपो ग्रन्थस्तस्य संख्याक्रमा ईदृशाः श्लोका अमी कथिता इत्यर्थः ।

The last colophon runs:

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां संख्याक्रमव्याख्यानम् । समाप्तेयं टीका ।

8271.

529. **जीवन्मुक्ति** *Jīvanmukti.*

Attributed to Aṣṭāvakra.

For the manuscript see L. 1292.

8272.

4643. **अष्टावक्रसंहिता** *Aṣṭāvakrasaṃhitā.*

Substance, country-made paper. 14×5 inches. Folia, 9–20. Lines, 9 on a page. Character, Bengali. Date, Śaka 1725. Appearance, fresh. Complete.

Post-colophon:

शुभमस्तु शकनरपतेरतीताब्दाः १७२५ ॐ नमो गुरवे ।

See our No. 674.

8273.

9204. *Aṣṭāvakrasaṃhitā.*

Substance, country-made paper. 9×5½ inches. Folia, 14. Lines, 14 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, fresh. Prose. Generally correct. Complete.

Printed.

8274.

674. अष्टावक्रसंहिता (दीपिकासहिता)

Aṣṭāvakrasaṃhitā (with Dīpikā).

The text is attributed to Aṣṭāvakra, a Ṛṣi, and the commentary is by Viśveśvara.

Substance, Tāḍīpatra. 16×2½ inches. Folia, 55. Lines, 14 on a page. Extent in ślokas: (text) 303, (comm.) 1,100. Character, Bengali. Date, Śaka 1622. Appearance, tolerable. Prose and verse. Generally correct.

Beginning of the text:

श्रीरामः ।

मुक्तिमिच्छसि चेत् तात विषयान् विषवत् त्यज ।

क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥

Beginning of the commentary:

श्रीगुरुचरणेभ्यः नमः । श्रीकृष्णः ।

सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।

नत्वाष्टावक्रसूक्तस्य दीपिका तन्यते परा ॥

इह खलु ज्ञानविज्ञानसम्पन्नः परमकारुणिकोऽष्टावक्रमुनिः मुमुक्षुमुपसम्पन्नं कञ्चिच्छिष्यं श्रमदमाद्यधिकारस्वीकारोपदेशपूर्वकमात्मतत्त्वमुपदिशति—मुक्तिमिति ।

End of the text:

विंशत्येकमितैः सप्तैः श्लोकैरत्राग्निमध्यमैः(?) ।

अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी ॥ २०२ ॥

इत्यष्टावक्रे संख्याक्रमः ।

Colophon:

इत्यष्टावक्रीयं ज्ञानशास्त्रं समाप्तम् ।

Post-colophon:

गुरुशिष्यस्वरूपेण जीवात्मपरमात्मनोः ।

यो दूरयतु पार्थक्यमष्टावक्र नमोऽस्तु ते ॥

इष्टदेवतात्मने श्रीगुरवे नमः ।

End of the commentary:

श्लोकसंख्यामुपसंहरति—अवधूतेति। अवधूतानुभूतिरूपो ग्रन्थः तस्य संख्याक्रमो विद्यते येषु ते संख्याक्रमाः ईदृशाः श्लोका अमी कथिता इत्यर्थः ॥ २०२ ॥

इत्यष्टावक्रीये संख्याक्रमः ।

Colophon of the commentary:

इति श्रीमन्मुनिवृन्दवन्द्याष्टावक्रेण परमकारुणिकतया गुरुशिष्य-
च्छले विरचिते वेदान्तशास्त्रे श्रीविश्वेश्वरविरचिता टीका समाप्ता ॥

Post-colophon:

१६२२ शकाब्दे समाप्तोऽयं ग्रन्थलेखः ।

The text is often printed.

8275.

1705. अष्टावक्रटीका *Aṣṭāvakraṭīkā.*

By Viśveśvara. With the text.

Substance, country-made paper. 11 × 4½ inches. Folia, 45. Lines, 12 on a page. Extent in ślokas, 1,600. Character, Nāgara. Date, Saṃvat 1701. Appearance, old. Complete.

The last colophon runs thus:

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां संख्यादिक-
व्याख्याक्रमादिकव्याख्यानम् । समाप्तं समासेयं टीका ।

For both the text and the commentary see IO. Catal. No. 2367 to which it wholly corresponds. The commentary is also noticed in L. 2493 and IO. Catal. No. 2365 with, however, quite a different beginning and title.

The same commentary is noticed in IO. Catal. No. 2368 where in the colophon the author's name is supposed to be given as Gopālacaitanya.

The Post-colophon Statement:

संवत् १७०१ चैत्रमासे कृष्णपक्षे तिथौ द्वितीयायां बुद्धवासरे
लिषतं सहजानन्दब्रह्मचारी स्वयं पठनार्थे शुभमस्तु ।

8276.

11241. *Aṣṭāvakraṭīkā.*

Substance, country-made paper. 12 × 6 inches. Folia, 16. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Incomplete at the end.

Beginning of the commentary :

यदज्ञानाज्जगज्जातं यद्विज्ञानाद्विलीयते ।
तं नत्वा सच्चिदानन्दं कुर्व्वेऽध्यात्मप्रदीपिकाम् ॥

First colophon :

4A, इति विश्वेश्वरविरचितायामष्टावक्रटीकायां आत्मानुभवोपदेशप्रकरणम् ।

Last colophon :

16A, इत्यष्टावक्रटीकायां विशेषोपदेशप्रकरणम् ।

The MS. ends abruptly.

8277.

9125. गौडपादकारिका *Gauḍapādakārikā.*

Substance, country-made paper. 14¼ × 6 inches. Folia, 11. Lines, 9 on a page. Extent in ślokas, 200. Character, Nāgara. Appearance, fresh. Verse. Generally correct. Incomplete.

Colophon :

3A, इति ॐकारनिर्णये प्रथमं प्रकरणं समाप्तम् ।

5A, इति श्रीवैड्थाख्यं द्वितीयं प्रकरणं समाप्तम् ।

7B, इति श्रीवार्त्तिके अद्वैताख्यं तृतीयं प्रकरणम् ।

Besides these, there are 81 ślokas of the 4th prakaraṇa.

Often printed in Calcutta, Benares, Bombay and Madras. Printed in Roman character with English translation and notes; ed. Vidhushekhara Bhattacharya, Calcutta University, 1943, under the name of *Āgamaśāstra.*

8278.

8754. *Gauḍapādakārikā.*

Substance, country-made paper. 14 × 5½ inches. Folia, 10. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, fresh. Complete.

The last colophon :

इति श्रीमाण्डुक्योपनिषदि गौडपादभगवतः कृतौ अलातशान्त्याख्यं चतुर्थप्रकरणं समाप्तम् ॥ शिवोऽहं निर्विकारोऽहं शिव ।

8279.

2260. **गौडपादकृतमाण्डुक्योपनिषत्कारिका**

Māṇḍukyopaniṣatkārikā.
By Gauḍapāda.

Substance, country-made paper. 8½ × 3¾ inches. Folia, 15. Lines, 8 on a page. Character, Nāgara of the 18th century. Appearance, discoloured. Complete in 208 verses.

Printed in Bibl. Ind., pp. 353–598.

Colophon:

अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ॥

8280.

2700. **गौडपादीयकारिका** or **आगमशास्त्र**

Gauḍapādīyakārikā or *Āgamaśāstra.*

Substance, country-made paper. 11¾ × 6 inches. Folia, 9. Lines, 13, 14 on a page. Character, Nāgara. Date, Saṃvat 1880. Appearance, old. Complete.

It has, before the kārikā begins, two verses. The first runs:

प्रज्ञानां सुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान् ।
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ॥
पीत्वा सर्व्वान् विशेषान् स्वपिति मधुरभुक् मायया भोजयन्नो ।
मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥

After the last kārikā of the 4th prakaraṇa, numbered 100, there are the three concluding stanzas of the Śaṅkara-bhāṣya, marked 101, 102, 103.

Then the misleading colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवतः कृतावात्म-शास्त्रविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ।

Post-colophon:

संवत् १८८० शाके १७४५ ज्यैष्ठकृष्णपक्षे तिथि अमावास्या-चन्द्रवारे ।

8281.

9021. गौडपादीय आगमशास्त्र

Gauḍapādīya Āgamaśāstra.

Substance, country-made paper. 11 × 4½ inches. Folia, 13. Lines, 9 on a page. Extent in ślokas, 250. Character, Nāgara. Appearance, new. Complete.

The 4th chapter of *Gauḍapādakārikā*.
The 4th prakaraṇa, complete in 13 leaves.

8282.

1595. *Māṇḍukyopaniṣatkārikā.*
With Śaṅkara's commentary.

Substance, country-made paper. 12 × 4½ inches. Folia, 2–27, the first leaf is missing. In Tripāṭha form. Character, Bengali. Appearance, tolerable. Generally correct.

The 1st chapter is not in this manuscript. Of the 2nd chapter, the first leaf is missing. The 3rd and the 4th are complete.

8283.

8614. *Māṇḍukyopaniṣatkārikā.*
With a commentary by Ānandajñāna.

Substance, country-made paper. 13½ × 7 inches. Folia, 150. Lines, 9–12 on a page. Extent in ślokas, 6,000. Date, Saṃvat 1818. Appearance, good. Complete.

Gauḍapāda, who was Paramaguru to Śaṅkarācārya, wrote kārikās to explain the doctrines of Māṇḍukyopaniṣad. Śaṅkarācārya wrote a commentary entitled आगमशास्त्रविवरण. Ānandajñāna wrote a commentary on it. There are four chapters in this work, of which the 2nd is not to be found in this MS. The 1st chapter ends in line 47. Gaudapāda's 1st chapter ends after the 29th verse:

इति माण्डुक्योपनिषद्व्याख्याने गौडपादभगवतः कृतौ ॐकार-निर्णये प्रथमं प्रकरणम् ।

Śaṅkara's commentary ends:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य-श्रीशङ्करभगवतः कृतौ आगमशास्त्रविवरणप्रथमप्रकरणं माण्डूक्य-व्याख्यानं समाप्तम् ।

Ānandagiri's commentary ends:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्य-भगवदानन्दज्ञानविरचितायां गौडपादीयभाष्यटीकायां प्रथमं प्रकरणं समाप्तम्।

The 3rd chapter is complete in 62 leaves and 48 verses.

The colophon:

इति० वार्त्ति० अद्वैताख्ये प्रकरणम्।

Śaṅkara's commentary ends:

०आगमशास्त्रविवरणे अद्वैताख्यं तृतीयं प्रकरणं समाप्तम्।

Ānandajñāna's commentary ends:

०गौडपादी ०भाष्यटीकायां तृतीयं प्रकरणं समाप्तम्॥

The 4th chapter is complete in 41 leaves and 102 verses.

Gauḍapāda's *Kārikā* ends:

श्रीमद्गौडपादाचार्यकृतमाण्डुक्यवार्त्तिकं श्रीशङ्कराचार्यैस्तत्कृतं भाष्यमध्यायचतुष्टयात्मक समाप्तम्।

Śaṅkara's commentary ends:

०आगमशास्त्रविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम्।

Ānandajñāna's commentary ends:

०गौडपादीयभाष्यटीकायां अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम्। श्रीकाश्यां सम्वत् १८१८ मिति कार्त्तिकवदि ८ वार गुरुवार रामदास लेखक ग्रन्थसंख्या 8632.

8284.

617. सटीकभाष्यसहिता गौडपादकारिका

Gauḍapādakārikā with the Bhāṣya and its commentary.

For the MS. see L. 1482.

Separate paginations. The 1st prakaraṇa has 47 leaves, the 2nd 27, the 3rd 35, the 4th 27. Altogether 136 leaves.

The post-colophon statement in the 3rd prakaraṇa:

संवत् १९१२ लिखितं चिन्तामणिमिश्र घण्टापूर्य्यां मध्ये वास-गङ्गादी सहाय।

The ṭīkā on Śaṅkara's Bhāṣya on Gauḍapāda's kārikā is by Ānandajñāna, the disciple of Śuddhānanda. The text also is there.

The text with the Bhāṣya commentary has often been printed.

8285.

1792. **आगमशास्त्रविवरण** *Āgamaśāstravivaraṇa.*

A commentary by Śaṅkarācārya on the Gauḍapādakārikās.

Substance, country-made paper. 9½ × 4 inches. Folia, 60. Lines, 11 on a page. Character, Nāgara. Date, Saṃvat 1770. Appearance, old. Complete, the last leaf is written in a bolder hand.

Printed in the Bibl. Ind. series.

8286.

1995. **आगमशास्त्रविवरण गौडपादकारिकाभाष्य**

Āgamaśāstravivaraṇa Gauḍapādakārikābhāṣya.
By Śaṅkarācārya.

Substance, country-made paper. 12½ × 5 inches. Folia, 40. Lines, 10 on a page. Character, Nāgara of the 18th century. Appearance, fresh. Incomplete.

Often printed.

8287.

10972. **गौडपादीयभाष्य** *Gauḍapādīyabhāṣya.*

Being a commentary on Gauḍapāda's
Māṇḍūkyopaniṣatkārikā.
By Śaṅkarācārya. With a commentary by Ānandajñāna.

Substance, country-made paper. 13 × 6½ inches. Folia, 67. In Tripāṭha form. Character, Nāgara of the 19th century. Appearance, fresh. Complete.

The commentary on the Bhāṣya begins:

परिपूर्णपरिज्ञानपरिदृप्तिमते सते ।
विष्णवे जिष्णवे तस्मै कृष्णनामवते नमः ॥ १ ॥
शुद्धानन्दपदाम्भोजद्वन्द्वं मद्द्वन्द्वतापहम् ।
नमस्कुर्वे पुरस्कर्तुं तत्त्वज्ञानमहोदयम् ॥

गौडपादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ।
तदर्थतोऽतिगभीरं व्याकरिष्ये स्वशक्तितः ॥

.....

श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान् माण्डूक्योपनिषदर्थाविष्करणपरानपि श्लोकानाचार्यप्रणीतान् व्याचिख्यासुर्भगवान् भाष्यकारः चिकीर्षितस्य भाष्यस्याविघ्नपरिसमाप्त्यादिसिद्धये परदेवतातत्त्वानुस्मरणपूर्वकं तन्नमस्काररूपमङ्गलाचरणं...
.....सूचयति—प्रज्ञानेत्यादिना ।

The commentary ends :

विष्णुं कृष्णं स्वमायाविरचितविविधद्वैतवर्गं निसर्गाद्
उद्भातानर्थसार्थं निरवधिमधुरं सच्चिदेकस्वभावम् ।
आज्ञायात्मानमेकं विधिमुखविमुखं नेति नेतीति गीतं
वन्दे वाचां धियां चापरमपि जगतामास्पदं कल्पितानाम् ।
गौडपादीयभाष्यस्य व्याख्या व्याख्याटसम्मता ।
संमिता निर्मिता सेयमर्पिता पुरुषोत्तमे ॥

The last colophon of the Bhāṣya :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवतः कृतौ आगमशास्त्रविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणम् ।

The last colophon of the commentary :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यश्रीभगवदानन्दज्ञानकृतायां गौडपादीयभाष्यटीकायां अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ।

8288.

9184. **अज्ञानबोधिनी** *Ajñānabodhinī.*

By Śaṅkarācārya.

Substance, country-made paper. 13 × 7½ inches. Folia, 14. Lines, 16 on a page. Extent in ślokas, 450. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

8289.

9176. *Ajñānabodhinī.*

Substance, country-made paper. 14 × 6½ inches. Folia, 8. Lines, 17 on a page. Extent in ślokas, 400. Date, Saṃvat 1121. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. complete.

This is a salient exposition of the Vedānta in form of a dialogue between Guru and Śiṣya. But R. Mitter, following Hall, calls it a commentary on the *Ātmabodha*.

Colophon:

इति संक्षिप्तवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्यकृताज्ञानबोधिनीप्रक्रिया।

शुभसम्वत्सरे ११२१॥ वर्षे महामाङ्गल्यप्रदे कार्त्तिके मासे कृष्णे पक्षे तिथौ १ भौमदिने लिखितमिदं पुस्तकं मथुरादासात्मजकैवलब्राह्मणेन॥ १॥

See L., Vol. III, No. 677, p. 96 and I.O., Part IV, No. 2296, p. 736B.

8290.

9273. *Ajñānabodhinī.*

Substance, country-made paper. 12 × 5 inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Incomplete.

See L., Vol. II, No. 678, p. 97.

8291.

9214. **अज्ञानबोधिनी** *or* **अध्यात्मविद्योपदेशविधि**

Ajñānabodhinī or *Adhyātmavidyopadeśavidhi.*

Substance, country-made paper. 11 × 5½ inches. Folia, 23. Lines, 7, 8 on a page. Extent in ślokas, 360. Date, Saṃvat 1904. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

Colophon:

इति श्रीसंक्षिप्तवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करकृतः बहिर्मुखान्तकर्णानां(?) अज्ञानानां बोधिनी अध्यात्मविद्योपदेशविधि समाप्तम्।

संवत् १९०४ भाद्रकृष्णाष्टतीयायां रवौ लिं वंसगोपालेन।

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥

पुस्तक पढ़ने वा लोके प्रणाम मेरा चरणकु हुतौ॥ ० ॥ ० ॥

8292.

2411. **अध्यात्मविद्योपदेशविधि** *Adhyātmavidyopadeśavidhi.*

By Śaṅkarācārya.

Substance, foolscap paper. 8½ × 4 inches. Folia, 18. Lines, 9 on a page. Extent in ślokas, 325. Character, Nāgara of the 19th century. Appearance, fresh. Incomplete.

See L. 678 and IO. Catal. No. 2297 for complete MSS.

8293.

8798. *Adhyātmavidyopadeśavidhi.*

Substance, country-made paper. 10 × 4½ inches. Folia, 13. Lines, 9 on a page. Extent in ślokas, 225. Character, Nāgara. Date, Saṃvat 1701. Appearance, old. Incomplete.

Fragmentary leaves 16–18 and 21–30.

The last colophon runs thus:

इति श्रीश्रीसंक्षिप्तवेदान्तशास्त्रप्रक्रिया[यां] श्रीमत्परमहंस-
परिव्राजकाचार्यश्रीमच्छङ्करकृतबहिर्मुखान्तःप्रणव(?)ज्ञानबोधिनी ॥
अध्यात्मविद्योपदेशविधिः समाप्तम् ।

नित्यबोधपरिपीडितं जगत्
विभ्रमं तुदति वाक्यदामभिः ।
वासुदेवनिहतं धनञ्जयो
हन्ति कौरवकुलं यथा पुनः ॥

शुभमस्तु । भक्तिरस्तु । लिखितं काश्यां सम्वत् १७०१ ।
वाम सत्यः ।

8294.

11112. *Adhyātmavidyopadeśavidhi.*

Substance, country-made paper. 10 × 5 inches. Folia, 18, of which the 9th is missing. Lines, 9, 10 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon:

इति संक्षिप्तवेदान्तशास्त्रप्रक्रियाश्रीमत्परमहंसपरिव्राजकाचार्य-
श्रीमच्छङ्करकृता बहिर्मुखान्तःअवण(?)ज्ञानबोधिनी अध्यात्मविद्यो-
पदेशविधिः समाप्तः ।

Post-colophon :

दिङ्निधीन्दुविगणिते संवत्सरे ।

8295.

511. **आत्मविद्योपदेशविधि** *Ātmavidyopadeśavidhi.*

By Śaṅkarācārya.

For the manuscript see L. 1310.

Post-colophon :

संवत् १८१८ सेमे नाम पुस सुदी ११ वार बुधवार ।

8296.

2650. **आत्मज्ञानोपदेशविधि** *Ātmajñānopadeśavidhi.*

By Śaṅkarācārya. With its ṭīkā, Subodhinī, by Ānandagiri.

Substance, country-made paper. 12¾ × 5½ inches. Folia, 15. In Tripāṭha form. Character, Nāgara of the 18th century. Appearance, fresh, but mouse-eaten. Complete.

For the beginning of the text see W., p. 180, No. 3, and for that of the commentary see Hultzch, Vol. II, No. 1033.

The ṭīkā was composed at Purī.

संसारगरलध्वंसी[सि]सुधाधाराभिवर्षिणी ।
आत्मज्ञानानुगा टीका टीकिता पुरुषोत्तमे ॥ १ ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमुद्रानन्दपूज्यपादशिष्यश्रीभगवदानन्दगिरिविरचितात्मज्ञानोपदेशविधिटीका सुबोधिनीनामा समाप्ता कृता ॥

8297.

133. **अपरोक्षानुभूति** *Aparokṣānubhūti.*

By Śaṅkarācārya.

The same manuscript has been noticed by Dr. Rājendralāla Mitra under No. 483 in Vol. I of his Notices.

8298.

537. *Aparokṣānubhūti.*
With its commentary Dīpikā.

For the manuscript see L. 1284.

8299.

8596. **अपरोक्षानुभव** *Aparokṣānubhava.*
By Śaṅkarācārya.

Substance, country made paper. 9½ × 4 inches. Folia, 10. Lines, 9 on a page. Extent in ślokas, 180. Character, Nāgara. Date, Saṃvat, 1851. Appearance, fresh. Complete.

Complete in ten leaves and eight prakaraṇas(?). See IO. Catal. No. 2401 ; L. 483, 1284.

सम्बत् १८५१, माघ मा।

8300.

9201. **अपरोक्षानुभूति** *Aparokṣānubhūti.*
By Śaṅkarācārya.

Substance, country-made paper. 11 × 6 inches. Folia, 6. Lines, 13 on a page. Extent in ślokas, 150. Character, Nāgara. Appearance, tolerable. Verse. Generally correct.

This is a metrical summary of the Vedānta doctrine. See. L. 483.

8301.

9795. **अपरोक्षानुभव** *Aparokṣānubhava.*
By Śaṅkarācārya.

Substance, country-made paper. 9 × 5 inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 180. Character, Nāgara. Date Saṃvat 1896. Appearance, tolerable. Verse. Generally correct. Complete.

Well known, often noticed and often printed.

8302.

9843. **अपरोक्षानुभूति** *Aparokṣānubhūti.*
By Śaṅkarācārya.

Substance, country-made paper. 8 × 4 inches. Folia, 9. Lines, 9 on a page. Extent in ślokas, 128. Character, Nāgara. Date, Saṃvat 1903. Appearance, tolerable. Verse. Generally correct. Complete.

Often noticed and often printed.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादाचार्यविरचितं अपरोक्षानुभूतिः समाप्ता ।

संवत् १९०३ मार्गशिर-कृष्णत्रयोदश्यां १३ गुरुवासरे ह(ख)ड(द)-ह्याख्यग्रामे भवानीप्रसादमिश्रलिखितमिदं समाप्तिमगमत् ।

8303.

855. अपरोक्षानुभव *Aparokṣānubhava.*

By Śaṅkarācārya.

With the commentary Pradīpikā by Cūhaḍa Varmā.

Substance, country-made paper. 11 × 5 inches. Folia, 35. Lines, 16, 17 on a page. Extent in ślokas, 1,200. Character, Nāgara. Date, Saṃvat 1769. Appearance, very old. Prose and verse. Generally correct. Complete.

The text is often noticed and printed.

The commentary begins thus:

नमः सच्चिदानन्दरूपाय परमात्मने ।
विघ्नजालविनाशाय सच्चिदानन्दरूपिणे ॥ १ ॥
ब्रह्मादिकृतसामर्थ्यां गुणात्मकमयीं शुभाम् ।
भवाप्ययकरीं वन्दे प्रतिमां परमेश्वरीम् ॥
ब्रह्मविद्योपदेशेन स्वस्वरूपप्रदायिने ।
स्वरूपानन्दगुरवे ज्ञानरूपाय वै नमः ॥
प्राचीनं मतमाश्रित्य तेषामेव प्रसादतः ।
यथामत्यनुसारेण प्रयत्नं क्रियते इह ॥
बालबोधकरीं वक्ष्ये गूढतत्त्वप्रकाशनीम् ।
अपरोक्षानुभूतीयां परमार्थप्रदीपिकाम् ॥

इह खलु श्रीमदाचार्यवर्यशङ्करभगवता पुरुषार्थकामेन मुमुक्षोरेव प्रवृत्तिं सफलीकर्तुं अनाद्यनिर्वचनीयाविद्यानिरसन-पुरःसरजीवब्रह्मैक्यानुभवं अपरोक्षीकुर्वन् आदौ मङ्गलस्याचरणं वृद्धसम्मतम् etc. etc. etc.

Colophon :

श्रीमत्स्वरूपानन्दपूज्यपादशिष्येण चूडेश्वरेण विरचिता-
परोक्षानुभवप्रदीपिका ।

Post-colophon :

संवत्सर १७६९ वर्षे महामाङ्गल्ये आश्विनशुक्लत्रयोदश्यां बुधवारा-
न्वितायां समाप्तमगमत् । शुभं भूयाल्लेखकपाठकयोः ।

8304.

10899. **अपरोक्षानुभूति** *Aparokṣānubhūti.*

By Śaṅkarācārya.

With a commentary.

Substance, country-made paper. 12×6 inches. Folia, 16. In Tripāṭha form. Character, Nāgara of the 19th century. Appearance, fresh. Complete.

The text is well known and often printed.

The commentary begins :

श्रीगणेशाय नमः ।

स्वप्रकाशात्महेतोर्यः परमात्मा चिदात्मकः ।
अपरोक्षानुभूत्याख्यः सोऽहमस्मि परं सुखम् ॥

.. ..

तदेवमनुसन्धाय निर्विघ्नं स्वेष्टदेवताम् ।
अपरोक्षानुभूत्याख्यामाचार्योक्तिं प्रकाशये ॥

.. ..

तत्राचार्याः स्वेष्टपरदेवतानुसन्धानलक्षणं मङ्गलं निर्विघ्नग्रन्थ-
समाप्तये स्वमनसि कृत्वा शिष्यशिक्षायै निबध्नन्ति । श्रीहरि-
मिति ।

The commentary ends :

नमस्तस्मै भगवते शङ्कराचार्यमूर्त्तये ।
येन वेदान्तविद्येयं उद्धृता वेदसागरात् ॥ २ ॥
यद्ययं शङ्करः साक्षाद्वेदान्ताम्भोजभास्करः ।
नोदेष्यत्तर्हि काशेत कथं व्यासादिसूचितम् ॥
अत्रेदं सम्मतं किञ्चित्तदुरोरेव मे नहि ।
असङ्गतं तु यत् किञ्चित् तन्ममैव गुरोर्नहि ॥

यत्प्रसादादहं शब्दप्रत्यालंव+नं हि यः ।
अहं स जगदालम्बकार्यकारणवर्जितः ॥
यस्य श्रीगुरुराजस्य पादाब्जे तु समर्पिता ।
दीपिका मालिका सेयं तत्कृता गुणगुम्फिता ॥
योऽहं स्वाज्ञान[मा]नाज्जगदिदमभवं स्वादिदेहान्तमादौ
स्वप्नादिव देव सो[स्वो]ऽहमधुना स्वज्ञानतः केवलम् ।
ब्रह्मैवास्म्यद्वितीयं परमसुखमयं निर्विकारं विबाधं
जाग्रत्यादिवदेव गुरुमसत् स्वप्रसादोत्थितात् ॥ (?) ॥ १ ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचिता अपरोक्षानुभूतिः समाप्ता ।

There is no colophon to the commentary.

8305.

8901. *Aparokṣānubhūti.*

With a commentary called **अपरोक्षानुभूतिदीपिका**

Substance, country-made paper. 12½ × 6 inches. Folia, 19. In Tripāṭha form. Character, Nagara. Date, Saṃvat 1908. Copied from an original, dated Saṃvat 1893. Appearance, fresh. Complete.

A treatise on the Vedānta doctrine.
The commentary is anonymous.
See L., Vol. III, No. 1284, p. 305.

Colophon :

इत्यपरोक्षानुभूतिदीपिका समाप्ता ॥

Post-colophon :

संमत ॥ १८६३ ॥ १९०८ ॥ ॥ १९०८ ॥

8306.

11234.

Two works, by Śaṅkarācārya.

I. **वज्रसूचि** *Vajrasūci.*

Substance, country-made paper. 9¾ × 5 inches. Folia, 3. Lines, 31 on a page. Character, modern Nāgara. Appearance, fresh.

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितायां वज्रसूच्यां उपनिषत्सुबोधिन्यां समाप्तम्।

II. **अपरोक्षानुभूति** *Aparokṣānubhūti.*

Substance, etc., tho same as above.

Colophon:

इति श्रीमच्छङ्कराचार्यकृतापरोक्षानुभवनामप्रकरणं समाप्तम्।

Two stray leaves of an elementary Sanskrit grammar.

8307.

3124. **आत्मबोधप्रकरण** *Ātmabodhaprakaraṇa.*

By Śaṅkarācārya.

Substance, country-made paper. 7 × 4 inches, Folia, 8. Lines, 8 on a page. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्य-श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्य. Here ends leaf 8.

This is the 6th prakaraṇa of Śaṅkarācārya. Often noticed and printed. Śaṅkarācārya has seven prakaraṇas or minor treatises on non-dualistic theory, for which see W., pp. 179 to 181.

8308.

4629. *Ātmabodhaprakaraṇa.*

Substance, country-made paper. 14 × 5 inches. Folia, 18. Lines, 9 on a page. Character, Bengali of the 19th century. Appearance, discoloured. Complete.

Last colophon:

इति श्रीमच्छङ्कराचार्यविरचितं आत्मबोधप्रकरणं समाप्तम्।

Printed rather too often.

8309.

8365. **आत्मबोध** *Ātmabodha.*

By Śaṅkarācārya.

Substance, country-made paper. 9 × 4½ inches. Folia, 10. Lines, 13 on a page. Extent in ślokas, 80. Character, Nāgara. Place of deposit, Calcutta, Government of India. Appearance, fresh. Generally correct.

Complete in ten leaves. A well-known work.

8310.

9497. *Ātmabodha.*

Substance, country-made paper. 7 × 4 inches. Folia, 8. Lines, 7 on a page. Extent in ślokas, 75. Character, Nāgara. Appearance, fresh. Generally correct. Complete.

Well known, often printed and noticed.

8311.

3937. **आत्मानात्मविवेक** *or* **आत्मबोध**

Ātmānātmaviveka or *Ātmabodha.*

By Śaṅkarācārya.

Substance, country-made paper. 13½ × 4 inches. Folia, 7. Lines, 8 on a page. Character, Bengali. Date, Śaka 1768. Appearance, fresh. Complete.

Colophon:

इति श्रीशङ्कराचार्यविरचित आत्मानात्मविवेकः समाप्तः ।

Post-colophon:

ॐतत्सत् । लिपिरियं श्रीरामतारणदेवशर्मणः । शक १७६८ । ८ ।

Often printed and noticed.

8312.

9208. *Ātmabodha.*

With the commentary by Madhusūdana Sarasvatī.

Substance, country-made paper. 11 × 5 inches. Folia, 18. Lines, 8, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable. Generally correct. Complete.

See our No. 9175.

8313.

9175. *Ātmabodha.*
With the commentary by Madhusūdana Sarasvatī.

Substance, country-made paper. 13 × 4 inches. Folia, 3. Lines, 17 on a page. Extent in ślokas, 125. Character, Nāgara. Appearance, tolerable. Generally correct. Incomplete. Neatly written.

The text is well known; the essence of Vedānta spiritualism is embodied in it. As for the commentary, no name of the author is given but it turns out to be that by Madhusūdana Sarasvatī.

See L. 1677, Vol. IV, p. 252.

8314.

9821. *Ātmabodha.*
With a commentary.

Substance, country-made paper. 10½ × 4½ inches. Folia, 26. Lines, 7 on a page. Extent in ślokas, 350. Character, Nāgara. Appearance, tolerable. Generally correct. Complete.

This codex contains Śaṅkarācārya's *Ātmabodha* with the commentary by Madhusūdana. Both the text and the commentary are well known, often noticed and printed.

8315.

9443. *Ātmabodha.*
With a commentary.

Substance, country-made paper. 10 × 4 inches. Folia, 11. Lines, 11 on a page. Extent in ślokas, 350. Character, Nāgara. Date, Saṃvat, 1918. Appearance, tolerable. Generally correct. Complete.

आत्मबोध is a versified summary of the Vedānta doctrine and repeatedly printed. The accompanying commentary is entitled **सुबोधिनी**.

The colophon of the commentary.

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादश्रीमच्छङ्करकृतौ सुबोधिनी टीका सम्पूर्णा ।

सिते मार्गे नवम्यान्च शुनौ काण्यान्च तद्दिने ।
सम्बतो विक्रमार्कस्य वसिन्दर्कसुधांशुके ॥

It begins thus:

ॐ गणेशाय नमः ॐ नमः परामात्मने श्रीगुरवे नमः ।
इह भगवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनेऽसमर्थानां मन्दबुद्धीनां अनुग्रहार्थं सर्ववेदान्त-सिद्धान्तसंग्रहं आत्मबोधाख्यं प्रकरणं निर्दिदर्शयिषुः प्रतिजानीते— तपोभिरिति ॥ इत्यादि ।

It ends thus:

नित्यसुखमोक्षानन्दप्रापकत्वादितरतीर्थेषु तद्विपरीतं द्रष्टव्यं तस्मादात्मतीर्थे स्नातस्य न किञ्चिदवशिष्यत इति भावः ॥

8316.

11126. *Ātmabodha.*

With a commentary.

Substance, country-made paper. 10×4 inches. Folia, 13. In Tripāṭha form. Character, Modern Nāgara. Appearance, fresh. Complete.

The commentary begins:

श्रीगणेशाय नमः ।

शुतमखपूजितपादं शुतमखमनसोऽप्यगोचराकारम् ।
विकसितजलरुहनेत्रमुमाच्छायाङ्कमाश्रये शम्भुम् ॥

खलु इह भगवान् शङ्कराचार्य उत्तमाधिकारिवेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्त-सिद्धान्तसंग्रहमात्मबोधाख्यं प्रकरणं निदर्शयिषुः प्रतिजानीते— तपोभिरिति ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादश्रीम-च्छङ्कराचार्यविरचित-आत्मबोधप्रकाशटिप्पनिका परिपूर्णा ॥

8317.

10872 B.

Beginning of a commentary on Ātmabodha.
By Śaṅkarācārya.

Substance, country-made paper. 9 × 3½ inches. Folia, 2. Lines, 6 on a page. Character, modern Nāgara. Appearance, fresh.

Beginning:

ॐ श्रीगणेशाय नमः ।

श्रुतमखपूजितपादं श्रुतमखमनसोऽप्यगोचराकारम् ।
विकसितजलरुहनेत्रं उमाच्छायाङ्कमाश्रये शम्भुम् ॥

इह भगवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनेऽसमर्थानां मन्दबुद्धीनां अनुग्रहार्थं सर्ववेदान्त-सिद्धान्तसंग्रहं आत्मबोधाख्यं प्रकरणं निर्दिदर्शयिषुः प्रतिजानीते— तपोभिरिति । etc. etc.

8318.

626. **उपदेशसहस्री** *Upadeśasahasrī.*
By Śaṅkarācārya.
With the Padayojanikā Commentary by Rāmatīrtha.

Part I: Gadyabandha, complete in three chapters.
For the manuscript see L. 1474. See no. 10572 उपनिषत्सार ।

8319.

627. *Upadeśasahasrī.*
With the Padayojanikā Commentary by Rāmatīrtha, disciple of Kṛṣṇatīrtha.

Part II: Padyabandha, metrical portion.
For the manuscript see. L. 1475.

Post-colophon Statement:

संवत् १७६२ मार्गशिरमासे कृष्णपक्षे तिथौ दशम्यां बुधवासरे लिखितमिदं मिश्र हरिकृष्णेन । शुभमस्तु ।

The date, given here 1617 as Rājendralāla rightly conjectures, should be that of the Śaka Era.

[8320.

629. **सिद्धान्तदशश्लोकी** *Siddhāntadaśaślokī.*

By Śaṅkarācārya.

With the Commentary **सिद्धान्ततत्त्वबिन्दु**

by Madhusūdana Sarasvatī.

For the manuscript see. L. 1483.]

8321.

8635. **उपदेशसहस्री** *Upadeśasahasrī.*

By Śaṅkara.

With a commentary by Ānandagiri[-jñāna].

Substance, country-made paper. 13 × 5 inches. Folia 134. Lines, 13 on a page. Extent in ślokas, 15,000. Character, Nāgara. Appearance, good. Complete.

The *Upadeśasāhasrī* is divided into two parts, poetry and prose. The poetic portion comes to an end in leaf 109, in which the text and the commentary both appear. Then the prose portion commences in which only प्रतीकल्पs are quoted. The commentator is Ānandagiri[-jñāna], who is the same as Ānandajñāna.

See for the text IO. Catal. Nos. 101, 151, 2221, 2222.

8322.

10930. *Upadeśasahasrī.*

With the commentary by Rāmatīrtha.

Substance, country-made paper. 15 × 6½ inches. Folia, 113. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Complete.

This contains the metrical version of the text which begins :

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत् सर्वविषयातीतं तस्मै सर्वविदे नमः ॥
समाप्तयऽ क्रियाः सर्वाः दाराग्न्याधानपूर्विकाः ।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ।
ध्रुवे स्यातां ततो रागो द्वेष[हेष]स्त्वेव ततः क्रिया ॥
धर्माधर्मौ ततोऽभ्यस्य देहयोगस्तथा पुनः ।
एवं नित्यप्रवृत्तोऽयं संसारश्चक्रवद्भ्रमम् ॥

The commentary begins :

यच्चाध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ।
भाति नो भाति यज्ज्ञानात्तदस्मि ब्रह्म चित्सुखम् ॥
तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यबन्धप्रबन्धेन संक्षेपतो युक्त्यो-पदिश्य पुनरपि उक्तमेवार्थजातं पद्यबन्धप्रबन्धेन सोपस्करं विस्तरेणो-पदेष्टुकामो भगवान् भाष्यकारः पद्यग्रन्थारम्भे ग्रन्थप्रतिपाद्यपर-देवतानमस्काररूपं मङ्गलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति—
चैतन्यमिति ॥

The text consists of 128 verses.

End :

विमथ्य वेदोदधितः समुद्धृतं
सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथामृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमोत्तितं च यैः ॥ २८ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपाद-शिष्यस्य श्रीशङ्करभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्ता ॥ समाप्तोऽयमुपदेशसारः ।

The commentary ends :

उपदेशे सहस्रीयं विवृता हि महात्मभिः ।
अद्यावशान्मयाप्यस्याः पदयोजनिका कृता ॥
समस्तवेदार्थरहस्यगद्यपद्यप्रबन्धार्थतयावबोधः ।
कथं नु मादृङ्मतिविम्बितः स्यादथापि भक्त्याहमिहास्मि नुन्नः ॥
हृद्यन्तराविःकृतराममूर्त्तेस्तथा गुरूणां विपुलप्रसादात् ।
यथाकथञ्चिद्रचितेन विष्णुरनेन तुष्यत्वखिलान्तरात्मा ॥

Colophon :

इति श्रीशङ्कराचार्यकृतोपदेशसहस्र्याः पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचितायां सहस्रोपदेशि समाप्ता ।

Post-colophon :

यादृशमित्यादि । शुभम् ॥

8323.

10929. *Upadeśasahasrī.*

With the commentary by Rāmatīrtha.

Substance, country-made paper. 12½ × 7 inches. Folia, 36. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Complete.

The Text is well known.

The commentary begins :

ॐ श्रीगणेशाय नमः इत्यादि ।

प्रणम्य रामाभिधमात्मधीपदं जगत्प्रसूतिस्थितिसंयमाय नमः ।
तदात्मकान् श्रीशङ्करपूर्वकान् गुरून्मयोपदेशार्थविभाग उच्यते ॥

इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसंग्राहिकां उपदेशसहस्रीं गद्यपद्यविभागग्रन्थरचनया प्रकटीकुर्वन्नादौ गद्यबन्धमारभमाणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तं मङ्गलमाचरत्याहेति ।

The commentary ends :

ब्रह्मविद्याप्रतिपादकानि सर्वाणि वेदान्तवाक्यानि विस्तरशो बह्वाख्योपसंहारेण पुनःपुनरालोचनीयानीत्यर्थः । द्विरुक्तिर्गद्यबन्धसमाप्तिद्योतनार्था[र्थः] ।

Colophon :

उपदेश-सहस्राख्ये गद्यबन्धो यथामति ।
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥

Post-colophon :

लिखितः ईश्वरीनाथ पाठक गुलाव आत्मजः ।

8324.

8978. *Upadeśasahasrī.*

With its commentary **पदयोजनिका**

By Rāmatīrtha.

Substance, country-made paper. 13 × 6½ inches. Folia, 136. Lines, 12 on a page. Extent in ślokas, 4,800. Character, Nāgara. Date, Saṃvat 1891. Appearance, Fresh. Complete.

Complete in 136 leaves.

For the Commentary see L. 1474, 1475 ; IO. Catal. Nos. 151, 666, 2221, 2222.

8325.

8949. **वेदान्तसारपञ्चीकरण** *Vedāntasārapañcīkaraṇa.*

By Śaṅkarācārya.

Substance, country-made paper. 9¾ × 4 inches. Folia, 3. Lines, 7. 8 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

Complete in three leaves.

8326.

4295. **पञ्चीकरणविवरण** *Pañcīkaraṇavivaraṇa.*

Substance, country-made paper. 8 × 4½ inches. Folia, 19, of which the 2nd is missing. Lines, 9 on a page. Extent in ślokas, 190. Character. Nāgara. Appearance, discoloured. Complete.

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-श्रीशङ्करभगवतः कृतौ पञ्चीकरणविवरणं समाप्तम् ।

Post-colophon Statement :

श्रीरस्तु । संवत् १६५८ वर्षे मार्गशीर्षे सुदि ३ सोमे तद्दिने विविक्त-मलारतौनां शिष्येण आनन्दभारतौकेन कृष्णानन्देन सन्न्यासो दत्तः ।

See W. No. 2190 and Cs. 3, 71. Both of them make Ānandagiri the author of the *Vivaraṇa*, while the present manuscript puts it down to Śaṅkarācārya himself as the author of the text.

8327.

2335. **सन्ध्यापञ्चीकरण** *Sandhyāpañcīkaraṇa.*

Substance, country-made yellow paper. 9½ × 4 inches. Folia, 4. Lines, 7 on a page. Extent in ślokas, 56. Character, Nāgara. Date, Śaka 1751. Appearance, fresh. Complete.

Colophon:

इति सन्ध्यापञ्चीकरणं समाप्तम् ।

Post-colophon:

शके १७५१ शार्व्वरौ शकाब्दे माघकृष्ण १२ शनौ दिवा लिखितं। हस्ताक्षरमिदं गणेशभट्टसूनुभास्करभट्टवासवेकरस्य श्रीमत्स्वामिचरणारविन्दनिरूपितं स्वार्थं मोक्षार्थञ्च गलवक्षेत्रे सम्पादितं भमपृष्ठ etc.

गले वह्निः स्थले वह्निः वह्निः पर्वतमस्तके ।
त्रयो वह्निः समुत्पन्नो शुद्धो भवकमण्डलुः ॥
अनन्ताय गुर्वनन्ताय नमो नमः। श्रीमत्सीतारामार्पणमस्तु ।

It begins:

ॐ पञ्चीकरणमिदं लिख्यते। ॐ सच्छब्दवाच्यमविद्याप्रवलं ब्रह्म ब्रह्मणोऽव्यक्तं अव्यक्तान्महत् महतोऽहङ्कारः अहङ्कारात् पञ्च-तन्मात्राणि, पञ्चतन्मात्रेभ्यः पञ्चभूतानि पञ्चभूतेभ्योऽखिलं जगत् । पञ्चमहाभूतानामेकैकं द्विधा विभज्य पुनरेकैकं चतुर्धा विभज्य स्वार्द्धभागं विहाय इतरेषु पञ्चीकरणं भवति। मायारूपदर्शनं तस्यैव निराकरणं अध्यारोपापवादाभ्यां निष्प्रपञ्चः प्रपञ्च्यते ।

The work is divided into two chapters. The 2nd chapter begins in leaf 3a: अथ महावाक्यप्रबोधप्रकारं व्याख्यास्यामः ।

The work is unknown to Aufrecht, but a *Vārtika* is known in Bühler's Gujrat Report, Vol. IV, 102.

8328.

9026. (A) **पञ्चीकरण** *Pañcīkaraṇa.*

By Śaṅkarācārya.

Substance, country-made paper. 10×4½ inches. Folia, 3. Lines, 35 in the book. Extent in ślokas, 30. Character, Nāgara. Appearance, fresh. Complete.

Printed, ed. KSS., Benares.
Complete in six leaves.

(B) **पञ्चीकरणवार्त्तिक** *Pañcīkaraṇavārttika.*

By Sureśvarācārya.

Substance, country-made paper. 10×4½ inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 80. Character, Nāgara. Appearance, fresh. Complete.

Complete in three leaves.
Printed, ed. KSS., Benares.

8329.

2351. **यतिसन्ध्यावार्त्तिक** *Yatisandhyāvārttika.*

By Sureśvarācārya.

The same as *Pañcīkaraṇavārtika.*

For the manuscript and the work see L. 3253. The MS. has two additional verses in praise of Śaṅkarācārya. See the third work in our No. 2344.

Colophon:

इति श्रीमच्छंकराचार्यविरचितं भगवत्पूज्यपादशिष्यसुरेश्वराचार्य-
विरचितं यतिसन्ध्यावार्त्तिकं समाप्तम् ।

Post-colophon:

चतुर्थमठ आम्नायप्रारंभः ।
अयने विषमे चैव परागे चन्द्रसूर्ययोः ।
गुरुवाश्विप्रमोद्भिद्भु(?) पाठग्रहणपूर्वकम् ॥
भो भो स्वामिन् कृपासिन्धो प्रार्थयिष्यामि तेऽधुना ।
पर्वण्याब्धिनमस्काराननुज्ञां दातुमर्हसि ॥

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥
श्रीगुरुभ्यो नमः । अथ मठाम्नायो लिख्यते ।

8330.

9313. **पञ्चीकरणवार्त्तिक** *Pañcīkaraṇavārttika.*

By Sureśvarācārya.

Substance, country-made paper. 9 × 4 inches. Folia, 2. Lines, 10 on a page. Extent in ślokas, 24. Character, Nāgara. Appearance, decayed. Generally correct. Complete.

See L., Vol. I, No. 308, p. 174.

8331.

9569. *Pañcīkaraṇavārttika.*

परं ब्रह्मैवासं भ्रमपरिगतं संसरति तत्परध्यानालीढं विवसमशुभस्यास्पदमिति श्रुतिन्यायापेतं जगति विततं मोहनमिदं तमो येनापास्तं स हि विजयते यामुनमुनिः । अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समाधिगतोऽयमर्थः जीवपरमात्मज्ञानपूर्व्वकवर्णाश्रमधर्मेतिकर्त्तव्यताकपरमपुरुषचरणयुगलध्यानार्च्चनप्रणामादिविहितर्थ(?)प्रियस्तत्प्राप्तिफलः अस्य जीवात्मनः अनाद्यविद्यासञ्चितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तत्तादात्म्याभिमानजनितावर्जनीयभवभयविध्वंसनाय देहातिक्रान्तस्वरूपः स्वभावतदुपासनतत्फलभूतात्मस्वरूपाविर्भावपूर्व्वकाणविकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातं

तत्त्वमस्ययमात्मा ब्रह्म च आत्मनि तिष्ठन्नात्मनोनन्तरोपमात्मानं वेद। इत्यादि।

End:

भक्त्या त्वनन्यया शक्य इत्यनेनैकार्थ्यात् भक्तिश्च ज्ञाने विशेषणमेवेति सर्व्वमुपपन्नं।

सारासारविवेकज्ञा गरीयांसो विमत्सराः।
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः॥

Colophon:

इति श्रीभगवद्रामानुजाचार्य्यविरचितवेदार्थसंग्रहः समाप्तिमगमत्।

8660

3089. यतीन्द्रमतदीपिका *Yatīndramataḍīpikā.*

By Śrīnivāsadāsa, son of Govinda Ācārya.

Substance, country-made paper. 14 × 6½ inches. Folia, 38. Lines, 9 to 11 on a page. Extent in ślokas, 900. Character, Nāgara of the early 19th century. Appearance, discoloured. Complete.

For the work, see L. 2054.

Printed, ed. Ānandāśrama Sanskrit Series, Poona; translated into English by A. Govindacharya Swamin, Madras.

8661

974. *Yatīndramataḍīpikā.*

A succinct exposition of the *Viśiṣṭādvaitavāda* of the Vedānta philosophy, in ten chapters.

For the manuscript, see L. 2054.

Post-colophon:

ॐ नमः शिवाय। श्रीमती दुर्गायै नमः। श्रीगणेशाय नमः।

संवत् १८६४, शकाब्दाः १७५६ अग्रहायणशुक्लतृतीयायां गुरुवासरे लिखितमिदं पुस्तकं, संवत् १८६४, शकाब्दाः १७५६। करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

8662

10628. *Yatīndramatadīpikā.*

Substance, country-made paper. 13 × 6 inches. Folia, 44. Lines, 8 on a page. Extent in ślokas, 704. Character, Nāgara. Date, Saṁvat 1945. Appearance, discoloured. Complete.

Last Colophon:

इति श्रीबालकुलतिलकश्रीमन्महाचार्य्यस्य प्रथमदासेन श्रीमद्वेङ्कटगिरिनाथपदकमलसेवापरायणस्वामिपुष्करिणीगोविन्दाचार्य्यसूनुना श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायामद्रव्यपरिच्छेदो नाम दशमोऽवतारः।

Post-colophon:

शुभसंवत् १९४५ ह'जा चैत्रकृष्णपक्षे लिखवाया लालासन्तोषिलालजी-साकिन कालाजी मंडइ वनारसवासीसे व्यासगणेशरामने हरिजनहेतु—

ग्रन्थ ८२५॥

A summary of the views of Rāmānuja and other teachers of his school on Vedānta.

For a full description of the work, see L. 2054.

8663

1958. सारसंग्रह *Sārasaṁgraha.*

Substance, country-made yellow paper. 9½ × 6½ inches. Folia, 49. Lines, 13 to 15 on a page. Extent in ślokas, 1,5236. Character, Nāgara. Date, Saṁvat 1886. Appearance, fresh. Complete.

Last Colophon:

इति श्रीसारसंग्रहे भागवताराधनमाहात्म्यकथनम् नाम पूर्व्व(?) समाप्तम्।

Post-colophon:

श्रीमते हयग्रीवाय नमः । संवत् १८८६ ।

It begins:

श्रीमते रामानुजाय नमः ।

शुक्लाम्बर[धरं] विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व्वविघ्नोपशान्तये ॥
यस्या द्विरदवक्त्राद्याः पारिषद्याः परःशतं ।
विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥ २ ॥
वकुलाभरणं वन्दे ज[ग]दाभरणं मुनिम् ।
य [:] श्रुतेरुत्तरं भागं चक्रे द्राविड़भाषया ॥ ३ ॥
श्रीरङ्गमङ्गलमहोत्सववर्द्धनाय
वेदान्तपान्थपरमार्थसमर्थनाय ।
कैंकर्य्यलक्षणविलक्षणमोक्षभाजो
रामानुजो विजयते यतिराजः ॥ (?) ४ ॥

वेदे रामायणे चैव पुराणे भारते तथा ।
आदौ मध्ये तथा चान्ते हरिः सर्व्वत्र गीयते ॥ ५ ॥
श्रुतिस्मृतीतिहासे च पुराणं धर्म्मसंहितं
सर्व्वतः सारमादाय षट्पदः कुसुमाद्यथा ॥ ६ ॥
वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुड़ं च तथा पाद्मं वराहं शुभदर्शनम् ॥ ७ ॥
ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजस्मनि निबोध मे ॥ ८ ॥
मात्स्यं कौर्म्मंच तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयं च षड़ेतानि तामसानि निबोध मे ॥ ९ ॥
तथैव स्मृतयः प्रोक्ताः ऋषिभिस्त्रिगुणान्विताः ।
सात्त्विका राजसाश्चैव तामसाः शुभदर्शके ॥ १० ॥

.....

.....

सात्त्विकानि पुराणानि तथैव स्मृतिमेव च ।
वैष्णवानां मुदार्थाय क्रियते सारसंग्रहः ॥

Colophons:

7B,

इति श्रीसारसंग्रहे चक्रधारणमाहात्म्यं प्रथमसंस्कारः ।

12B, Oऊर्द्ध्वपुण्ड्रधारणं द्वितीयसंस्कारः ।

15A, Oतृतीयनामसंस्कारः ।

21A, Oमन्त्रसंस्कारो नाम चतुर्थसंस्कारः ।

49B, इति सारसंग्रहे भागवताराधनमाहात्म्यकथनं नाम पूर्व्वं समाप्तं ।

This is a Vaiṣṇava work of Rāmānuja's school with five chapters, the 1st on branding the body with the mark of disc, the 2nd on putting on the sectarian mark of *Ūrdhvapuṇḍra*, the 3rd on the adoption of a Vaiṣṇava name, and the 4th on devotion to God.

There appears to be another part of the work, as this is called *Pūrva*.

The author does not give his own name, but he gives his Guru's name as Śrīkṛṣṇa.

49B,

श्रीकृष्णनामार्य्यगुरोः प्रसादात्
सन्दर्भमेतत् कृतमुत्तमं मे ।
भक्त्या नरो यः शृणुयात् पठेद्वा
सौभाग्यवान् गच्छति तत्पदं सः ॥

8664

8282. कूरेशविजय *Kūreśavijaya.*

Substance, country-made paper. 10½ × 4½ inches. Folia, 5. Lines, 8 on a page. Extent in ślokas, 100. Character, Nāgara. Date, Saṁvat 1929. Appearance, fresh. Complete. Illegible and incorrect.

Colophon:

इति श्रीकुरेशविजयः सम्पूर्णं ।

Post-colophon:

संवत् १६२६ मासानां मासोत्तमे मासे पौषे मासे तिथौ चतुर्थ्यां बुधवासरे लिखितवच्चामिश्रेण।

शुभमस्तु।—

Called *Kūreśavijaya*, being written by Kūreśa *alias* Śrīvatsāṅka as stated in *Cat. Cat.*

There are altogether 5+36=41 verses. After showing in the first five ślokas the points of superiority of God Śiva as advanced by the Śaiva, it proves Viṣṇu to be the Supreme God.

Beginning:

श्रीमते रामानुजाय नमः

गायत्र्या बोधितत्वादपि नमकमुखाद्राघवाराधितत्वात्
सौरैः कैलासयात्राव्रतमुदिततयाभीष्टसन्तानदानात्।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः॥ १॥
कन्दर्पध्वंसकत्वादुगरलकवलनात् कालगर्व्वापहत्वात्
दैतेयावासभूतत्रिपुरविदलनाद्दक्षयागजयित्वात्।
पार्थस्य स्वास्त्रदानान्नरहरिविजयान्माधवे स्त्रीशरीरे
शास्तुः सम्पादकत्वादपि च पशुपतिः सर्व्वदेवप्रकृष्टः॥ २॥
.....3-4

2A,

वैशिष्ट्येय योनि-पीठाकरनरकरिपुश्लिष्टभावेन शम्भोः
स्वस्यैवार्द्धप्रतीकार्पितहरिवपुषा लिङ्गतत्त्वेन यद्वा।
अप्राधान्याद्विशिष्टाद्वयसमधिगमा + नवानामरातेः (?)
स्थाणोः प्राधान्ययोगादपि च पशुपतिः सर्व्वदेवप्रकृष्टः॥ ५॥
चतुर्विंशतिकक्षाभिरुपन्यस्ते मते परैः।
सिद्धान्तं वक्तुमारेभे सप्रमाणं स कूरराट्॥ १॥
गायत्रीपूर्व्वकृत्याचमनविधिपुरस्कारसङ्कल्पकार्य्ये
गोविन्दाख्याप्रयोगाद्धरिरिति कथनात् + + धीत्यारिकाले।
भर्गं शब्दस्य सूर्य्यात्मकहरिमसोधाचकत्वात् पुरस्ता-
दोंकाराख्येयभावाद्धनविधिगुणाच्छुद्धसत्त्वाश्रयत्वात्॥ २॥

प्रख्याताशेषदेवप्रणमनविषयत्वात् योग्यकर्म्म (?)

.....

.....

(विष्णुपादा)म्भोजानां मोक्षदत्वादपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥

End:

ग्राहाक्रान्ते करीन्द्रे मुकुलितनयने मूलमूलेति खिन्ने

नाहं.....

इत्येव + + सपदि सुरगणे भावशून्ये समस्ते

भूयो यत् प्रादुरासीत् स दिशतु भगवान् सततं मंगलं नः ॥ ३६ ॥

8665

8909. कूरेशविजयव्याख्या *Kūreśavijayavyākhyā.*

By Dharmācārya.

Substance, country-made paper. 19 × 4 inches. Folia, 25. Lines, 6 on a page. Extent in ślokas, 900. Character, Bengali of the 18th century. Appearance, discoloured. Complete.

It begins:

श्रीहयग्रीवाय नमः ॥ श्रीमते रामानुजाय नमः ॥ श्रीकूराधिपतये नमः ॥ श्रीमते वेदान्तमहागुरवे नमः ॥

श्रियः पतित्वादपि भूपतित्वं प्रख्यापयित्वा परमं मुरारेः ।

भूमिस्तवे भूपतिनामनिष्ठां वंशप्रतिष्ठामपि तामवाप ॥

धर्म्माचार्य्यः सुधीः सोऽयं निर्म्माति विदुषां मुदे ।

विष्णुपारम्यपद्यानां प्रमाण-मणि-सम्पुटम् ॥

पत्युः पशूनां परतां पद्यैः पञ्चभिरावृताम् ।

निराकरोति कूरेशो बुधः संख्यागतैः स्तुतैः ॥

पञ्चविंशतिकस्याभिरुपन्यस्ते मतेश्वरैः ।

सार्द्धया शतदूषण्या सिद्धान्तं वक्ति कूरराट् ॥

श्रीकूराधिपपद्यानां व्याख्याने भुवि कः प्रभुः ।

तत्प्रसादस्तु लेशोऽस्या मया लिखति तत्त्ववित् ॥

गायत्रीबोधित्वादिति प्रथमतः परमतोपात्तं
दूषणं श्लोकद्वयेन द्वादशभिरुक्तिभिर्निराचष्टे।
गायत्रीपूर्वकृत्याचमनविधिपुरस्कारसङ्कल्पकार्य्ये गोविन्दाख्यप्रयोगा-
दिति।

Kūreśa wrote 32 verses, being an answer to five *padyas* which maintain the superiority of Śiva over Viṣṇu. The points of inferiority of Śiva shown by Kūreśa are one hundred and fifty. The commentator in explaining these ślokas, notices also those particular ślokas to which they are meant to be answers.

(8A) *After the 2nd*:

अथ दशरथतनयस्थापिताराधितत्वादिति बहुपुराणेतिहासप्रसिद्ध-
वैभवस्यास्य कथं न प्रकृष्टत्वमित्याशङ्क्य तदाराधनादि सर्व्वं वरदानकृत-
मिति समाधत्ते त्रयोदशभिर्दूषणैः वाल्मीकिरिति द्वाभ्यां श्लोकाभ्यां।

(10B) *After the 4th*:

अत्र दशरथतनयस्थापिताराधितत्वादित्यत्र नमकचमकमुखे राघवा-
राधितत्वादिति पाठे तु तदीयपद्यद्वयमपि व्याक्रियते॥

विद्यारण्योज्झितत्वान्नमकचमकयोर्वेदभाष्ये तदर्थव्याख्याने इति।
विद्यारण्येन वेदभाष्ये तदर्थव्याख्याने तेनोज्झितत्वादनुक्तत्वादिति इष्टका-
श्चितयः सर्वाश्चतुर्थे तु समाहिताः। रुद्राध्याये पञ्चमे तु चित्यश्चौ (?)
होम उच्यते॥

(12A) *After the 6th*:

[घण्टाकर्णाघनाशादिति घण्टाकर्णाख्यराक्षसवृत्तान्तेनेकान् ब्रह्म-
वधादीन् नरमेधानिषाङ्कीकृत्य तमवति स्मेति। हरिवंशादावभियुक्तम्।
अथ सौरैः कैलासयात्राव्रतमुदिततयाभीष्टसन्तानदानादित्युक्तं तद्दूषणैः
प्रतिक्षिपति—
द्रुमहति हरिवंशे विरिञ्चिस्मरारिस्कन्दानां सौरिवंशे क्रमजनि-
कथनादिति।

(14A) *After the 9th*:

अथ यद्योक्तं कन्दर्पध्वंसकत्वादिति तत् पुष्पेष्वास इत्यादिभिः श्लोकैश्चतुर्भिः प्रतिक्षिपति पुष्पेष्वासप्रणीतादिति—

(14B) *After the 10th*:

अथ गरलकवलनादिति यदभाणि तदपि विशेषानभिज्ञभणितमिति निराकरोति पञ्चभिः।

(16A) *After the 12th*:

अथ दैतेयाधासभूतत्रिपुरविदलनादित्युक्तं पशुपतिप्रकर्षं गीर्ष्वाणेत्यादिना षड्भिर्दूषणैर्निराकरोति।

(20A) *After the 19th*:

अथ यत्तुक्तः भूमौ लोकैरनेकैः सततधिरचिताबाधितत्वादमीषामष्टैश्वर्य्यप्रदत्तादिति तद्विष्णोरेव नेतरेषामिति दशभिः समाधत्ते।

(22B) *After the 23rd*:

अथ हंसक्रोडाङ्गधारी द्रुहिणमुरहरादूष्टशीर्षाङ्घ्रिकत्वादिति षोड़शदूषणं पञ्चभिः प्रतिक्षिपति श्रीकूर्म्माहीन्द्रदंष्ट्राकृतिभरभगवद्धारितक्ष्मातलाधोदेशस्थे शास्त्रदूष्टैरनुचितकथनादिति।

(25A) *After the 30th*:

अथ वैशिष्ट्यं च योनिपीठायितनरकरिपुश्लिष्टभावेन शम्भोः स्वस्यैश्वर्यप्रतीकायितहरिवपुषा लिङ्गितत्वेन यद्वा अप्राधान्याद्विशिष्टाद्वयसमधिगमे दानवानामरातेः शम्भोः प्राधान्ययोगादपि च पशुपतिः सर्वदेवप्रकृष्टः इत्यन्तिमश्लोकशङ्कां निवारयति प्रालेयेत्यादिपद्यद्वयप्रकाशेन।

(25B) *After the 31st*:

वैशिष्ट्यप्रसङ्गमेवास्य द्रढ़यति—

यद्वा स्वार्द्धाङ्गदानाद्धिमगिरिदुहितुः केशवस्यापि योध-
स्वार्द्धाङ्गस्याप्रदाने मनसिजविमतस्याशरीरत्वसिद्धेः।

वैशिष्ट्यस्याप्रसङ्गात् भवत उभयथा चिह्नितर्त्तापवर्गो।
युक्तत्वादेव शक्तेरपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥

The commentary ends:

कूर्म्मेन्द्रेणेति सार्द्धं सदसि च विविधैर्दूषणैः सप्तराज्ञः
पादे क्लृप्ता विपक्षा प्रतिवचनजड़ा विस्मयं तत्र चापुः।
तद्धृत्वा जैत्रघोषं व्यतनुत स महापूर्णनामार्य्यवर्य्यः
कृत्वा चेतस्तदानीं समजनि विमशो चोलभूपस्य मन्त्री ॥

श्रीमते रामानुजाय नमः। श्रीमते वेदान्तगुरवे नमः।

8666

9558. पञ्चधाटी *Pañcadhāṭī.*

Substance, country-made paper. 10 × 4 inches. Folia, 2. Lines, 8 on a page. Extent in ślokas, 10. Character, Nāgara. Appearance, tolerable. Verse. Generally correct. Complete.

It comprises five ślokas in praise of Rāmānuja.

ॐ स्वस्ति श्रीगणपतये नमः।

पाषण्डद्रुमखण्डदाघदहनश्चार्व्वाकशैलाशनिः
बोधध्वान्तनिरासवासरपतिर्जैनेन्द्रकण्ठीरवः।
मायाघादभुजङ्गभङ्गगरुड़स्त्रैविद्यचूड़ामणिः
श्रीरङ्गेशजयध्वनिर्विजयते रामानुजोऽयं मुनिः ॥

पाषण्डखण्डगिरिखण्डनवज्रदण्डः
प्रच्छन्नबोधमकरालयमन्थदण्डः।
वेदार्थसारसुखदर्शनदीपदण्डः
रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः ॥

चारित्रीद्धारदण्डश्चतुरनयपथालङ्घ्याकेतुदण्डं
सद्विद्यादीपदण्डं सकलकलिकथा संहतेः कालदण्डं
त्रय्यन्तालम्बदण्डं त्रिभुवन-विजयच्छत्रसौवर्णदण्डं
धत्ते रामानुजार्य्यः प्रतिकथकशिरो वज्रदण्डं त्रिदण्डं। २*

त्रय्या माङ्गल्यसूत्रत्रियुगयुगपथारोहणालम्बसूत्रं
सद्विद्यायन्त्रसूत्रं सगुण-नय-पथं सम्पदां हारसूत्रं ।
प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनालसूत्रं
रक्षासूत्रं यतीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रं ॥ ४

पाषण्डसागरमहाघड़वामुखाग्निः
श्रीरङ्गराजचरणाम्बुजमूलदासः
श्रीविष्णुलोकमणिमण्डपमार्गदायी
रामानुजो विजयते यतिराजराजः ॥

Colophon:

इति श्रीपञ्चघाटी सम्पूर्णा ।

8667

83 अष्टश्लोकी *Aṣṭaślokī.*

By Parāśara Bhaṭṭa

(With the commentary by Vaiṣṇava Dāsa)

Substance, country-made paper. 11 × 5½ inches. Folia, 4. Lines, 13 on a page. Character, modern Nāgara. Appearance, fresh. A fragment.

The text is also called *Rahasyatraya* ((1) *Mūlamantra,* (2) *Dvaya,* (3) *Caramaśloka*) and consists of eight ślokas, only the first two of which are contained in this fragment with their explanations. The 1st śloka concerns itself with the meaning of ॐ and the 2nd with नमः (of the mūlamantra ॐ नमो नारायणाय) ।

Śl. Text:

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृत्
मकारार्थो जीवस्तदुपकरणं वैष्णवमिदं ।
उकारो नत्या इह नियमयति संबन्धमनयोः
त्रयीसारस्त्रयात्मा प्रणव इममर्थं समदिशत् ।

(Comm.):

श्रीपराशर-भट्टार्य्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेस्तु भूयसे ॥ १ ॥

वन्देहं वटिकाद्रीशं श्रीनिधिं वाष्कलकुलदैवतं ।
सतामनघधिं निधिं ॥ २ ॥ (?) ॥

अखिलचिदचिदीशः श्रीनिवासो दयालुः
स्वपदकमलयुग्मं प्रापकः संश्रितानां ।
निगमशिखरगम्यो नित्यमव्याजबन्धुः
विलसतु मम चित्त वेंकटेशो मुकुन्दः ॥ ३ ॥

प्रणम्य देशिकान् सर्व्वानिष्टश्लोक्या यथाश्रुतम् ।
अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते ॥

अथ परमकारुणिको भगवान् पराशरभट्टार्य्यः सकलचेतनोपजीवनाय सर्व्ववेदसारतः या स्वरूपोपाया पुरुषार्थप्रतिपादिका तया च सदा मुमुक्षुभिः अनुसन्धेयस्य रहस्यत्रयस्य सम्प्रदायपरम्पराप्राप्तमर्थं दर्शयितुकामः स्वरूपज्ञानपूर्वकत्वात् अभीष्टोपायप्रपत्तेः स्वरूपप्रतिपादनपरं सकलशास्त्रवि-परिगृहीतं श्रीमदष्टाक्षरं मन्त्रमादौ विवृणोति चतुर्भिः श्लोकैः । अथ द्वाभ्यां स्वरूपातुरूप (?) पुरुषार्थप्रतिपादनरूपं मन्त्ररत्नं तत्र द्वाभ्यां द्वयविवरणरूपञ्च परमश्लोकं तत्र वेदसारसंग्रहः प्रणवः .....अकारस्य नारायणपदेन उकारस्य नमसा मकारस्य नारपदेन विशदीकरणात् etc. etc.

St. II. (Text):

8A,

मन्त्रराजपदानि मध्यमेन नमसा पुंसः स्वरूपं गतिः
पश्चं शिक्षितदीक्षितेन पुरतः पश्चादपि स्थागतः ।
स्वातन्त्र्यंच निजरक्षणं समुचिता वृत्तिश्च नान्योचिता
तत्रैवेति हरेर्विविच्य कथितं स्वस्यापि नार्हं ततः ॥ २ ॥

(Comm.):

[illegible]

8L

A 3rd śloka is quoted in p. 339, Triennial Catalogue of MSS. of the Madras Library, Vol. I, Part I, Sanskrit A.

For descriptions of *Aṣṭaślokī*, see pp. 284, 289 and 301 of the same catalogue.

For another commentary to the same work, see p. 4 of the same.

The author of the text is a well-known teacher of the school of Rāmānuja and two works by him are known, namely, *Śrīguṇaratnakoṣa* and *Śrīraṅgarāja-stava*.

He seems to have been a priest of Raṅganātha Temple.

8668

Substance, country-made paper. 10 × 4 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 100. Character, modern Nāgara. Appearance. fresh. Complete.

Called *Ācāryopadeśa* by the last owner of the manuscript, on the obverse of the 1st leaf. It is a Vaiṣṇava work, holding Śrī Kṛṣṇa to be the means to salvation.

Beginning:

श्रीमते रामानुजाय नमः ॥

देहात्माभिमानोऽसह्य इति श्रीराममिश्रः परमाचार्यस्य द्वयोपदेशानन्तरं तस्मिन् मम कर्त्तव्यं किमिति पृच्छति विरोधिनः पञ्चाशच्च परिहरन् वर्त्तेथा इत्यवोचत्। ते के इति चेत्, स्वर्गस्य संसारो विरोधी आत्मानुभवस्य स्वर्गानुभवो विरोधी भगवदनुभवस्य आत्मानुभवो विरोधी etc. etc.

2B,

अनाप्तविरोधि समर्पणविरोधि जपविरोधि आराधनविरोधि पतित्वविरोधि वर्ज्जनीयविरोधि भयर्जनीयविरोधि—इति पञ्चाशत्, तत्र उपायविरोधि नाम भगवद्व्यतिरिक्ते उपायत्वानुसन्धानं, एतेन प्रसक्तः सन्

स उपाय इति स्थितिः, अन्यथा सर्वमुक्तिप्रसङ्गः स्यादिति स्थितिश्च उभयविरोधि नाम भगवदुपायत्वे पुण्यफलत्वं अन्योपायत्वे भगवत्फलत्वं च उभयत्र विरोधि नाम फलाकाङ्क्षा भगवतः सकाशात् दृष्टप्रयोजनापेक्षा अदृष्टानपेक्षा च।

End:

अवर्जनीयविरोधि नाम जन्मान्तरकर्मणोत्पन्ननिषिद्धाचरणानि एतत् सर्वं परमैकान्तिनोस्याधिकारिणोऽवश्यं परिहरणं, एवं सूरिभिरुक्तं श्रुत्वा महाचार्योप्यत्यन्तं प्रीतोऽभवत्—

8669

9064 **रामानुजमतखण्डन** *Rāmānujamatakhaṇḍana.*

(A Refutation of the Theories of Rāmānuja.)

Substance, country-made paper. 11½ × 5 inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 280. Character, Nāgara in a modern hand. Appearance, fresh. Complete.

This is a polemic tract, written in refutation of the Vaiṣṇavite doctrine, (so vigorously preached at that time by Rāmānuja), vehemently denouncing the doctrine as one originally started by a *śūdra*. Written in the interest of Brahmanism.

It begins thus:

श्रीविश्वेश्वरो जयतु। जयतु श्रौतधर्मार्कः स्मार्तधर्मारुणोदयः।
सत्पुराणैरुच्यमानः पाखण्डध्वान्तनाशकः।१।

इदानीं बहवो मुग्धा जना रामानुजीयानां दम्भमत्याचारान् वावलोक्य तैर्विप्रलब्धाः सन्तः शास्त्रसम्मतमपि स्वकुलधर्ममपहाय तन्मार्गे प्रविशन्ति। स च मार्गः श्रुतिस्मृत्यादिमूलविधुरोन्मत्तपुरुषप्रवर्तित इति तत्र प्रविष्टा वर्णाश्रमधर्माधिकारच्युता भवन्ति। तेषामेव ग्रन्थे प्रोक्ता तन्मूलपुरुषोत्पत्तिस्तावदुच्यते।

श्रीनिवासाचारिहते दिव्यसूरिचरित्रे चतुर्थे सर्गे—

अस्ति पूर्वपाथोराशेः क्वापि पश्चिमरोधसि ।
मण्डले पाराड्य (?) भूपस्य नगरी कुरुकाह्वया ॥

तत्रासीत् पादजातेषु कश्चिद्द् भागवताग्रणीः ।
श्रीमत्पल्लीविनातीन्द्रसीमातीतगुणोल्बणः ॥

तस्य धर्मधरो नाम तनयः समजायत ।
चक्रपाणिस्ततो जातश्चक्रपाणिपरायणः ॥

अजायत सुतस्तस्मात् रङ्गदासेति संज्ञितः ।
सुमतिं सुषुवे सोऽपि सुतं पाटललोचनं ॥

पुत्रं प्रासूत पार्कारिं पुत्रं पाटललोचनः ।
कारीति तनयो जातः कारीति रोहितस्ततः ॥

ततो जातः सुतस्तस्मात् शठको य इतीरितः ।
तमाहुः कारिजं सन्तः शठकोऽयं पराङ्कुशं ।
गोकुलाभरणाख्यश्च तमेव कारिनन्दनं ॥ इति ।

अत्र शूद्रः स्यात् पादजो दास इति त्रिकाण्डशेषकोषे शूद्रकारिस्ते प्रोक्तत्वात् पल्लीसंज्ञकस्य शूद्रस्य वंशजातशठको यः स च रामानुजीयमार्गस्य प्रथमप्रवर्तकः आद्याचार्य्यः ।

As to the authorship of this work, this much is ascertainable that, when the bulk of the people were becoming followers of Rāmānuja, Brāhmaṇas, anxious to protect the sanātana dharma, assembled together and wrote this dissertation which vanquished the followers of Rāmānuja.

तदा द्विजैः सर्वजगद्धितार्थं सद्धर्मरक्षाकरं पत्रमेतत् ।
प्रकाशितं यस्य विलोकनेन रामानुजीयाश्चकिता बभूवुः ॥

(3) *Mādhva School (Dvaita).*

8670

133. विष्णुतत्त्वनिर्णय *Viṣṇutattvanirṇaya.*

By Ānandatīrtha or Madhvācārya

Substance, country-made paper. 9×4½ inches. Folia, 21. Lines, 14 on a page. Extent in ślokas, 600. Character, Nāgara. Appearance, old. Generally correct. Complete.

Beginning :

सदागमैकविज्ञेयं समतीतक्षराक्षरं ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥
विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येष क्रमात् सज्जनसंविदे ॥
भृगाद्या भारतं चैव पञ्चरात्रमथाखिलं ।
मूलरामायणं चैष पुराणं चैतदात्मकं ॥
ये चानुयायिनस्तेषां सर्वे ते च सदागमाः ।
पुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥
ज्ञेय एतैः सदा युक्तैर्भक्तिमद्भिः सुनिष्ठितैः ।
न तु केवलतर्केण नाक्षजेन न केनचित् ॥
केवलागमविज्ञेयो भक्तैरेव न चान्यथा इति ब्रह्माण्डे—

End :

यस्य श्री युदितानि वेदवचने रूपाणि दिव्यान्यलं
षट्तद्दर्शनमित्थमेष निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पक्षो द्वितीयं वपुः
मध्वो वस्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचिते श्रीमद्विष्णुतत्त्वनिर्णये तृतीयः परिच्छेदः । समाप्तोऽयं ग्रन्थः ।

8671

1334. कृष्णामृतमहार्णव *Kṛṣṇāmṛtamahārṇava.*

(With a commentary in the Trīpāṭha form)

Substance, country-made paper. 13×6 inches. Folia, 82. The last four leaves are partially eaten by white ants. Character, Nāgara. Appearance, Old. Generally correct. Complete.

The Text is by Ānandatīrtha and the commentary, by Kṛṣṇācārya.

For the text, see IO. Catal. No. 2470.

The commentary begins thus:

श्रीकृष्णं रुक्मिणीसत्या सहितं पाण्डवप्रियं।
नत्वा श्रीपूर्णबोधार्य्यान् गुरूनपि भजे गिरम् ॥
पूर्व्वव्याख्या(न)कृतो नत्वा बालबोधाय सादरम्।
व्याख्यास्यामि यथाबोधं कृष्णामृतमहार्णवम् ॥
अस्मद्गुरुप्रसादेन कृष्णाचार्य्योऽहमञ्जसा ॥

इह तापत्रयसन्तप्तं सज्जनजातं पूर्णानन्दानुभवरूपामृतदानेन रिरक्षयिषुः परमकारुणिकः श्रीमदानन्दतीर्थाचार्य्यमुनिः कृष्णामृतमहार्णवाख्यं ग्रन्थं कर्त्तुकामः अधिकारिणामर्च्चनाध्यानादिना मोक्षदातारं वासुदेवं रक्षणं प्रार्थयते अर्च्चितः संस्मृतो ध्यात इत्याद्यपद्येन।

Colophon:

इति श्रीकृष्णामृतमहार्णवव्याख्यानं कृष्णाचार्य्यकृतमलंकृतं ॥

8672

1182. सप्तदिव्याख्यान *Saptativyākhyāna.*

Substance, country-made paper. 12½×7 inches. Folia, 19. Lines, 14 on a page. Extent in ślokas, 760. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

It begins thus:

श्रीमते रामानुजाय नमः ।

इह खलु भगवान् कवितार्किकसिंहः सर्व्वतन्त्रस्वतन्त्रः श्रीमान् वेङ्कटनाथार्य्यः वेदान्ताचार्य्यवर्य्यः रहस्यत्रयसाराधिकारार्थसंग्रहेण शिष्यबुद्धि-समाधानं कुर्व्वन्नादावाचार्य्यप्रणामरूपमङ्गलव्याजेन स्वरूपयाथात्म्यज्ञानं प्रार्थयते । विद्यामेदे प्रपदनमये (in red ink) पृथगुपायत्वेन प्रमाणप्रसिद्धेः प्रपदने इत्यर्थः, स्वार्थे मयट् । तत्र प्रतिष्ठितचेतसः स्थिरचित्ताः अनेन महाविश्वासः सूचितः । दयाधनाः कृपामात्रप्रसन्नाः शिष्यानुवृत्तिनिरपेक्षा इत्यर्थः । शठरिपुशुकव्यासप्राचेतसादीनां (in red ink) निबन्धनेषु प्रबलेषु प्रमाणेषु श्रमेण (in red ink) सन्ततास्यासेन परिणततया कर्म्म-ज्ञानयोरङ्गत्वात् भक्तेः शक्ताधिकारित्वाच्च । अनुपायतया प्रपत्तिरेवानु-रूपोपाय इत्येवंविधबुद्धया परिपक्वया श्रद्धया शुद्धः निःसंशयः आशयो येषां ते तथोक्ताः देशिकाः मम ज्ञानादिगुणरहितस्य प्रज्ञा प्रकृष्टज्ञानं प्रज्ञातदीय-शेषत्वज्ञानं पदे पदे प्रतिपदं सन्ततमित्यर्थः, दिशन्ति । यद्वा पद्यते प्राप्यते इति पदं प्राप्यं तं प्रति प्रज्ञादायं त्वरारूपं ज्ञानं, अथवा विद्यामेदे प्रपदने अतिष्ठितचेतसः चञ्चलचित्तस्य प्रज्ञादायं अमोघत्वानन्यापेक्षत्वशरण्याभि-मतत्वक्षणमात्रनिष्पाद्यत्वादिज्ञानं इह इदानीमेव दिशन्तु वदन्तु, प्रार्थनायां लोट् । १ ॥

. इदानीं स्वस्य तेषु विश्वासं प्रार्थयते । एते अविच्छिन्नसम्प्रदाया नाथाद्यः (in red ink) देशिकाः अध्यन्तैर्वेदान्तवाक्यप्रमाणैः प्रतिनन्दनीयाः स्तोतव्या विविधाः स्वरूपोपायपुरुषार्थप्रतिपादकतया नानाविधा उदन्ता उपदेशवाक्यानि येषां ते तथोक्ताः । श्रद्धातव्ययोर्वात्सल्यसुशील्यादि-विशिष्टतया विश्वसनीययोः शरण्ययोः प्रपत्तव्ययोः दिव्यदम्पत्योः अनेन विशिष्टस्यैव उपायत्वं सूचितम् । तयोर्दया सैव दिव्यापगा मन्दाकिनी तस्या व्यापका तत्पात्रभूता इत्यर्थः । स्पर्द्धया परस्परजिगीषया विप्लव उपप्लवः यस्यां सा च विप्रलभ्भानां कुमतीनां पदवी च तस्यां वेदेशिका विमुक्ताः अवस्ते(?)स्यादिविशेषणत्रयेण यथाक्रमम् ज्ञानमुक्तिवैराग्याणि सूचितानि । देशिका नाथाद्यः अस्मद्गुरुपर्य्यन्ता इत्यर्थः । अपोढः तिरस्कृतः मन्मथशरैरुन्माथः पराभवो येन तस्मै अनेन आचार्य्यकृपाहेतुभूतं विष्णोः कटाक्षस्य अतेषादिप्रमाणप्रतिपादितमतेषादिकं सूचितम् ।

यद्वा, मन्मथशरोन्माथाय निरस्तकामशरविकाराय इत्यर्थः। इह वात्सल्यैक-विषयाय मह्यं स्वदन्तां रोचन्तां तेषु मम विश्वासो भवत्वित्यर्थः ॥ २ ॥

अनन्तरं तेषामुत्कर्षमाशास्ते हृद्या ज्ञानानुष्ठानपूर्णा तया सर्व्व-मनोहरा हृदेव पद्मं तदेव सिंहासनमिति रूपकरूपितं तस्मिन् रसिकस्य आसक्तस्य हयग्रीवस्य इह ऊर्म्मिघोषः तरङ्गध्वनिः तेन क्षिप्ता निराकृता प्रत्यर्थिनां प्रतिवादिनां दृप्तिः मदो यया सा तथोक्ता, देशविप्रकृष्टानामपि दिग्विजयमुखेन निरास इत्याह—दिक्सौधेति (in red ink)।

Veṅkaṭanātha wrote 70 verses, briefly presenting the tenets of his religion. The present manuscript contains an anonymous commentary on it.

The commentary of the 70th verse runs thus:

उक्तमेवार्थं विविच्य दर्शयति—आस्तिक्यात् शास्त्रविश्वासशाली निशितबुद्धिः श्रुतार्थधारणशक्तः अनभ्यसूयः गुणदोषाविष्करणरहितः, सता श्रुतिस्मृति-अविरोधिना सम्प्रदायेन, परिशुद्धमना निः(सं?)शयहृदयः सदर्थौ सद्वयः अर्थविशेषं जिज्ञासुः सङ्केतभीत्या रहितः तृणेषु निःसारग्रन्थेषु असक्तः पुरुषो यः सः शाश्वतीं अविच्छिन्नसम्प्रदायां सद्वर्त्मनीं सन्मार्गं अनुविधास्यति। सर्व्वं समञ्जसं। ७० ॥ सतत(?)त्या ("त" is evidently a mistake of the scribe) व्याख्यानं समाप्तम्।

8673

172. सच्चरितरक्षा *Saccaritarakṣā.*

By Veṅkaṭanātha

Substance, country-made paper. 18 × 5½ inches. Folia, 10. Lines, 17, 18 on a page. Character, Nāgara of the 17th century. Appearance, discoloured.

This defends the practice of branding the body with hot iron prevailing among the Mādhva sect.

Beginning:

श्रीमान् वेङ्कटनाथार्य्यः कवितार्किककेशरी ।
वेदान्ताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि ॥ १ ॥

The object of the work:

चक्रादिलाञ्छनभृतः सुभगोर्द्ध्वपुन्द्रान्
न्यस्तात्मनो भगवतश्चरणारविन्दे ।
तद्भुक्तभोगरसिकांस्त्रिदिवेन्द्रवंद्यान्
पुंसः प्रमाणशरणान् शिरसोद्धरामः ॥
यतिवरचरणाम्भोरुहरजःप्रभावेण सन्निवृत्तरजाः ।
विदधाति वेङ्कटेशः स्थिरामिमां सच्चरितरक्षां ॥
सद्भिर्धृतेषु सततं विमर्ति गता ये
पत्युः समस्तजगतां परमायुधेषु ।
तैरेव ताननि(न्नि)श(?)शाननिघर्षदीप्तैः
तर्कात्मना परिणतैः प्रहरामि मूर्खान् ॥

It ends:

अयमनश्म + न्तैरादिभक्तैर्यथावद्विदितनिजसुतत्वो विश्रमव्या + + +
रथचरणनिरूढध्यञ्जनानां जनानां + + + + दोहलीदेहलीनां ॥

10A.

इति कवितार्किकसिंहस्य सर्व्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्य्यस्य कृतिषु सच्चरितरक्षा ।

But still there are 12 lines on one side and 17 on the other side of the leaf, ending abruptly.

8674

सच्चरित्राधिकार *Saccaritrādhikāra.*

(*By Veṅkaṭeśa.*)

Substance, foolscape paper. 12×5¼ inches. Folia, 10. Lines, 12 on a page. Extent in ślokas, 350. Character, Nāgara. Date, Saṁvat 1849. Appearance, discoloured and worm-eaten. Complete.

Colophon:

[इति श्रीमद्होबलशठकोपमुनिसांप्रदायिकश्रीनिवासमुनिपदाघलम्बिना कल्याणरामानुजमुनिविरचितायां सकलरहस्यार्थसंग्राहकतया स्वकृतसप्रदाय-सारास्यप्रबन्धव्याख्यायां सारदीपिकायां सच्चरित्राधिकारः समाप्तिमगमत् ।

Post-Colophon:

शुभं भवतु etc. यादृशं etc. संवत् १८४६ मीती पौषमासे शुद्धपक्षे चतुर्दश्यां गुरुवासरे गुर्ज्जराशुक्लाघटाङ्कितदयाशङ्करात्मज उमाशङ्करेण कालीस्थानकलकत्तामध्यस्थितश्रीगङ्गासान्निध्य लिखितमिदं पुस्तकं ।

A work in support of the practice of branding the body with the marks of disc, etc.

Beginning:

[श्रीगणेशाय नमः ।]

श्रीमते वेदान्तमहागुरवे नमः ।

श्रीमान् वेङ्कटनाथार्य्यः कवितार्किककेशरी ।
वेदान्ताचार्य्यवर्य्योयं सन्निधत्तां सदा हृदि ॥

यतिपतिचरणाम्भोरुहरजःप्रभावेण सन्निवृत्तरजाः ।
विदधाति वेङ्कटेशः स्थिरामिमां सच्चरितरक्षां ॥ २ ॥

वैष्णवद्वेषिणैकेन कुदृष्ट्या दूषणं कृतं ।
चक्रादिधारणे शस्त्र सम्यगुद्भियतेऽधुना ॥

Already noticed.

8675

1940. अधिकारसंग्रह *Adhikārasaṁgraha.*

By Veṅkaṭanātha Vedāntācārya, surnamed Kavitārkikasiṁha.

Substance, country-made paper. 8¼ × 4 inches. Folia, 14. Lines, 8 on page. Character, Nāgara. Appearance, a bit discoloured. Complete.

Colophon:

इति निगमाधिकारो द्वात्रिंशः। इति श्रीकवितार्किकसिंहस्य सर्व्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्य्यस्य कृतिषु आधकार संग्रहः समाप्तः।

Post-colophon:

श्रीमते रामानुजाय नमः।

There are altogether 69 verses and 32 chapters. Printed in *Kāvyamālā*, VIII, p. 157.

8676

Adhikārasaṁgraha.

Substance, country-made paper. 10½ × 4 inches. Folia. 12. Lines, 7 on a page. Extent in ślokas, 180. Character, Nāgara. Appearance, tolerable. Verse. Generally correct. Complete.

See H.P.R., Vol. II, No. 4.

8677

पदप्रकाशबोधिनी *Padaprakāśabodhinī.*

By Vedavyāsa, Son of Janārdana

Substance, country-made paper. Folia, 41. Lines, 11 on a page. Extent in ślokas, 1,150. Character, Nāgara. Date, Saṁvat 1510(?), Śaka 1665. Appearance, old. Generally correct. Complete.

This is a commentary on *Ānandatīrtha's Tantrasāra*, a Mādhva work of authority, sometimes called *Tantrasārasaṁgraha*. In the 1st volume of Cat. Cat., Aufrecht calls this a Vedānta work as different from Ānandatīrtha's work, but he corrects himself in Cat. Cat., II.

It begins thus:

लक्ष्मीपतिं पूर्णगुणैकदेहं ब्रह्मेशशक्रादिसुरैकवन्द्यम्।
वन्दे नृसिंहं गुरुपूर्णबोधं प्राप्यं पूज्यं तन्त्रसारोदितमार्गात्॥

विद्याधीशं गुरुवरं नत्वा तेषां कृपावशात् ।
तच्छिष्यार्थं तन्त्रसारपदभावं प्रदर्शये ॥

अथ सकलसज्जनहितार्थमानन्दतीर्थमुनिस्तन्त्रसारसंग्रहं चिकीर्षुः स्वयमन्तरायविधुरोऽपि स्वभावतः कृतमन्येषां प्रारिप्सितविघ्नसमाप्त्याद्यङ्गं [नम]स्कृतिरूपं मङ्गलं शिष्यशिक्षायै निबध्नाति—जयतीति । कमलापतिः श्रीपतिर्जयति उत्कर्षेण वर्त्तते उत्कृष्टत्वं हेतुभूतं विशेषणद्वयं अभ्यर्हितत्वात् अल्वभ(?)पदस्य पूर्व्वनिपातः । अनन्ता अपरिच्छिन्नाः विभवः ऐश्वर्य्यं आनन्दः सुखं शक्तिः सामर्थ्यं ज्ञानं चानन्त्यादीनि येषां ते सन्तो निर्दोषगुणाः तेजः-प्रभेत्यादयो यस्य स तथा । यद्वा, स्तुत्यत्वोपयोगिविशिष्टत्वमधिकृतत्वं च क्रमाद्विशेषणैराह । ज्ञानैश्वर्य्यप्रभेत्युक्तगुणवत्त्वात् ।

The original has not yet been found. The work is divided in four chapters.

At the end there are four verses, giving an account cf the author's family and his object for writing the commentary.

41A,

श्रीमद्वारतनिर्णयस्य विवृतेर्विद्वज्जनानन्दिनी
चक्रे भट्ट[ज]नार्हनेत्यभिधया ख्यातेन तत्सूनुना ।

व्यासाख्येन नरसिंहमध्वकरुणामालम्ब्य तत्तुष्टये ।
व्याख्येयं वरतन्त्रसारविषये भक्त्या कृता शक्तितः ॥

रम्या सुसरला चित्रसमर्था वरवर्णने ।
सदर्थसहिता चित्रप्रारम्भा वत्सबोधिनी ॥

वेदव्यासकृता तन्त्रसारभावप्रबोधिनी ।
चतुर्थाध्यायगा भूयात् प्रीत्यै मध्वनृसिंहयोः ॥

निर्व्विशेषवराहादिरूपाणां मध्ववल्लभं ।
निर्दोषं सच्चिदानन्दविग्रहं हरिं भजे ॥

At the end of the manuscript ऋषि, छन्दः and देवता of Vaiṣṇava mantras are given, after which is given the date संवत् १५१० (?) शके १६६५ श्रीमुखनामसंवत्सर ज्येष्ठशुद्ध अष्टम्यां भृगौ समाप्तोऽयं ग्रन्थः ।

8678

335. कर्म्मनिर्णयटोका *Karmanirṇayaṭīkā.*

By Jayatīrtha.

Substance, country-made paper. 9½ × 4½ inches. Folia, 25. Lines, 13 on a page. Extent in ślokas, 1,000. Character, Nāgara. Date, Saṁvat 1801. Appearance, old. Prose. Generally correct. Complete.

The text is by Ânandatīrtha and has been described in Cs. No. 51, Vol. III.

The commentary begins:

ब्राह्मणोपनिषन्मन्त्रभेद्वेदगिरोऽखिलाः ।
यत्क्रीड़ाभूमयस्तस्मै परस्मै ब्रह्मणे नमः ॥
प्रणम्य श्रीमदानन्दतीर्थार्य्यपदपङ्कजे ।
गुरूणां च यथाबोधं व्याकुर्व्वे कर्म्मनिर्णयम् ॥

महानाम्नीनामित्यादिखण्डार्थव्याख्यानव्याजेन कर्मनिर्णयं कर्त्तुकामो भगवानाचार्य्यो विघ्नविघातादिहेतुं समुचितविशिष्टेष्टदेवताप्रणाममाचरति —य इज्यत इति ।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितस्य कर्मनिर्णयस्य टीका जयतीर्थमुनिविरचिता समाप्ता ।

Post-colophon:

संवत् १८०१ समये कातीक वदी शुभमस्तु श्रीकाशी वीसुनाथ समाये ॥ गङ्गा बने दुरेता । राम राम ॥

8679

10271. मायावादखण्डन *Māyāvādakhaṇḍana.*

By Ānandatīrtha.

(With the commentary by Jayatīrtha.)

Substance, country-made paper. $11\frac{3}{4} \times 5$ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 200. Character, modern Nāgara. Appearance, fresh. Complete.

Printed, ed. Bombay.

Beginning :

श्रीगणेशाय नमः । श्रीवेदव्यासाय नमः ।

(Com.) नरसिंहप्रसिद्धोरुप्रत्यूहतिमिरापहं ।
प्रणिपत्य व्याकरिष्ये मायावादस्य खण्डनम् ॥

इह विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणस्तन्निवृत्त्यै परमानन्दावाप्तये च सकलजीवजड़ात्मकात् प्रपञ्चात् परमार्थत एवात्यन्तभिन्नं निखिलगुणोदारं निरस्तदोषं परब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणीभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वम् । अपरे तु सतः परब्रह्मभूतस्यैव बीजस्य अज्ञाननिमित्तं दुःखादितद्द्वैतज्ञाननिवर्हणीयमित्यतोस्यानर्थहेतोः आ आत्मैकत्वविद्याप्रतिपत्तये सर्व्वशास्त्रारम्भ इति वर्णयन्ति । तन्मतमखिलं अपाकृत्य स्वमतं समर्थयितुं इदं प्रकरणमारभमाणो भगवान् आचार्य्यः परममङ्गलं नरसिंहस्तवनमादावाचरति ।

(Text). नरसिंहोखिलाज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

The text ends :

इति सर्व्वमुनीनां + मायावादतमोखिलं ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

.....

नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्व्वार्थान् साधयाम्यहम् ॥

The commentary ends:

वचनप्रसूनमाला जयतीर्थाख्येन

भिक्षुणा विरचिता।

धियतां कृष्णहृदये

(?) सदयकमलामहिलेन पुरुषेण ॥

Colophon:

इति श्रीभगवत्पादाचार्यविरचितस्य मायावादखण्डनस्य विवरणं समाप्तं।

See Burnell, 105A.

8680

10446. *Māyāvādakhaṇḍana.*

Substance, country-made paper. 11¾×4 inches. Folia, 3. Lines, 12 on a page. Extent in ślokas, 180. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

The text by Ānandatīrtha is a refutation of the theory of illusion.

Beginning:

श्रीगणेशाय नमः ॥

(Comm):

नरसिंहमसह्योरुप्रत्यूहतिमिरापहं।

प्रणिपत्य व्याकरिष्ये मायावादस्य खण्डनम् ॥

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमादिमतो मुमुक्षोरधिकारिणस्तन्निवृत्त्यै परमानन्दावाप्तये च सकलजीवजड़ात्मकात् प्रपञ्चात् परमार्थत एव अत्यन्तभिन्नं निखिलगुणोदारं निरस्तसमस्तदोषं परब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणीभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वं। अपरे तु स्वतः परब्रह्मभूतस्यैव जीवस्य अज्ञाननिमित्त-दुःखादि-तदहेतुज्ञानविवर्तनीयमित्यतोऽस्यानर्थहेतोः प्रहाणाय आत्मैकत्व-

विद्याप्रतिपत्तये सर्व्वशास्त्रारम्भ इति वर्णयन्ति। तन्मतमपाकृत्य स्वमतं स्थापयितुमिदं प्रकरणमारभमाणो भगवानाचार्य्यः परममंगलं नरसिंहस्तवमादौ आचरति॥

(Text): नरसिंहोखिलाज्ञानमतध्वान्तदिवाकरः।
जयत्यमितस(ज्)ज्ञानसुखशक्तिपयोनिधिः॥

End: (Comm.):

एवं प्रकरणार्थमुपपाद्य तस्य प्रयोजनमाह—

इति सर्व्वमुनिना मायावादतमोखिलं।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये॥
अन्यथा हि विप्रतिपत्तेः संशयो भवति।
प्रकरणार्थमुपसंहरंस्तदनुगुणं भगवद्वाक्यमेव पठति।

(Text): नास्ति नारायणसमं न भूतं न भविष्यति।
एतेन सत्यवाक्येन सर्व्वार्थान् साधयाम्यहम्॥

(Comm.):

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता।
धियतां हृदये सदयैकमले (?) पुरुषेण॥

Colophon:

श्रीमायावादखण्डनं समाप्तं।

8681

मायावादखण्डनपञ्चिका

346. *Māyāvādakhaṇḍanapañcikā*

or

भावप्रकाशिका *Bhāvaprakāśikā.*

By Vyāsayati.

Substance, country-made paper. 9½×4½ inches. Folia, 17. Lines, 17 on a page. Extent in ślokas, 500. Character, Nāgara. Date, Saṁvat 1796. Appearance, tolerable. Prose. Generally correct. Complete.

It is a commentary on Jayatīrtha's commentary on *Māyāvādakhaṇḍana* of Ānandatīrtha.

It bgins:

श्रीवेदव्यासाय नमः । श्रीआनन्दतीर्थभगवत्पादाचार्य्यगुरुभ्यो नमः ॥

ॐ कमलारमणं नत्वा पूर्णबोधेष्टदैवतम् ।
व्याकुर्व्वे गहनमायावादखण्डनपञ्जिकाम् ॥ १ ॥

स्पष्टार्थो य इह ग्रंथः स न व्याक्रियते मया ।
ग्रंथगौरवभीरुत्वात्.....(?) ॥ २ ॥

मङ्गलाचरणपूर्व्वकं चिकीर्षितं निर्द्दिशति—नरसिंहमिति । नरसिंहस्यैव प्रणम्यत्वे हेतुः—असह्योरुप्रत्यूहतिमिरापहमिति ।

It ends:

अत्रापि सर्व्वार्थान् साधयामि इत्यनेन नारायणोत्तमस्यैव सर्वशास्त्रार्थ-त्वोक्तेः ।

सान्द्रा भक्तिर्मम अदांर्द्र(?) मध्वमानसपङ्कजे ।
वसन्तं सन्ततं कंसध्वंसिहंसं भजेऽनिशम् ॥

Colophon:

इति श्रीब्रह्मण्यपूज्यपादानां शिष्येण व्यासयतिना भावप्रकाशिका समाप्ता ।

Post-colophon:

हरि ॐ । तत् सत् ।

मुक्तिप्रदमध्वांतर्गतश्रीलक्ष्मीनारायणार्पणमस्तु । यादृशं पुस्तकम् etc.

संवत् १७१८ शके १६६३ प्रजापतिनामसंवत्सरे दक्षिणायने वर्षऋतौ. अधिकश्रावणमासे शुक्लपक्षे अष्टम्यां गुरुवासरे सर्व्वेषामुपकारार्थं वरजोड़ि. जगन्नाथमठेन लिखिता । समाप्तोऽयं वादार्थः । श्रीरामदेवार्पणमस्तु । मायावादखण्डटीका । श्रीरामः जयति ॥ ३ ॥

8682

1339. तत्त्वोद्द्योतटीका *Tattvoddyotaṭīkā.*

By Jayatīrtha.

Substance, country-made paper. 9½×4 inches. Folia, 103. Lines, 7 on a page. Extent in ślokas, 1,800. Character, Nāgara. Date, Saṁvat 1890. Appearance, fresh. Prose. Incorrect. Complete.

Tattvoddyota, तत्त्वोद्द्योत is a work by Ānandatīrtha or Madhvācārya. This is a commentary on it by Jayatīrtha.

It begins:

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः।
अभिवन्द्य यथाबोधं तत्त्वोद्द्योतं विवृन्महे ॥

इहाविद्यातिमिरनिरन्तरे संसारकान्तारे परिखिन्नानां अल्पास्थिर-सुखखद्योतकासु द्योतमानास्वपि मनःप्रसादं अनासादयतां अधिकारिणां आनन्दनिदानस्य परमपुरुषतत्त्वोद्द्योतस्य सिद्धये प्र(स?)मीहमानो भगवानाचार्य्यः। सूपस्थयन्तिराय(?) विधुरोपि निरन्तराय प्रा(?)रिप्सितपरिसमास्वादेनाङ्गमिष्टदेवताभिपूजनं शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति—

सर्व्वत्राखिलसद्युक्तिः।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वोद्द्योतटीका जयतीर्थभिक्षुविरचिता समाप्ता।

Post-colophon:

शु[भ]मस्तु संवत १८६० मीति श्रावणसुदी ७ वार मङ्गर दशावत रामचलटकायथ मकान शीकरउरमे लिखा ॥

For the text and the commentary, see Burnell, 106a, No. 28. All Burnell's Mss. are incomplete. See also Bik., No. 1857, p. 620.

The work treats of the nature of divinity according to the Mādhva school.

8683

1211. वायुस्तुति *Vāyustuti.*

By Trivikrama Paṇḍita.

(With the commentary मन्दबोधनी

Mandabodhanī, by Śeṣācārya, a disciple of Chalāri Nṛsiṁhācārya.)

Substance, country-made paper. 12×5 inches. Folia, 43. Lines, 10 on a page. Character, Nāgara. Date, Śaka, 1748 and Saṁvat, 1883. Appearance, fresh. Prose and verse. Generally correct. Complete.

Post-colophon:

शके १७४८ संवत् १८८३ ।

8684

1072. *Vāyustuti.*

Substance, country-made paper. 12½×5 inches. Folia, 89. Lines, 8-10 on a page. Extent in ślokas, 1,000. Character, Nāgara. Date, Saṁvat 1887. Appearance, fresh. Prose and Verse. Generally correct. Complete.

A metrical composition in praise of Ānandatīrtha (Madhvācārya) by Trivikrama Paṇḍita, with a copious commentary of Śeṣācārya, disciple of Chalāri Nṛsiṁhācārya.

By way of introduction the commentator narrates an interesting traditional story as to the composition of these verses, with special reference to the first two verses known as *Narasiṁhanakhastotra* and attributed to Madhvācārya.

Tradition extols Madhvācārya as an incarnation of the all-pervading wind-god—the emblem of life. The commentator describes how Madhvācārya assumed the shape of Hanumān—the great mythological monkey-general, son of wind-god—while worshipping Lord Śrī Kṛṣṇa in Badarikā Hermitage, Who transformed Himself as Rāma, the God incarnation of Tretāyuga, before His devotee.

The author is said to have composed these verses at the sight of this strange transformation of Madhvācārya. Hence this metrical composition is known as *Vāyustuti.* Personal eulogy was not pleasing to a devotee like Madhvācārya without introductory verses in praise of God Viṣṇu; so he is said to have added the two introductory verses in praise of the nails of Narasiṁha, the fourth of the ten mythological incarnations of Viṣṇu, and these two verses, known as *Narasiṁhanakhastotra,* are attributed to him.

The conmmentary of this *Narasiṁhanakha-stotra* is named by the commentator *Narasiṁhanakhastotra-pañcikā* and *Vāyustuti-mandabodhanī.*

Beginning of the commentary of Narasiṁhanakha-strota:

श्रीकृष्णाय नमः ।

लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान् ।
गुरून् मूलादिपरमान् वन्दे विद्यागुरूंश्च मे । १ ।

ऊर्णारिनरसिंहार्यशिष्यः शेषाभिधो बुधः ।
नरसिंहनखस्तोत्रपंचिकां कुरुतेंजसा ॥ २ ॥

अत्र किल कथां कथयन्ति । कदाचित् त्रिविक्रमपण्डिताचार्यः श्रीमध्वाचार्यैः सह बदरिकाश्रमं प्रति जगाम । तत्र देवालयकवाटं पिधाय नरनारायणं श्रीमध्वाचार्यं पूजयति सति इदानीं किं कुर्वन्ति श्रीमध्वाचार्या इति जिज्ञासया कवाटविवरेण निरीक्षमाणः सन् जाम्बवान् श्रीकृष्णरूपे रामाकारमिव श्रीमध्वरूपे हनूमदाकारं दृष्ट्वा तदा तेषां वायुत्वं विज्ञाय सूक्तरूपस्य

वायोस्तदवताराणां स्तुतिं प्रणिनाय, तस्यालोके ख्यात्यर्थं (?) श्रीमध्वाचार्य्याणां प्रदर्शयितवा(न्)। वायुस्तुतिपुरश्चरणकारिणां तत्तत्कार्यफलप्रदत्वरूपं वरं प्रार्थयामास। ततः श्रीमध्वाचार्य्याः सर्व्वपण्डितवरेण त्रिविक्रमपण्डिताचार्य्येण शिष्यभावेन प्रदर्शितवायुस्तुतिरूपग्रन्थं दृष्ट्वा प्रसन्नाः सन्तः एकैकश्लोकाभीष्टप्रदत्वरूपं वरं दत्त्वा विष्णुस्तुतिं विना केवलमात्मस्तुतिमसहमानाः सर्व्वानिष्टनिवर्तकश्रीनृसिंहनखस्तुतिप्रतिपादकं श्लोकद्वयं ददुरिति तत्राय-माद्यः श्लोकः 'पान्त्वस्मानि'ति। हे प्रततप्रकर्षेण देशतः कालतः गुणतो व्याप्त।

देशतः कालतश्चैव गुणतश्च त्रिधा ततिः।
आनमन्ताद्धरेरेव नोह्यन्मे पूर्णसद्गुणाः॥ इत्युक्तेः।

Beginning of the Narasiṁhanakhastrotra:

श्रीकृष्णाय नमः।

पान्त्वस्मान् पुरुहूतवैरिबलवन्मातङ्गमाधनूघटा-
कुम्भोद्भाद्विविपाटनाधिकपटुप्रत्येकवज्रायिताः।
श्रीमत्कण्ठीरवास्यप्रततसुनखरादारितारातिदूर-
प्रध्वस्तध्वान्तशोभप्रविततमनसा भाविता नाकिवृन्दैः॥ १॥
लक्ष्मीकान्तमसन्ततो विकलयन् नैवेशतुस्ते समं
पश्याम्युत्तमवस्तुदूरतरतोऽपास्तं रसो योऽष्टमः।

Half of this śloka is omitted.

The commentary Narasiṁhanakhapañcikā ends by the leaf 5A:

नरसिंहनखस्तोत्रगूढभावार्थवर्णनात्।
लक्ष्मीनृसिंहः प्रीयतामस्मदाचार्य्यहृद्गतः॥
छलारिनरसिंहार्य्यशिष्यस्य कृतिमुत्तमां।
विदांकुर्व्वन्तु विद्वांसः किमन्यैः कितवैरिह॥

Colophon:

इति श्रीमद्विद्वच्चूडामणिश्रीमच्छलारिनरसिंहाचार्य्याणां शिष्येण विरचिता मन्दबोधनीनामिका नरसिंहनखस्तोत्रपञ्जिका समाप्ता।

Beginning of the commentary on Vāyustuti:

लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान् ।
गुरून् मूलादिपरमान् वन्दे विद्यागुरूंश्च मे ॥
छलारिनरसिंहार्य्यशिष्यः शेषाभिधो बुधः ।
श्रीमद्वायुस्तुतेष्टीका क्रियते मन्दबोधनी ॥

अथ सकलकविकुलतिलकश्रीमदाचार्य्यपूर्णानुग्रहपात्रपरमास्तिकशिरोमणि त्रिविक्रमपण्डिताचार्य्यो विशिष्टवस्तुसंकीर्त्तनरूपं मङ्गलं कुर्व्वन्नेव साधूनुद्दिधीर्षुर्मूलरूपस्य वायोस्तदवताराणाञ्च स्तुतिं विधत्ते—श्रीमद्विष्णवङ्घ्रिनिष्ठेत्यादिना । तत्रादौ तावत् श्रीमदाचार्यपादपांशुन् प्रार्थयते—श्रीमद्विष्णवङ्घ्रिनिष्ठेति श्लोकद्वयेन ।

Beginning of Vāyustuti—

श्रीमद्विष्णवङ्घ्रिनिष्ठातिगुणगुरुतमः श्रीमदानन्दतीर्थ-
त्रैलोक्याचार्य्यपादोज्ज्वलजलजलसत्पांशवोऽस्मान् पुनन्तु ।
वाचा यत्र प्रणेतृत्रिभुवनसहिता शारदाशारदेन्दु-
ज्योत्स्ना भद्रस्मितश्रीधवलितककुभा प्रेमभारं ततार ॥ ३ ॥

End of Vāyustuti—

सुब्रह्मण्याख्यसुरैः स्तुत इति सुभृशं केशवानन्दतीर्थ-
श्रीमत्पादाब्जभक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य ।
तत्पादार्च्चोदरेण प्रथितपदलसन्मालया त्वेतया ये
संराध्यामून्नमन्ति प्रथितमतिगुणा मुक्तिमेते व्रजन्ति ॥ ४३ ॥

End of the commentary Mandabodhanī:

मुक्तिं स्वरूपानन्दाविर्भावरूपं मोक्षं व्रजन्ति प्राप्नुवन्ति इत्यतो लट् परस्मैपदं । व्रजति व्रजतः व्रजन्तीति रूपाणि । इत्यशेषमतिमंगलं ॥ ४३ ॥

Colophon of this commentary:

इति श्रीमच्छलारिनृसिंहाचार्य्याणां निजशिष्येण विरचिता मन्दबोधनीनामिका वायुस्तुतिटीका समाप्ता ।

Post-colophon:

सं १८८७ माः पौष वदि ५ ग्रन्थसंख्या १०५०।

8685

1336. प्रमाणपद्धति *Pramāṇapaddhati.*

By Jayatīrtha.

Substance, country-made paper. 9½×4 inches. Folia, 51. Lines, 8 on a page. Extent in ślokas, 800. Character, Nāgara. Appearance, fresh. Prose. Generally correct. Complete.

Printed, ed. Bombay.

For the end of the work, see L. 139.
Burnell, p. 107B, calls this a Mādhva work.

It begins thus:

प्रणम्य चरणाम्भोजयुगलं कमलापतेः।
प्रमाणपद्धतिं कुर्व्वे बालानां बोधसिद्धये॥

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितं तथापि गम्भीरया वाचा विक्षिप्य वर्णितं न मन्दैः सुखेन शक्यते बोद्धुमिति तदर्थं प्रकरणमिदमारच्यते। यो धर्म्मो लक्ष्ये व्याप्त्या वर्त्तते न वर्त्तते चान्यत्र स लक्षणमित्युच्यते यथा गोः सास्नादिमत्त्वं, तद्धि गोषु सर्व्वत्रास्ति नास्ति चागोषु। अन्यथा नूनं त्वलक्षणं, तत्त्रिविधं असम्भव्यव्यापकमतिव्यापकञ्चेति।

The writer believes in three pramāṇas: Perception, Inference and Authority, L. 9B, 65:

त्रिविधमनु(?)प्रमाणं प्रत्यक्षमनुमानमागमश्चेति।

8686

1841. प्रमाणपद्धतिटीका *Pramāṇapaddhatiṭīkā,*

Substance, country-made paper. Folia, 50. Lines, 8 on a page. Extent in ślokas, 750. Character, Nāgara. Appearance, fresh. Prose. Incorrect, Incomplete.

This is an anonymous commentary on 1336.

इह खलु सुखं मे स्यात् दुःखमनागपि मा भूदिति निखिलापेक्षितस्य मोक्षस्येश्वरसाक्षात्कारमन्तरेणानुदयात् तस्य च वैराग्यादिद्वारा नित्यानित्य-वस्तुनिश्चयसाध्यत्वात् विदिना(?)मेव तद्धेतुत्वोपपत्तेः सस्वरूपं यथा च (?) ह्रापयितुकामो जयतीर्थश्रीचरणः प्रारिप्सितपरिसमाप्त्यादि-प्रयोजनशिष्टाचारप्राप्तेष्टदेवतानतिपूर्व्वकं प्रश्नोतृशेमुषीमनुकूलयिष्यन् चिकीर्षितं प्रतिजानीते—प्रणम्येति।

The work comes to the end of the chapter on प्रत्यक्ष।

It begins:

प्रमाणजोनेवबुध्य यस्य(?)
सारं पदमनुभवाम्बुजजं ते। (?)
जना निजानन्दपदेच्छवोलं
न वासवी(?) सन्तमहं प्रपद्ये ॥

The author's name is given in the 2nd verse as वेदेश।

श्रीमध्वं जयतीर्थराजमपि च श्रीराघवास्याम्बुजा-
सक्तान्तःकरणान् रघूत्तमयतीनानम्य विद्यागुरून्।
वेदव्यासयतेश्च पद्धतिगताभिप्राय-संवर्णनं
वेदेशस्तनुतेऽल्पमतिर्गुरुकृपामालम्ब्य धीशुद्धये ॥

See also Rice 176, No. 1618.

8687

1093. न्यायसिद्धान्तभञ्जन *Nyāyasiddhāntabhañjana.*

By Anandajoya Dasa, perhaps a disciple of Anandatirtha.

Substance, country-made paper. 10½×5 inches. Folia, 6. Lines, 16 on a page. Extent in ślokas, 240. Character, Nāgara. Appearance, old. Prose. Generally correct. Complete.

A polemic work of Mādhva school directed against Nyāya system of philosophy.

It begins:

श्रीगणेशाय नमः ।

रामं सलक्ष्मणं नत्वा सामान्येन विशेषतः ।
पदार्थानां परोक्तानि लक्षणानीह खण्डये ॥

ननु खण्डय इत्युक्तमयुक्तम् । तदीयस्य प्रमितिविषयत्वस्याभिधेयत्वस्य वा पदार्थसामान्यलक्षणस्याव्याप्त्यादिदोषशून्यत्वेन खण्डयितुमशक्यत्वादिति चेत् । न । अत्यन्तासति प्रमितिविषयत्वादेर्लक्षणस्य सत्त्वेनातिव्याप्तेर्वज्रलेपायितत्वात् । न । सत्यम्, नासति अत्यन्तासदिति पदजन्यप्रमितिविषयत्वं वा अत्यन्तासदिति पदाभिधेयत्वं वा नास्तीति वक्तुं शक्यं अनुभवविरोधात् । अन्यथा घटादीनामपि पटादिपदजन्यप्रमितिविषयत्व घभावप्रसङ्गात् ।

It ends:

यथा सर्वेषां सान्तादिमत्त्वाना+ + + +
आनन्दजयदासेन न्यायसिद्धान्तभञ्जनम् ।
श्रीमदानन्दतीर्थाय....
श्रीरामचन्द्रः प्रसन्नोऽलं भूयान् नत्यानया मम ॥

Colophon:

इति श्रीआनन्दजयदासेन विरचितं न्यायसिद्धान्तभञ्जनं समाप्तं ।

8688

9039. वेदप्रकाशः *Vedaprakāśa*

By Satyānandatīrtha.

Substance, country-made paper. 11½ × 6 inches. Folia, 16. Lines, 18 on a page. Extent in ślokas, 1,400. Character, Nāgara. Appearance, fresh. Complete.

64

The first three prakaraṇas: (1) सर्व्वशास्त्रार्थसंग्रह, (2) विधिभेदनिरूपण and (3) भावनाप्रकाश in 16 leaves.

It begins thus:

ॐ मङ्गलमूर्त्तये नमः। श्रीवागीश्वर्यै नमः। श्रीरामचन्द्राय नमः। श्रीविश्वेश्वराय नमः। श्रीभानवे नमः। श्रीजैमिनये नमः। श्रीशङ्कराचार्याय नमः। श्रीगुरुभ्यो नमः। श्रीसर्व्ववेदान्तप्रवर्त्तकेभ्यो नमः।

सत्यज्ञानानन्दतीर्थं प्राप्तोहं यत्प्रसादतः।

तं गुरुं सच्चिदानन्दं वन्दे वेदं विधिं विभुं॥

वेदस्यैव सर्व्वार्थप्रकाशकत्वेन सर्वपुरुषार्थ-सम्पादकत्वात् etc.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानन्दतीर्थपादकिङ्कर-श्रीसत्यानन्दतीर्थयतिना विरचिते वेदप्रकाशे भावनाप्रकाशाख्यं तृतीयं प्रकरणं समाप्तं।

Not found in Aufrecht.

[It is a general work on Vedānta and not of any particular school.]

8689

9251. शतदूषणी *Śatadūṣaṇī.*

By Śrīnivāsa Dāsa.

Substance, country-made paper. 12½ × 4½ inches. Folia, 18. Lines, 7 on a page. Extent in ślokas, 260. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

This work refutes the Māyāvāda from the point of view of the Mādhva school.

See H PR. 2, 204.

Printed, ed. Conjeeveram; in part, Calcutta.

8690

10555. तत्त्वमुक्तावली, मायावादशतदूषणी

Tattvamuktāvalī, Māyāvādaśatadūṣaṇī.

By Gauḍa Pūrṇānanda Cakravartin.

Substance, country-made paper. 10×5 inches. Folia, 12. Lines, 8 on a page. Extent in ślokas, 225. Character, modern Nāgara. Appearance, fresh.

Colophon:

इति श्रीगोड़पूर्णानन्दचक्रवर्त्तिविरचिता तत्त्वमुक्तावली मायावाद-शतदूषणी समाप्ता।

The work is by a Paurāṇika, who believes in the difference of the human soul and the Supreme Being. He advances one hundred arguments against Māyāvāda of Śaṅkara.

It begins (Maṅgalācaraṇa):

अनुगतजनपालः क्रूरभूपालकालः
तरुणतरतमालः श्यामलानन्दबालः।
खरकिरणविशालः प्रेमवल्लीप्रवालः
स जयति धृतमालः पुण्ड्रकोद्भासिभालः।

The object of the work:

पौराणिकोऽयं स्वमतानुसारी
प्रातः पुराणं पठति प्रकामम्।
शृणोति भक्तः प्रणिधानपूर्व्वं
ग्रन्थार्थतात्पर्य्यं निविष्टचेताः॥

जीवात्मनोरैक्यमतं विहाय
भेदं तयोः स्थापयति स्म भूम्ना।

श्रुतिस्मृतिं तत्र बहुप्रमाणं
कृत्वानुमानं बहुधा तनोति ॥

जीवोऽयं ब्रह्मणो भिन्नः
परिच्छिन्नो यतः सदा ।

इत्यादिबहवो ज्ञेया
अनुमानेषु हेतवः ॥

There are 121 verses altogether.

It ends:

पूर्णानन्दकवेः कृतिः भगवतो जीवस्य भेदाश्रिता
तत्त्वातत्त्वविवेकवाक्यसुभगा श्रीविष्णुभक्तेर्मता ।

साध्वी मुग्धपदप्रबन्धमधुरा तत् पठ्यतां श्रूयतां
भो भो भागवतोत्तमा मनसि चेत् भक्तिर्भवेत् वाञ्छिता ॥

नानालङ्कारयुक्ता मृदुमधुरपदन्याससंवर्द्धितश्रीः
पीयूषप्रख्यवाक्यप्रकरसुललिता चारुसर्वोज्ज्वलाङ्गी ।

विज्ञानानन्दैकभूमिं गुणगणसुभगा दोषलेशेन हीना
भक्तानां कण्ठदेशे निवसतु सततं तत्त्वमुक्तावलीयं ॥

This is to be differentiated from the *Śatadūṣaṇī* of *Vedānta-Deśika* of the Rāmānuja School.

8691

1338. माध्वसिद्धान्तसार *Mādhvasiddhāntasāra.*

By Api Narahari.

Substance, country-made paper. 10×4 inches. Folia, 88. Lines, 8 on a page. Extent in ślokas, 480. Character, Nāgara. Appearance, old. Prose. Generally correct. Complete.

Beginning:

अत्र तावत् जीवात्मस्वरूपं सर्व्वं प्रत्यक्षमहमिति तद्विचारः क्रियते। तज्जीवस्वरूपं स्वरूपतो ज्ञानानन्दायाल्पकं दुःखादिदोषहीनं मुक्तिभाक् संसारे तूपाधिवशात् दुःखादिदोषयुक्तं प्रत्यक्षेण प्रतीयते। अत्र प्रमाणं विज्ञानघन एतेभ्यो भूतेभ्यः समुत्थायेति।

बलमानन्द ओजश्च महो ज्ञानमनाकुलं।
स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्धेतोः॥ (इत्यादि)

यथात्मनोहं भूयासमेवेति निरुपाधिक-
परमप्रेमास्पदत्वेनानन्दरूपत्वं प्रत्यक्षसिद्धं
तथाहं दुःखीति दुःखं प्रत्यक्षसिद्धं। इत्यादि।

Leaf 28A, तस्य सर्व्वस्य नित्यत्वमिति प्रमाणाबाधितं सर्वमनुमातव्यं न प्रमाणबाधितं किञ्चित् इत्यशेषमन्त्रसंक्षेपेण बुद्धयारोहाय उक्तं विस्तरस्तु श्रीमध्वाचार्य्यकृतग्रन्थेषु द्रष्टव्य इति सर्वमवदातं।

It ends thus:

शेषाद्रिस्थहरे सुखादिगुणयुक् स्वामिन्नधद्यार्च्युत।
सर्वोत्कृष्टसुरारिजीवनहरे क्षीराब्धिकन्याप्रिय।

आपीवंशसमुद्भवस्य नृहरेर्मे मध्वशास्त्रे स्थितिं
सूक्तिज्ञप्तिविरक्तिपूर्वकगुणान् देहि प्रभो मुक्तये॥

Colophon:

इति श्रीआपीनंरहरिकृत-श्रीमध्वसिद्धान्तसारः समाप्तः॥

Post-colophon:

श्रीकृष्णार्पणमस्तु। श्रीगुरुभ्यो नमः। हयग्रीवाय नमः।

हरेत्युपपदोपेत-पाषाणग्रामवासिना।
[illegible] लिखितं प्रीत्यै माधवमध्वयोः॥

8692

1340. सत्तत्त्वरत्नमाला *Sattattvaratnamālā.*

Substance, country-made paper. 12 × 4½ inches. Folia, 84. In Tripāṭha form. Character, Nāgara. Appearance, fresh. Text in verse, commentary in prose. Generally correct. Complete.

Printed, ed. Bombay.

Both the text and the commentary are anonymous.

The text treats of some of the principles of the Mādhva school. After the *Maṅgalācaraṇa* the author says:

श्रीमध्वदेवकृतशास्त्रपयोधिगेषु ।
सत्तत्त्वरत्ननिकरेषु कियन्ति बुद्धौ ॥
संस्थापितानि गुरुभिर्मम तानि मालां ।
वाक्सूत्रकेन हरयेर्पयितुं करोमि ॥

From the purport of this verse this has been named as सत्तत्त्वरत्नमाला. Rice in p. 184 speaks of a book named सत्तत्त्वरत्नमाला but gives no description. Burnell in p. 110A. speaks of a commentary on it but without description. Rice attributes it to Tāmraparṇyācārya.

Substance, country-made paper. 9¼×4 inches. Folia, 12. In Tripāṭha form. Character, Nāgara of the 18th century. Appearance, old and discoloured. Incomplete at the end.

The Text is already noticed.

The commentary begins :—

श्रीगोपीजनवल्लभो जयति ।

श्रीमदाचार्य्यचरणनखचन्द्ररुचे नमः ।

हृदि प्रविश्य यद् ध्वान्तं निधुनोति सदा मम ।
यत्कृपातो विवेकादिधर्म्माः स्वीया भवन्ति हि ।
तस्य तत्पादसम्बन्धिरेणुः शरणमस्ति मे ॥
अथ भक्तिमार्गाङ्गीकारे भगवतो दासत्वं प्राप्स्यसे etc., etc.

The commentary ends abruptly in the comment on the 15th śloka.

8770

8454. कृष्णाश्रय *Kṛṣṇāśraya.*

(With a Hindi commentary विवरण *Vivaraṇa.*

Substance, country-made paper. 10×4¾ inches. Folia 36. Lines, 9 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

The text consists of 11 devotional verses.

सर्व्वमार्गेषु नष्टेषु कलौ च खलधर्म्मणि ।
पाषण्डप्रचुरे लोके कृष्ण एव गतिर्मम ॥ १ ॥

म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च ।
सत्यपीडाविघ्नलोकेषु कृष्ण एव गतिर्मम ॥ २ ॥

गंगादितीर्थवर्येषु दुष्टैरेवावृतेष्विह ।
तिरोहितार्थदेवेषु कृष्ण एव गतिर्मम ॥ ३ ॥

अहंकारविमूढेषु सत्येषु पापवर्त्मसु ।
लाभपूजार्थयत्नेषु कृष्ण एव गतिर्मम ॥ ४ ॥

अपरिज्ञाननष्टेषु मन्त्रेष्वव्रतयोगिषु ।
तिरोहितार्थदेवेषु कृष्ण एव गतिर्मम ॥ ५ ॥

नानावादविनष्टेषु सर्व्वकर्म्मव्रतादिषु ।
पाषण्डैकप्रयत्नेषु कृष्ण एव गतिर्मम ॥ ६ ॥

अजामिलादिदोषाणां नाशको न भवे स्थितः ।
ज्ञापिताखिलमाहात्म्यः कृष्ण एव गतिर्मम ॥ ७ ॥

प्राकृताः सकला देवा गणितानन्दकं बृहत् ।
पूर्णानन्दो हरिस्तस्मात् कृष्ण एव गतिर्मम ॥ ८ ॥

विवेकधैर्य्यभक्त्यादिरहितस्य विशेषतः ।
पापासक्तस्य दीनस्य कृष्ण एव गतिर्मम ॥ ९ ॥

सर्व्वसामर्थ्यसहितः सर्व्वत्रैवाखिलार्थकृत् ।
शरणस्थसमुद्धारं कृष्णं विज्ञापयाम्यहं ॥ १० ॥

कृष्णाश्रयमिदं स्तोत्रं यः पठेत् कृष्णसन्निधौ ।
तस्याश्रयो भवेत् कृष्ण इति श्रीवल्लभोऽब्रवीत् ॥ ११ ॥

Col. :—

इति श्रीवल्लभाचार्य्यजीविरचितं श्रीकृष्णाश्रयविवरणं सटीकं संपूर्णं ॥—

Post-Col. :—

यादृशमित्यादि । काशीमध्ये व्रजभूषणदासेन लिखितं । श्री शुभं । मो० पौषशुक्लपूर्णिमा संम[व]त् १९३५, विजयपठनार्थं ॥

8771

1345. तारतम्यस्तोत्रव्याख्या

Tāratamyastotravyākhyā.

By Vallabha

Substance, country-made paper. 9½×4 inches. Folia, 16. Lines, 10 on a page. Extent in ślokas, 480. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

It is a commentary on *Tāratamyastora.*

For a different commentary see I.E. 28 of the Society's collection. The text, *Tāratamyastotra,* is given there in L. 11.

It begins:—

श्रीवेदव्यासाय नमः। श्रीगुरुभ्यो नमः। निर्विघ्नमस्तु। विष्णुरिति। अत्र विष्णुः प्रकृतिः। विधिप्राणनाथाद्यित्यादिरूपेण अस्मिन् श्लोके दशसु कक्षासु उक्ता देवा अस्मान् पान्तु इत्यन्वयः। तेषां च तारतम्यज्ञापनाय अथाधिकारप्रयोग इति ज्ञेयम्। विष्णुः सर्व्वेभ्यो देवऋष्यादिभ्य सर्व्वैगुणैश्च उत्तम इति विष्णुः सर्व्वोत्तम इत्यर्थः। इति प्रथम कक्षा। अथ प्रकृतिरिति—यद्यपि प्रकृते चिनंतनत्वमात्रमत्रोक्तं तथापि ततोनंतांशहीना चेति बृहद्भाष्यानुसारात् अनन्तगुणन्यूनत्वमिति द्रष्टव्यम्। इति द्वितीया कक्षा। अथ विधिप्राणनाथाद्यिति अत्र लक्ष्यमपेक्षया कोटिगुणन्यूनत्वं ब्रह्मवाद्वोरनुसन्धेयम्। एतेभ्यः श्रीस्तु युक्तेभ्यो गुणैः कोटिगुणोत्तरेति बृहद्भाष्यात्। इति तृतीया कक्षा।

Colophon:—

इति तारतम्यस्तोत्रव्याख्यानं समाप्तम्॥

Post-Col.:—

खोल्ललेश्वरकृष्णेन लिखितम्। श्रीगोपालकृष्णार्पणमस्तु।

After this in a separate and modern hand—

नारायणेन विदुषा बिन्दुमाधवसंनिधौ।
सम्पादितमिदं कृच्छ्रात् प्रीतये तीर्थकृत्पतेः॥

8772

1378. भक्तिसिद्धान्तरहस्य (विवृतिटीकासहित)

Bhaktisiddhāntarahasya
(With *Vivṛti* commentary).

Substance, country-made paper. 12½×5 inches. Folia, 6. Lines, 11 to 14 on a page. Extent in ślokas, 270. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct. Complete.

The Text is by Vallabha and commentary by Gokulanātha.

The same as No. 1311.

8773

1606. भक्तिसिद्धान्तरहस्यविवृति

Bhaktisiddhāntarahasyavivṛti.

A sub-commentary by Pādapadmācārya on a commentary entitled *Rahasya* by Gokulanātha on *Bhaktisiddhānta* by Vallabha.

Substance, country-made paper. 11×5 inches. Folia, 8. Lines, 11 on a page. Extent in ślokas, 250. Character, Nāgara. Date, Śaka 1659. Appearance, tolerable. Complete.

Post-colophon :—

यादृशं पुस्तकम् etc.

संवत् १७१८ वर्षे शाके १६५९ प्रवर्त्तमाने ज्यैष्ठमासकृष्णपक्षदशम्यां रविवासरे।

Authorship—leaf 8A.

भक्तिसिद्धान्तवाक्यानां श्रुतानां भगवन्मुखात्।
स्वाचार्य्यैः पद्यबद्धानां जीवानां बोधसिद्धये।
व्याख्या कृता मयाचार्य्यपादपद्माभिधेन या।
तयाचार्य्याः प्रसीदन्तु मयि निःसाधने स्वतः।

Colophon :—

इति श्रीगोकुलनाथविरचिता भक्तिसिद्धान्तरहस्यविवृतिः समाप्ता।

Beginning :—

प्रणम्य पितृपादाब्जपरागमनुरागतः ।
कृपया विशदीकुर्म्म इहास्तमुक्तावलीम् (?) ॥
स्वसिद्धान्तेति । अग्रे वक्ष्यमाणैर्बहुभिः
मिथःविरुद्धैः सिद्धान्तैः शास्त्रार्थसन्देहे
तन्निरासाय स्वसिद्धान्तरूपं शास्त्रार्थं
निश्चयत् वक्ष्यामीत्यर्थः । तमेवाहुः—
कृष्णसेवेति । फलात्मकनामोक्त्याः स्वतः पुरुषार्थत्वेन
सेवाकृतिः स्वसिद्धान्तो न तु अन्यशेषत्वेन
इति ज्ञाप्यते । सेवा हि सेवकधर्म्मः तदुक्त्या जीवानां
अशेषाणां सद्यजदासत्वं ज्ञपितम् ... ...
सदेति.....तथेदमित्यादिकम् ।

From the examination of the MS. it appears that there were 17 verses entitled *Bhaktisiddhānta*. The first verse is—

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयम् ।
कृष्णसेवा परा कार्य्या मानसी सा परात्मज ॥ १ ॥

and the last verse—

न ग्राह्यमिति वाक्यं हि भिन्नमार्गपरं मतं ।
सेवकानां यथा लोके व्यवहारः प्रसिद्धयति ॥

One this short verified treatise there was a short commentary on which the present MS. is a commentary on the second remove. The text appears to be by Vallabhācārya, the commentary by Gokulanātha and the sub-commentary by Pādapadmācārya.

8774

9715. भक्तिविवर्द्धिनीविवृति

Bhaktivivardhinīvivṛti.

Substance, country-made paper. 12×5½ inches. Folia, 10. Lines, 9 on a page. Extent in ślokas, 285. Character, Nāgara. Date, (?). Appearance, tolerable. Prose. Generally correct. Complete.

A commentary on Vallabhācārya's *Bhaktivardhinī*, by his disciple, whose name is not given.

Beginning :—

श्रीगोपीजनवल्लभाय । श्रीगोकुलेशो जयति ।
नत्वा स्वाचार्य्यपादाब्जं कृपामधुपपूरितं
तत्परागारक्तबुद्धया व्याख्यास्ये भक्तिवर्द्धिनीं । १ ।
तद्बुद्धिदृढ़तासिद्धैय पितृपादरजांस्यहं
हृद्याधाय प्रवृत्तोऽस्मि नान्यथेति हि निश्चितं । २ ।
अथाचार्य्यचरणाः स्वमार्गाङ्गीकृतानां स्वमार्गीय-
भक्तिवृद्धिप्रकारमजानतां कृपया तज्ज्ञापनाय
तद्बृद्धिप्रकारं प्रतिजानीते—यथेति ।

End :—

यद्यपीश्वरवाक्यानि दुर्बोधानि सदात्वतः
तत्कृपातो यथाबोधं विवृतानि च तान्यथ । ३ ।
बुद्धिदोषेण यद्यत्र व्याहृतौ चेद्विपर्य्ययः
क्षमन्त्वाचार्य्यचरणाः स्वकीयेषु दयालवः । ४ ।

Colophon :—

इति श्रीपितृचरणैकतानश्रीश्रीवल्लभविरचिता भक्तिवर्द्धिनी-विवृतिः सम्पूर्णा ।

8775

1384B. भक्तिवर्द्धिनीविवृति

Substance, country-made paper. 12¼×5 inches. Folia, 6. Lines, 14 on a page. Tripāṭha form. Character, Nāgara. Date, Saṁvat 1867. Appearance, tolerable. The text in verse and the commentary in prose. Generally correct. Complete.

The Text is by Vallabhācārya and the commentary by Svācāryacaraṇa. The Text consists of 11 verses. They are :—

यथा भक्तिः प्रवृद्धा स्यात्तथोपायो निरूप्यते ।
बीजभावे दृढ़े तु स्यात्त्यागाच्छ्रवणकीर्त्तनात् ॥ १ ॥

बीजदार्ढ्यप्रकारस्तु गृहे स्थित्वा स्वधर्म्मतः ।
अव्यावृत्तो भजेत् कृष्णं प्रज्ञया श्रवणादिभिः ॥ २ ॥
व्यावृत्तोऽपि हरौ चित्तं श्रवणादौ यतेत् सदा ।
ततः प्रेम तथासक्तिर्व्यसनं च यदा भवेत् ॥ ३ ॥
बीजं तदुच्यते शास्त्रं दृढ़ं यन्नापि नश्यति ।
स्नेहाद्रागविनाशः स्यादासक्त्या स्याद् गृहे रुचिः ॥ ४ ॥
गृहस्थानां बाधकत्वमनात्मत्वं च भासते ।
तदा स्याद्व्यसनं कृष्णे कृतार्था स्यात्तथैव हि ॥ ५ ॥
तादृशस्यापि सततं गृहस्थानं विनाशकम् ।
त्यागं कृत्वा यतेद्वस्तु तदार्थार्थैकमानसः ॥ ६ ॥
लभते सुदृढ़ां भक्तिं सर्व्वतोऽप्यधिकां पराम् ।
त्यागे बाधकमायुष्टुं दुःसंसर्गात्तथाऽऽततः ॥ ७ ॥
अतः स्थेयं हरिस्थाने तदीयैः सह तत्परैः ।
अदूरे विप्रकर्षे वा यथा चित्तं न दूष्यति ॥ ८ ॥
सेवायां वा कथायां वा यस्य भक्तिर्दृढ़ा भवेत् ।
यावज्जीवं तस्य (ना ?)शो न स्थायीति मतिर्मम ॥ ९ ॥
बाधसम्भावनायां तु नैकान्ते वास इष्यते ।
हरिस्तु सर्व्वतो रक्षां करिष्यति न संशयः ॥ १० ॥
इत्येवं भगवच्छास्त्रं गूढ़तत्त्वं निरूपितम् ।
य एतत् समधीयीत तस्यापि स्याद्दृढ़ा रतिः ॥ ११ ॥

The Maṅgalācaraṇa of the commentry :—

नत्वा स्वाचार्य्यपादाब्जकृपामधुसुपूरितम् ।
तस्य रागारक्तबुद्धया व्याख्यास्ये भक्तिवर्द्धिनीम् ॥

The author and the object of the commentary, Leaf 5B.

पितृपादनखालोकप्रकाशितधिया मया ।
स्वाचार्य्यचरणाख्येन विवृता भक्तिवर्द्धिनी ॥
कृपया पितृपादाब्जैर्दत्ता मे यादृशी मतिः ।
तन्मत्या विवृतं भक्तिवृद्धिशास्त्रं सुदुर्ल्लभम् ॥

यद्यपीश्वरवाक्यानि दुर्बोधानि सदा स्वतः ।
तत्कृपया यथाबोधं विवृतानि न चान्यथा ॥
बुद्धिदोषेण यद्यत्र व्याकृतौ चेद्विपर्य्ययः ।
क्षमन्त्वाचार्य्यचरणाः स्वकीयेषु दयालवः ॥

Colophon :—

इति श्रीपितृचरणैकतानश्रीश्रीवल्लभविरचिता भक्तिवर्द्धिनीविवृतिः सम्पूर्णा ।

Post-Colophon :—

श्रीवल्लभरचिताया विवृतेर्भक्तिवर्द्धिन्याः । चित्रं समस्तलोके संजाता भक्तिवर्द्धिनी सापि ॥

संवत् १८६७ फाल्गुनवदी मङ्गरः । वुलाकेनारेके पच्छीउः घनारस । श्रीभैँरोनाथजी सहाये । लीः । रामशरणकायस्थेन मिश्रजयेषाराम-पठनार्थं वात(न?)रसीमध्ये ।

8776

1376. सर्वोत्तमस्तोत्र (सटीक) *Sarvottamastotra,*

(With commentary).

Substance, country-made paper. $12\frac{1}{2} \times 5$ inches. Folia, 12. Lines, 17, 18 on a page. In the Tripāṭha form. Character, Nāgara. Date, Saṁvat 1867. Appearance, tolerable. Prose and verse. Generally correct. Complete.

The commentary is by *Viṭṭhala* and has been described in No. 1308.

Post-Colophon statement :—

आचार्य्यमानसशताष्टकमौक्तिकानि
श्रीविट्ठलोक्तिरससागरनिर्गतानि ।
श्रीवल्लभोक्तविवृतेर्गुणगुम्फितानि
कुर्व्वन्तु कण्ठभुवि भक्तजना जपार्थं ॥

श्रीरस्तु संवत् १८६७ मीती सुदी ६ लिः लालारामशरणसिंघजी जैतपुरा वावुकी वजारके उत्तर वागेश्वरीपर ।

The text consists of 35 verses with the following colophon :—

इति श्रीमदग्निकुमारप्रोक्तं सर्व्वोत्तमस्तोत्रं सम्पूर्णम् ।

Vallabhācārya, the founder of the Vallabha sect, was an incarnation of Agni, and so his son Viṭṭhala is described as Agnikumāra.

The Text :—

प्राकृतधर्म्मनाश्रयमप्राकृतनिखिलधर्म्मरूपमिति ।
निगमप्रतिपाद्यं यत्तत् शुद्धं साकृति स्तौमि ॥ १ ॥
कलिकालतमश्छन्नदृष्टित्वाद्विदुषामपि ।
संप्रत्यविषयस्तस्य माहात्म्यमभवद्भुवि ॥ २ ॥
दयया निजमाहात्म्यं करिष्यन् प्रकटं हरिः ।
वाण्या यदा तदा स्वाद्यं प्रादुर्भूतं चकार हि ॥ ३ ॥
ऋषिरग्निकुमारस्तु नाम्नां छन्दो जगत्यसौ ॥ ४ ॥
श्रीकृष्णास्यं देवता च बीजं कारुणिकः प्रभुः ॥ ५ ॥
तदुक्तमपि दुर्बोधं सुबोधं स्याद्यथा तथा ।
नाम्नामष्टोत्तरशतं प्रवक्ष्याम्यखिलात्महृत् ॥ ४ ॥
विनियोगो भक्तियोगः प्रतिबन्धविनाशने ।
कृष्णाधरामृतास्वादसिद्धिरत्र न संशयः ॥ ६ ॥
आनन्दः परमानन्द श्रीकृष्णास्यं कृपानिधिः ।
देवोद्धारप्रयत्नात्मा स्मृतिमात्रार्त्तिनाशनः ॥ ७ ॥
श्रीभागवतगूढ़ार्थप्रकाशनपरायणः ।
साकारब्रह्मवादैकस्थापको वेदपारगः ॥ ८ ॥
मायावादनिराकर्त्ता सर्व्ववादिनिरासकृत् ।
भक्तिमार्गाब्जमार्त्तण्डः स्त्रीशूद्राद्युद्धृतिक्षमः ॥ ९ ॥
अङ्गीकृत्यैव गोपीशवल्लभीकृतमानवः ।
अङ्गीकृतो समर्य्यादो महाकारुणिको विभुः ॥ १० ॥

अदेयदानदक्षश्च महोदारचरित्रवान् ।
प्राकृतानुकृतिव्याजमोहितासुरमानसः ॥ ११ ॥
वैश्वानरो वल्लभाख्यः सद्रूपो हितकृत् सतां ।
जनशिक्षाकृते कृष्णभक्तिकृन्निखिलेष्टदः ॥ १२ ॥
सर्व्वलक्षणसम्पन्नः श्रीकृष्णज्ञानदो गुरुः ।
स्वानन्दतुन्दिलः पद्मदलायतविलोचनः ॥ १३ ॥
कृपादृक्वृष्टिसंहृष्टदासदासीप्रियः पतिः ।
रोषदृक्पातसंप्लुष्टभक्तिद्विट् भक्तसेवितः ॥ १४ ॥
सुखसेव्यो दुराराध्यो दुर्ल्लभाङ्घ्रिसरोरुहः ।
उग्रप्रतापो वाक्शीधुपूरिताशेषसेवकः ॥ १५ ॥
श्रीभागवतपीयूषसमुद्रमथने क्षमः
तत्सारभूतरासस्त्रीभावपूरितविग्रहः ॥ १६ ॥
सान्निध्यमात्रदत्तश्रीकृष्णप्रेमा विमुक्तिदः ।
रासलीलैकतात्पर्य्यः कृपयैतत्कथाप्रदः ॥ १७ ॥
विरहानुभवैकार्थसर्व्वत्यागोपदेशकः ।
भक्त्याचारोपदेष्टा च कर्ममार्गप्रवर्त्तकः ॥ १८ ॥
यागादौ भक्तिमार्गैकसाधनत्वोपदेशकः ।
पूर्णानन्दः पूर्णकामो वाक्पतिर्विबुधेश्वरः ॥ १९ ॥
कृष्णनामसहस्रस्य वक्ता भक्तपरायणः ।
भक्त्याचारोपदेशार्थनानावाक्यनिरूपकः ॥ २० ॥
स्वार्थे हिताखिलप्राणप्रियस्तादृशचेष्टितः ।
स्वदासार्थकृताशेषसाधनः सर्व्वशक्तिधृक् ॥ २१ ॥
भुवि भक्तिप्रचारैककृतस्वान्वयकृत् पिता ।
स्ववंशे स्थापिताशेषस्वमाहात्म्यस्मयापहः ॥ २२ ॥
पतिव्रता-पतिः पारलौकिकैहिकदानकृत् ।
निगूढ़हृदयोऽनन्यभक्तेषु ज्ञापिताशयः ॥ २३ ॥

उपासनादिमार्गातिमुग्धमोहनिवारकः ।
भक्तिमार्गे सर्व्वमार्गवैलक्षण्यानुभूतिकृत् ॥ २४ ॥

पृथक्शरणमार्गोपदेष्टा श्रीकृष्णहार्द्दवित् ।
प्रतिक्षणनिकुञ्जस्थलोलारससुपूरितः ॥ २५ ॥

तत्कथाक्षिप्तचित्तस्तत्विस्मृतान्यो व्रजप्रियः ।
प्रियव्रजस्थितिः पुष्टिलीलाकर्त्ता रहः प्रियः ॥ २६ ॥

भक्तेच्छापूरकः सर्व्वाज्ञातलीलोऽतिमोहनः ।
सर्व्वासक्तो भक्तमात्रासक्तः पतितपावनः ॥ २७ ॥

स्वयशोगानसंहृष्टहृदयाम्भोजविष्टरः ।
यशःपीयूषलहरीप्लावितान्यरसः परः ॥ २८ ॥

लोलामृतरसार्द्रार्द्रकृताखिलशरीरभृत् ।
गोवर्द्धनस्थित्युत्साहस्तल्लीलाप्रेमपूरितः ॥ २९ ॥

यज्ञभोक्ता यज्ञकर्त्ता चतुर्वर्गविशारदः ।
सत्यप्रतिज्ञस्त्रिगुणातीतो नयविशारदः ॥ ३० ॥

सत्कीर्त्तिवर्द्धनस्तत्त्वसूत्रभाष्यप्रदायकः ।
मायावादाख्यतुलाग्निब्रह्मवादनिरूपकः ॥ ३१ ॥

अप्राकृताखिलाकल्पभूषितः सहजस्मितः ।
त्रिलोकीभूषणं भूम्निभाग्यं सहजसुन्दरः ॥ ३२ ॥

अशेषभक्तसम्प्रार्थ्यचरणाब्जरजोधनः ।
इत्यानन्दनिधेः प्रोक्तं नाम्नामष्टोत्तरं शतम् ॥ ३३ ॥

श्रद्धाधिशुद्धबुद्धिर्यः पठत्यनुदिनं जनः ।
स तदेकमनाः सिद्धिमुक्तां प्राप्नोत्यसंशयः ॥ ३४ ॥

तदप्राप्तौ वृथा मोक्षस्तदाप्तौ तु कृतार्थता ।
अतः सर्व्वोत्तमस्तोत्रं जप्यं कृष्णरसार्थिभिः ॥ ३५ ॥

8777

1308. सर्व्वोत्तमस्तोत्रविवृति *Sarvottamastotravivṛti.*

Substance, countrymade paper. 8×4 inches. Folia, 62. Lines, 7 on a page. Extent in ślokas, 860. Character, Nāgara. Date (?). Appearance, fresh. Prose. Generally correct. Complete.

A copious commentary on *Sarvottamastotra* by Viṭṭhala Dīkṣita.

It begins :—

श्रीगोपीजनवल्लभाय नमः ।

नत्वा पितृपदाम्भोजमैहिकामुष्मिकार्थदम् ।

तत्प्रोक्ताचार्य्यनामानि विवरिष्ये यथामति । १ ।

यद्यप्ययोग्य एवाहं तन्नामविवृतौ स्वतः ।

स्वीयत्वेनैव कृपया योग्यतां मयि दास्यति ॥ २ ॥

. . . . . .

श्रीमत्पितृचरणाः श्रीमदाचार्य्याणामलौकिकनामानि प्रकटयितुमाचार्य्याणां स्वरूपं तत्प्राकट्यहेतुञ्च वक्तुं आचार्यैकप्रकटितभक्तिमार्गप्रतिपाद्यं सर्व्वश्रुतिश्रीभागवतगीताद्यनेकालौकिकप्रमाणसिद्धं पूर्व्वोक्तप्रमेयमूलभूतं साक्षात्पुरुषोत्तमस्वरूपं सर्व्वमूलत्वेन मङ्गलार्थं स्तुवंति—प्राकृतधर्मानाश्रयमिति । . . . . . .

It ends :—

एवं स्तोत्रजपाधिकारिणो निरूप्य स्तोत्रसमप्तिं निरूपयन्ति । इति श्रीमदिति ।

एवमाचार्य्यनामानि विवृतानि यथामति ।
पितृपादाब्जकृपया नानासाधनतो मया ॥ १ ॥
यद्यत्र बुद्धिदोषेण विवृतावन्यथाकृतिः ।
क्षमन्त्वाचार्य्यचरणा मद्भक्तोयमिति स्वतः ॥ २ ॥

Col. :—इति श्रीमत्प्रभुचरणैकतानश्रीवल्लभविरचिता सर्व्वोत्तमस्तोत्रविवृतिः सम्पूर्णा ।

After this a śloka runs thus—

आचार्य्यमानसशताष्टकमौक्तिकानि
श्रीविट्ठलोक्तिरससागरनिर्गतानि।
श्रीवल्लभोक्तविवृतेर्गुणगुम्फितानि
कुर्व्वन्तु कण्ठभुवि भक्तजना जपार्थम्

See IO. Catal No. 2516.

8778

1605. निरोधलक्षण *Nirodhalakṣaṇa.*

By Vallabha Dīkṣita with an anonymous commentary.

Substance, countrymade paper. 10×5 inches. Folia, 9. Lines, 9 on a page. Extent in ślokas, 200. Character, Nāgara. Date (?). Appearance, fresh (mouse-eaten in the lower border).

The work begins:—

श्रीमद्भागवतसुबोधिन्यां अन्येषु च स्वग्रन्थेषु निरोधस्य निगद्यमानत्वात् तमाचक्षाणः तदवश्यम्भावसूचकं मनोरथस्वरूपमाह—

"यच्च दुःखं यशोदायां नन्दादीनाञ्च गोकुले।
गोपिकानाञ्च यद्दुःखं तत् दुःखं स्यात् मम क्वचित् ॥ १ ॥

गोपिकानां तु इत्यन्तेन सर्वोत्कृष्टता श्रेष्ठतमता च सूचितेति ज्ञेयं। स्यादिति प्रार्थनायां लिङ्। क्वचिदिति दुर्ल्लभत्वं। तथा च नदियाविर्भूतो भगवान् मातृचरणादीनां विरहानुभवार्थं माथुरात् (?) गतस्तदा यद्विरहात्मकं दुःखं समजनि तद् भवेदित्यर्थः। विप्रयोगदशायां तादृशरसिकानुभवसाक्षिकान्तरसुखविषयकं मनोरथमाहुः।

"गोकुले गोपिकानान्तु यत् सुखं व्रजवासिनाम्।
यत् सुखं समभूत् तन्मे भगवान् किं विधास्यति ? ॥ २ ॥

. . . . . .

There are altogether 20 verses, which form the text and the rest is the commentary. The definitions of **रोध** and **निरोध** are given in leaf 4B:—

ननु कोऽयं रोधः को वा निरोध इति चेत्, उच्यते । लोकवेदसमाधि-भाषाप्रसिद्धपशुपुत्रादिपुरुषोत्तमसायुज्यान्तयावत्फलेभ्यो निवृत्ती रोधः । रोधपूर्विकान्त्योपाधिकप्रियत्वनिबन्धना भगवन्मात्रोपाधिकप्रियत्वनि-बन्धना भगवत्परता निरोधः । रोधे भजनानन्दातिरिक्तयावत्फलनिरपेक्षता, निरोधे तु स्वात्मनोपि निरपेक्षता ।

The end of the text :—

नातः परतरो मन्त्रो नातः परतरम्भवः ।
नातः परतरा विद्या तीर्थं नातः परात् परम् ।

Colophon of the text :—

इति श्रीवल्लभदीक्षितविरचितं निरोधलक्षणं सम्पूर्णं ॥ २ ॥

Commentary :—

मन्त्रो मननीयः नितरां गोपनीयश्च । स्तवो भगवत्प्रसादहेतुः । विद्या काम्यमानयावदर्थसाधनं । तीर्थं प्रतिबन्धकीभूतदुरितनिचयनिरसन-पूर्व्वकं तत्प्राप्तिसम्पादकभागधेयोद्बोधकमित्यर्थः ।

Colophon of the commentary :—

इति निरोधलक्षणविवृतिः ।

See I.O. No. 1018.

8779

10292. पत्रावलम्बन *Patrāvalambana.*

By Vallabha Dīkṣita.

Substance, countrymade paper. 11½×4¾ inches. Folia, 5. Lines, 9 on a page. Extent in ślokas, 135. Character, modern Nāgara. Appearance, fresh. Complete.

Beginning :—[अथ पत्रावलम्बनमूलं लिख्यते—

श्रीवल्लभो जयति जयति । श्री ॥ In a later hand].

लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः ।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा ॥ १ ॥
लोके शब्दार्थसंबासे(दे ?) रूपं तेषां च यादृशं ।
न विवादस्तत्र कार्य्यो लोकस्थितिस्तथा भवेत् ॥

It shows the Vedas to have Brahma for their only subject and at the same time refutes the Māyāvāda. There are given also explanations for difficult passages.

End :—श्रीकृष्ण [स्य] प्रसादेन मायावादो निराकृतः ।
अवैदिको महादेवस्तत्र साक्षी न संशयः ॥
ये वैदिका महात्मानस्तेषां चानुमतिस्तथा ।
अवेदविन्न मनुते मया चोपेक्षितः (?) ॥
स्थापितो ब्रह्मवादो हि सर्व्ववेदान्तगोचरः ।
काशीपतिस्त्रिलोकेशो महादेवस्तु तुष्यतु ॥
कस्यचित्स्वथ संदेहः स मां पृच्छतु सर्व्वथा ।
न भयं तेन कर्त्तव्यं ब्राह्मणानामियं गतिः ॥
डिंडिस्तु वादिनो द्वारि विश्वेशस्य मयापि हि ।
विद्वद्भिः सर्व्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ॥

The col. is in a later hand :—
इति श्रीवल्लभदीक्षितविरचितानां पत्रावलम्बनमिदं ॥ श्रीहरिः ।

8781

8505. पत्रावलम्बन *Patrāvalambana.*

By Vallabha Dīkṣita.

Substance, country-made paper. 10×5 inches. Folia, 2. Lines, 18 on a page. Character, Nāgara of the 18th century. Appearance, discoloured.

There are 39 ślokas, with comments here and there showing that the whole of the Vedic literature rests on Brahmavāda.

Beginning :—

श्रीकृष्णाय नमः ॥

लौकिको वैदिकश्च व्यवहारो द्विधा मतः ।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा ॥ १ ॥
लोके शब्दार्थसम्बन्धो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्य्यो लोकोच्छित्तिस्तथा भवेत् ॥ २ ।
ब्रह्मवादे निरुक्तिस्तु नो वक्तव्येष कुत्रचित् ।
वस्तुतो ब्रह्म सर्व्वं हि व्यवहारस्तु लोकतः ॥ ३ ॥
ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्त्तिताः ।
तथैवार्थो वेदराशेः कर्त्तव्यो नान्यथा क्वचित् ॥ ४ ॥
काण्डद्वयार्थसिद्ध्यर्थं स्वाध्यायविधिरुच्यते ॥
वाक्यत्रयं तथा वेदे स्वाध्यायोध्येतव्यः अष्टवर्षं
ब्राह्मणमुपनयीत तं अध्यापयीत साङ्गो वेदोऽध्येयो
ज्ञेयश्चेति अनारभ्याधीतमेव हि ।
एकार्थता तु सर्व्वत्र विशेषोप्युच्यते स्फुटः ।
स्वाध्यायशब्दो वेदे हि रूढ़ो योगोऽपि वर्त्तते ॥ ५ ॥
तथा समन्तादध्येयः शोभनं नियमैर्युतं ।
देशे काले गुरौ स्वस्मिन् ये प्रेक्षन्ते गुणास्त्विह ॥ ६ ॥
आसर्व्वतः पुनस्तत्र यथा शङ्का न जायते ।
शब्दे ह्यर्थे अनुष्ठाने तथा ध्येयो हि वैदिकैः ॥ ७ ॥

2B :—

ये वैदिका महात्मानस्तेषां चानुमतिस्तथा ।
अवेदविन्न मनुते मया चोपेक्षितः पुनः ॥ ३६ ॥
स्थापितो ब्रह्मवादो हि सर्व्ववेदान्तगोचरः ।
काशीपतिस्त्रिलोकेशो महादेवस्तु तुष्यतु ॥ ३७ ॥
कस्यचित्त्वथ संदेहः स मां पृच्छतु सर्वथा ।
न भयं तेन कर्त्तव्यं ब्राह्मणानामियं गतिः ॥ ३८ ॥
डिंडिस्तु वादिनो द्वारि विश्वेशस्य मयापि हि ।
विद्वद्भिः सर्व्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ॥ ३९ ॥

इति श्रीवल्लभदीक्षितानां पत्राघलम्बनमिदं ॥

Then there are 4 lines and a half, about the ten signs of Bhāgavata.

अत्र सर्गः विसर्गश्च स्थानं पोषणं भूतयः ।
मन्वन्तरे सानुकथा निरोधो मुक्तिराश्रयः ॥
अत्र अशरीरस्य विष्णोः पुरुषशरीरस्वीकारः सर्गः etc., etc.

End :—इति श्रीमद्भागवतदशलक्षणानि श्रीवल्लभा—

8782

1327. पत्रावलम्बनविवरण

Patrāvalambanavivaraṇa.

Substance, country-made paper. 14×5½ inches. Folia, 15. Lines, 11 on a page. Extent in ślokas, 600. Character, Nāgara. Appearance, fresh. Prose. Generally correct. Complete.

It is a polemical tract against the theories of Bhaṭṭa and Śaṅkara. The author is Vallabhācārya. When he gave out his theory of *Bhakti*, the Paṇḍits of Kāśī of the school of Bhaṭṭa and Māyāvāda disputed his theory; he came over from his place at Caraṇādri to Benares and vanquished them. When disputing with them, he left notes on which the present work is based. For a description of the text See I.O. Catal. 808. The present manuscript contains a commentary on it by Puruṣottama, son of Pītāmbara.

Beginning :—

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ॥ श्रीगोवर्द्धनोद्धरणधीराय नमः ॥

श्रीमदाचार्य्यचरणैः चरणाद्रौ वसद्भिर्भक्तिमार्गप्रचारोपयोगितया उत्तर-मीमांसाभाष्येण ब्रह्मवादे ज्ञानकर्म्मसमुच्चयोपयोगितया पूर्व्वमीमांसाभाष्येण

धर्म्मस्थैर्य्यादिके चारिते यदा मायावादभाट्टमतस्थाः पण्डिता विवदिषया काशीतश्चरणाद्रौ समायान्ति तदा तैः सह विचारे क्रियमाणे भगवत्सेवायाः प्रतिबन्धो भवतीति तन्निवृत्तये स्वयं चरणाद्रितः काश्यामागत्य विश्वेश-देवालयद्वारि यशचलंवनं (?) कृत्वा कंचित् कालं स्थितं तदा यत्पत्रे लिखित्वा तत्र स्थापितं तत्पत्राचलम्बनं इत्युच्यते तदत्र व्याकुर्म्मः। तत्र तत्त्व-निर्णयकलिकास्थापना प्रतिस्थापनावती कथा वादः स वेदार्थे वेदान्तार्थे च कर्त्तव्य इति बोधयितुं लौकिकवैदिकव्यवहारयोर्भेदं लौकिकार्थस्य वैदिकोपकारकत्वं लौकिकस्याविचार्य्यत्वं प्रथमं द्वाभ्यां तदुपोद्घाततया आहुः—लौकिक इत्यादि।

It ends thus:—

डिंडिस्त्विति। एतद्वादश्याप्रच्छन्नत्वादित्यथः। एवं करणप्रयोजन-माहुः—विद्वद्भिरिति। तथा च सन्मार्गरक्षणमेतत्।

करणप्रयोजनमित्यर्थ एष पुष्पाञ्जलिः
श्रीमदाचार्य्यचरणाम्बुजे निवेदितो मया तेन चापलं मे क्षमत्विति।

Colophon:— इति श्रीमद्वल्लभाचार्य्यचरणैकतानपीताम्बरात्मज-पुरुषोत्तमेन विरचितं पत्राचलम्बनाविवरणं सम्पूर्णं।

8783

1323.

Substance, country-made paper. 12×6 inches. Folia, 41. Lines, 12 on a page. Extent in ślokas, 1200. Character, Nāgara. Appearance, old. Very corrupt.

This number contains seven works of the school of Vallabhācārya.

(a) *Jalabhedaṭīkā* ending in leaf 8A.

(b) *Samarpaṇa-godyārthavivaraṇa* ending in 16B, at the end of which are two short pieces of four ślokas each, namely, (I) वल्लभाचार्य्यगीताचतुःश्लोकी showing the full divinity of Vallabha from an interlocution between Arjuna and Śrīkṛṣṇa; (II) Vallabhācārya-Catuḥślokī advocating, complete devotion to Kṛṣṇa.

(c) *Sannyāsanirṇayavivaraṇa* ending in 25B.

(d) *Gītārthavivaraṇa* ending in 29A.

(e) *Kṛṣṇāśrayastotraprakāsana* ending in 35A.

(f) *Navaratnaprakāśa* ending in 38A.

(g) *Nyāsādeśa* ending in 41B.

(A)

जलभेदटीका *Jalabhedaṭīkā.*

Jalabheda is not a treatise on hydropathy as Rājendralāla says in BiK. Catal. p. 642; nor is it a work "on the dispositions befitting devotees" as described in Hall p. 150. It is a work in 20 verses by Vallabhācārya, the initial words of the verses being given in the present manuscript which contains Kalyāṇa Rāya's commentary on them. The object of the work is thus described by the commentator at the end.

जलानामिव भावानां भेदा यत्र निरूपिताः ।
जलभेद इति ख्यातो ग्रन्थोऽयं भावबोधकः ॥

The commentary ends thus:—

श्रीविट्ठलेशाङ्घ्रिसरोजपीठ-
कल्याणरायेण मुदा प्रणम्य ।
ताताङ्घ्रिपद्मे च गुरून् पितृव्यान्
टीकाकृतेयं जलभेदनाम्नः ॥

श्रीगोविन्दसुतप्रोक्ता टीका रागवतां हरौ ।
भावपूर्णा मु[दे] भूयात् सुन्दरीवाल्पभाषिणी ॥

मृषोद्यमनवद्यं वा बालस्येव कृपालवः ।
क्षम्यन्तां विट्ठलाधीशचरणाः प्रभवो मम ॥

समर्पणगद्यार्थ *Samarpaṇagadyārtha.*

It begins :—

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ।
भक्तिप्राप्तितदन्याश्वमोहाभावश्च पण्डितैः ॥

Subject matter of the work :—

नत्वा श्रीवल्लभाचार्य्यान् श्रीकृष्णस्याम्बुजानलान् (?)
तत्समर्पणगद्यार्थं [र]चयामि यथामति ॥

ननु श्रीमत्प्रभुचरणैर्नवरत्नप्रकाशे निवेदनस्यावश्यकत्वाय
साक्षात्श्रीगोकुलेशभजनाधिकाररूपत्वं निरूपितं
तदनिष्टाजनकत्वेनेष्टार्थजनकत्वेन वा

इति प्रकारजिज्ञासायां भगवदुपदिष्टश्रीमदाचार्य्यसमर्पणगद्यार्थो विचार्य्यते—सहस्रेति । अत्र सहस्रशब्दोऽनन्तसङ्ख्यावाची ।

This appears to be a commentary on certain short prose work beginning with the word *Sahasra* in which the devotee is advised to surrender himself absolutely to the will of God who is identified on earth with the Acārya. The work is by one Vallabha.

Colophon : इति श्रीमदाचार्य्यवरसमर्पितं परैहिकः । (?)
तत्समर्पणगद्यार्थं दुर्लभं वल्लभोऽब्रवीत् ॥

सन्न्यासनिर्णयविवरण *Sannyāsanirṇayavivaraṇa*

It begins thus :

नमामि तातचरणान् स्वीयानां सर्वकामदान् ।
यैः कृतः स्वाभिधानार्थः प्रकटः कृपया मयि ॥

The object of the book:—

स्वमार्गीयपरित्यागं वक्तुं परित्यागविचारं प्रतिजानते पश्चात्ताप-निवृत्त्यर्थमिति। भक्तिमार्गीयपरित्यागेतरसर्व्वपदार्थान् विचार्य्य त्याग-विचाराभावजनितस्वपश्चात्तापनिवृत्त्यर्थं भक्तिमार्गीयपरित्यागविचारमारभन्ते पश्चात्तापनिवृत्त्यर्थमिति उक्तपश्चात्तापनिवृत्त्यर्थं यः परित्यागः स विचार्य्यते।

Again at the end:—

विनिश्चितविशेषेण इदमित्थं त्वया निर्णीतं निश्चये कृष्णप्रसादस्य साधनत्वोक्त्या तदितरसाधनासाध्यत्वमुक्तं निर्णीतमेवाहुः सन्न्यासवरणं भक्ताविति भक्तो भक्तिमार्गे सन्न्यासवरणं सन्न्यासाङ्गीकारप्रकारः अथवा भक्तौ भक्तौ सत्यां अथवा भक्तौ भृत्सम्पूजनार्थं इदं सन्न्यासरूपं भगवतो वरणं एवेत्यर्थः। विपरीते बाधकमाहुः—अन्यथेति। अन्यथा भक्तिव्यतिरेकेण करणे उक्तप्रकाराभावात् पतितो भवेत् तस्मान्मार्गाच्च्युतो भवेत्।

This is a commentary on a work entitled *Sannyāsanirṇaya* which begins with पश्चात्तापनिवृत्त्यर्थं and ends with सन्न्यासवरणं भक्तौ अन्यथा पतितो भवेत्; and treats of the renunciation of the world by the followers of *Bhakti* mārga, that is, of Vallabha.

The commentator is the same Vallabha as in the preceding work.

The work ends:

श्रीवल्लभेन भक्तौ आचार्य्याणां प्रकाशितो भावः।
नित्यं तदीयहृदये कृपया तस्यैष सुदृढ़ोऽस्तु॥

Colophon: इति श्रीमत्प्रभुचरणैकधनेन श्रीवल्लभेन विरचितं सन्न्यासनिर्णयावचरणं सम्पूर्णं। शुभमस्तु।

नवरत्नप्रकाश *Navaratnaprakāśa*

Beginning :

चिन्तासन्तानहन्तारो यत्पदाम्बुजरेणवः ।
स्वीयानां तान्निजाचार्य्यान् प्रणमामि मुहुर्मुहुः ॥

Navaratna means nine verses beginning with :

चिन्ता कापि न कार्य्या निवेदितात्मभिः न कदापि ।
भगवानपि पुष्टीच्छो न करिष्यति लौकिकीं च गतिं ॥

The present manuscript contains a commentary on them.

The commentary ends :

भक्तिमार्गसुधासिन्धौ विचारमथनैः स्वयं ।
स्फुटीकृतानि रत्नानि श्रीमदाचार्य्यपण्डितैः ॥
मयोज्ज्वलीकृतानीत्थं हृदि कृत्वा व्रजाधिपं ।
भजन्तु भक्ता येनासौ न विमुञ्चति कर्हिचित् ॥

Col. इति नवरत्नप्रकाशः समाप्तः ।

From a statement in No. 2 it appears that the author was the guru of Vallabha.

न्यासादेशटीका *Nyāsādeśaṭīkā*

Beginning :

ननु सर्व्वधर्म्मत्यागो हि पुष्टिमार्गे न तु मर्य्यादायां पार्थे च तदुपदेशात् तन्मार्गीयत्वमिति भगवत्यधृतिः । धर्म्मत्यागे मर्य्यादामार्ग एव पाप-सम्भावना । अत्र च तत्कथने न संशयोऽपि । स्वस्यैव पाप-मोचकत्वोक्त्या न मर्य्यादापि पुष्टस्यैवंविधशोकासम्भवेन अत्र च तन्नि-षेधानुपपत्त्या तत्सत्त्वनिश्चयेनापि मर्य्यादामार्गीयत्वं ज्ञायते । किञ्च,

पुष्टिर्लीलायाः फलप्रकरणे स्वयं मर्य्यादामेव निरूपयन् भक्तानामाग्रहेण परं पुष्टिमङ्गीकृतवान् ..... इह तु तद्वैपरीत्यं ..... पापमोचनं मर्य्यादैवेति तद्विरुद्धं धर्म्मत्यागकथनं नोपपद्यत इति विचारकान्तः-करणकलिलमपनयन् तत्त्वाक्यतात्पर्य्यमनेन श्लोकेनाहुः। न्यासादेशेषु धर्म्मत्यजनवचनमित्यत्रायं भावः।

This also gives the object of the work.

It ends:

पितृचरणकृपातो गोपतिचरणरेणुधनिना यः।
श्रीविट्ठलेन विवृतो भावो मयि स स्थिरो भवतु॥

Colophon: इति श्रीविट्ठलेश्वरविरचितं 'न्यासादेशे'त्यस्य विवरणं समाप्तं।

After this there are two lines more on the same subject.

8784

1380. जलभेद (सटीक)

Jalabheda (with *commentary*)

Substance, country-made paper. $12\frac{1}{2} \times 5$ inches. Folia, 8. Lines, 13 on a page. In the Tripāṭha form. Character, Nāgara. Date (?). Appearance, fresh. The Text in verse and the commentary in prose. Generally correct. Complete.

The commentary by Kalyāṇa Rāya has already been described in no. 1323.

The Text by Vallabhācārya begins thus:

नमस्कृत्य हरिं वक्ष्ये तद्गुणानां विभेदकान्।
भावान् विंशतिधा भिन्नान् सर्व्वसन्देहवारकान्॥ १॥
गुणभेदास्तु तावन्तो यावन्तो हि जले मताः।
गायकाः कूपसङ्काशाः गन्धर्व्वा इति विश्रुताः॥ २॥
कूपभेदास्तु यावन्तः तावन्तस्तेऽपि सम्मताः।
कुल्याः पौराणिकाः प्रोक्ताः पारम्पर्य्ययुता भुवि॥ ३॥

The Text consists of 20 verses, but has a verse more at the end.

इति जीवेन्द्रियगता नानाभावं गता भुवि ।
रूपतः फलतश्चैव गुणा विष्णोर्निरूपिताः ॥ २ ॥

8785

10264. न्यासादेशविवरण *Nyasādeśavivaraṇa*

By Viṭṭhaleśvara.

With the commentary by Puruṣottama, son of Pītāmbara.

Substance, country-made paper. 11½× 5 inches. Folia, 20. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Complete.

Nyāsādeśa is printed in Bombay.

There is a śloka of Vallabhācārya (which as it begins with the word **न्यासादेश**—is called *Nyāsādeśa*, giving his views on the conclusion of Śrīmad-Bagavad-Gītā—**सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज** etc.

On it Viṭṭhaleśvara wrote a commentary and Puruṣottama a sub-commentary.

The commentary begins: **श्री ॥**—

ननु सर्व्वधर्म्मत्यागो हि पुष्टिमार्गे न तु मर्य्यादायां
पार्थे च तदुपदेशात्तन्मार्गीयत्वमिति भवत्यवधृतिः ।

धर्म्मत्यागे मर्य्यादामार्ग एव पापसम्भवेनात्र च तत्कथाननसंशयोऽपि स्वस्यैव पापमोचकत्वेनात्मनो मर्य्यादापि पुष्टस्यैवंविधशोकासम्भवेन अत्र च तन्निषेधानुपपत्त्या तत्सत्त्ववत्त्वनिश्चयेनापि मर्य्यादामार्गीयत्वं ज्ञायते । किञ्च पुष्टिर्लीलायाः फलप्रकरणे स्वयं मर्य्यादामेव निरूपयन् भक्तानामाग्रहेण परं पुष्टिमङ्गीकृतवान्, इह तु तद्वैपरीत्यमपरञ्च शरणमागते पापान्मोचनमुक्तं न "त्वद्व्यापृतं निशि शयानमतिश्रमेण, लोके विकुण्ठमुपनेष्यति

गोकुलं स्वम्" इतिवद्द्रोणादिमारणपापेभ्योऽहं मोचयिष्यामीति शरणगमनं, तथा सति पापमोचनञ्च मर्य्यादैवेति तद्विरुद्धं धर्म्मत्यागकथनं नोपपद्यते इति विचारकान्तःकरणकलिलमपनयंस्तद्वाक्यतात्पर्य्यमेकेन श्लोकेनाह।

न्यासादेशेषु धर्म्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ता कार्य्यम्पश्चाङ्गमुक्तं मदितरभजनापेक्षणं वा व्यपोढं। दुःसाध्येच्छोद्यमौ वा क्वचिदुपशमितावन्यसम्मेलने वा ब्रह्माभ्वन्याय उक्तस्तदिह न विहतो धर्म्म आज्ञादि + द्धः (?)॥

The sub-commentary begins :

श्रीगोपीजनवल्लभाय नमः॥

श्रीमद्वल्लभनन्दनचरणाम्भोजे हृदानुसन्धाय।
न्यासादेशविवरणस्याशयमत्र स्फुटीकुर्व्वे॥

भगवान् गीतोपदेशे पूर्व्वं "सन्यासः कर्म्मयोगश्च निःश्रेयसकरावुभौ, तयोस्तु कर्म्मसन्यासात् कर्म्मयोगो विशिष्यते" इत्युक्त्वा ततः सन्यासकर्म्मयोगयोस्तत्त्वनिरूपणे यज्ञदानतपसां पावनत्वमुक्तं etc., etc.

The commentary ends :

इति पितृचरणकृपातो गोपीपतिचरणरेणुधनिना यः।
श्रीविट्ठलेन विवृतो भावो मयि सुस्थिरो भवतु॥

इति श्रीगोस्वामिश्रीविट्ठलेश्वरविरचितं न्यासादेशविवरणं सम्पूर्णं।

The sub-commentary ends :

इति प्रभुपदाम्भोजमनुसन्धाय तद्बलात्।
न्यासादेशीयविवृतेराशयो विशदीकृतः॥

Col. इति श्रीमद्वल्लभनन्दनचरणदासानुदासेन पीताम्बरात्मजपुरुषोत्तमेन विरचिता न्यासादेशीयविवरणटीका सम्पूर्णा।

8786

1382. सन्न्यासनिर्णयविवरण

Sannyāsanirṇayavivaraṇa

Substance, country-made paper. 12¼×5 inches. Folia, 7. Lines, 14, 15 on a page. Extent in ślokas, 200. Character, Nāgara. Date (?) Appearance, fresh. Generally correct. Complete.

The same as 1323C.

8787

1377. बालबोधप्रकाश *Bālabodhaprakāśa*

By Devakīnandana.

Substance, country-made paper. 12½×5¼ inches. Folia, 6. Lines, 15 on a page. Extent in ślokas, 360. Character, Nāgara. Date, Sam. 1867. Appearance, fresh. Prose. Generally correct. Complete.

This is a commentary on Bālabodha or Sarvasiddhāntasaṁgraha by Vallabhācārya, who is regarded as the incarnation of Agni.

Maṅgalācaraṇa.

या च मत्कृतिरेवान्तर्निरस्यति तमः स्मृता ।
अलंकुर्व्वन्तु मद्वाचमाचार्य्यचरणत्विषः ॥ १ ॥
यदाश्रयवतामेव वल्लवीजनवल्लभः ।
प्रसीदति विनोपायैर्विट्ठलेशं तमाश्रये ॥ २ ॥
पितृपादाम्बुजयुगं भक्त्या नत्वा मुहुस्त्रिधा ।
मतिं स्वामनतिक्रम्य बालबोधो विचार्य्यते ॥ ३ ॥

The object and the scope of the text :

भक्तिमार्गे फलं कृष्णस्तदास्वादस्तु दुर्लभः ।
जीवानामत एवान्यमतेष्वुत्पद्यते रतिः ॥ ४ ॥
तत्प्रेरितेन रुद्रेण मतान्युक्तानि वै कलौ ।
विशेषतः प्रवर्त्तन्ते स्वातन्त्र्यं नयतो नृणां ॥ ५ ॥
तत्तत्फलप्रशंसैव तत्र तत्र निरूप्यते ।
तन्मोहवशतो लोकः परिभ्रमति केवलम् ॥ ६ ॥

अतः कदाचित् कृष्णस्य भजनं लभते न सः ।
फलाभावाद्वैवसृष्टिर्व्यर्था भवति सर्व्वथा ॥ ७ ॥

दैवी सम्पद् विमोक्षायेत्युक्तिस्तर्हि विरुध्यते ।
अतः करुणया बालबोधमग्निश्चकार हि ॥ ८ ॥

अष्टादशानामत्र श्रीभगवद्वचसामपि ।
पुराणानां स्मृतीनां च प्रामाण्यज्ञापनाय च ॥ ९ ॥

तावन्तः कथिताः श्लोका आद्येनोपक्रमस्तथा ।
अन्तार्द्धेनोपसंहारस्तेन सार्द्धमूनविंशतिः ॥ १० ॥

Text.

नत्वा हरिं सदानन्दं सर्व्वसिद्धान्तसंग्रहं ।
बालप्रबोधनार्थाय वदानि सुविनिश्चितम् ॥ १ ॥

धर्म्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम् ।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥ २ ॥

अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुताः ।
लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया ॥ ३ ॥

लौकिकांस्तु प्रवक्ष्यामि वेदाद्या यतः स्थिताः ।
धर्म्मशास्त्राणि नीतिश्च कामशास्त्राणि च क्रमात् ॥ ४ ॥

मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः ।
त्रिवर्गसाधनानीति न तन्निर्णय उच्यते ॥ ५ ॥

द्विधा द्वे द्वे स्वतस्तत्र सांख्ययोगौ प्रकीर्त्तितौ ।
त्यागात्यागविभागेन सांख्ययोगः प्रकीर्त्तितः ॥ ६ ॥

अहंताममतानाशो सर्व्वथा निरहंकृतौ ।
स्वरूपस्थो यदा जीवः कृतार्थः स निगद्यते ॥ ७ ॥

तदर्थं प्रक्रिया+चित् पुराणेऽपि निरूपिता ।
ऋषिभिर्बहुधा प्रोक्ता फलमेकमबाह्यतः ॥ ८ ॥

अत्यागे योगमार्गे हि त्यागोऽपि मनसैव हि ।
यमादयस्तु कर्त्तव्याः सिद्धे योगे कृतार्थता ॥ ९ ॥

पराश्रयेण मोक्षस्तु द्विधा सोऽपि निरूप्यते ।
ब्रह्मा ब्राह्मणतां यातस्तद्रूपेण सुषेव्यते ॥ १० ॥

ते सर्व्वार्था न चाद्येन शास्त्रं किंचिदुदीरितम् ।
अतः शिवश्च विष्णुश्च जगतां हितकारकौ ॥ ११ ॥

वस्तुनः स्थितिसंहारौ कार्य्यौ शास्त्रप्रवर्त्तकौ ।
ब्रह्मैव तादृशं यस्मात् सर्व्वात्मकतयोदितौ ॥ १२ ॥

निर्दोषपूर्णगुणता ततः शास्त्रे तयोः कृता ।
भोगमोक्षफले दातुं शक्तौ द्वावपि यद्यपि ॥ १३ ॥

भोगः शिवेन मोक्षस्तु विष्णुनेति विनिश्चयः ।
लोकेऽपि यत् प्रभुर्भुङ्क्ते तन्न यच्छति कर्हिचित् ॥ १४ ॥

अतिप्रियाय तदपि दीयते क्वचिदेव हि ।
नियतार्थप्रदानेन तदीयानां तदाश्रयः ॥ १५ ॥

प्रत्येकं साधनं चैतत् द्वितीयार्थे महान् श्रमः ।
जीवाः स्वभावतो दुष्टा दोषाभावाय सर्व्वदा ॥ १३ ॥

मोक्षस्तु विष्णोः सुलभो भोगश्च शिवतस्तथा ।
समर्पणेनात्मनो हि तदीयत्वं भवेद् ध्रुवम् ॥ १७ ॥

अतदीयतया चापि केवलं स्यात् समाश्रितः ।
तदाश्रयतदीयत्वबुद्धेय किञ्चित् सदाचरेत् ॥ १८ ॥

स्वधर्म्ममनुतिष्ठन् वै भवेद्वैगुण्यमन्यथा ।
इत्येवं कथितं सर्व्वं नैतज्ज्ञाने भ्रमः पुनः ॥ १९ ॥

चतुर्धा लौकिको मोक्षः सदोषत्वान्निराकृतः ॥

Col. of the comm. इति श्रीदेवकीनन्दनजीकृतो बालबोधप्रकाशः समाप्तः ।

The post-colophon statement. संवत् १८६७ शिवरात्रौ फाः वदि १३ ।

For a description of the work, see C'G. I. p. 111.

8788

1310. षट्पदीविवृति *Ṣaṭpadīvivṛti.*

Text by—Viṭṭhala Dīkṣita.

Commentary—anonymous.

Substance, country-made paper. 10×4½ inches. Folia, 21. Lines, 7 no a page. Extent in ślokas, 250. Character, Nāgara. Generally correct. Prose. Appearance, tolerable.

An exposition of the *Saṭpadī* or six verses in praise of Lord Kṛṣṇa of Viṭṭhalācārya.

See Hall., P. 153.

1st and 2nd stanzas are not fully given—only their initials are given in connection with this commentary.

It begins:

श्रीगणेशाय नमः । श्रीकृष्णाय नमः ।

श्रीकृष्णं श्रीमदाचार्यं नत्वा श्रीविट्ठलप्रभुम् ।
भावैस्तदीयैः सरसैर्वर्ण्यते तत्कृतिः स्फुटा ॥ १ ॥

अथ श्रीमद्विट्ठलेशचरणाः स्वस्यास्याग्निकुमारत्वेन लीलामध्यपातित्वात् फलरूपान्तरङ्गलीलानुभवार्थमधुना प्राकट्यात् फलविलम्बज्ञापक-बाललीलाक्रमलीलाप्रदर्शनजनितविरहोत्कटभावप्राचुर्य्यकातरतया वर्णनार्थं लीलावलम्बने प्रकटभावरूपसाक्षात्कारेऽपि साक्षात्सङ्गमरसानुभवेन यदैव.

भगवतावकाशो दत्तः अवकाशरूपं तु भक्तानां अवकाशार्थं भगवान् बाललीलया यथासंजातनिद्राख्ये निद्रां करोति ।

स्वीयेषु दयया स्वभावबोधनार्थं प्रकाशयन्ति प्रेङ्क्षेत्यादि पालयेत्यन्ताः । तदर्थनं तदनुवादमेवाहुः प्रेङ्क्षेति । प्रेङ्क्ष—पर्य्यङ्कशयने ।

It ends :—

सर्वांशेन सर्व्वदा पालयेत्याशीः प्रार्थिता ।
विवृता चातियत्नेन कृतिः श्रीविट्ठलप्रभोः ॥
विलोक्य मार्ज्जनीया स्यात् सुहृद्भिः स्नेहपारगैः ॥
इति श्रीमद्विट्ठलेश्वरविरचितायाः षट्पद्या (?)
इति समाप्ता । ३ । श्लोकप्रमाण २६० ।

8789

1317. विद्वन्मण्डन *Vidvanmaṇḍana.*

By Viṭṭhala Dīkṣita, son of Vallabha Dīkṣita.

Substance, country-made paper. 10×6 inches. Folia, 78. Lines, 12 on a page. Extent in ślokas, 1950. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

A work on the Vaiṣṇava philosophy according to the school of Vallabhācārya. For a description of the work, see L. 2115.

Printed, ed. Benares.

8790

8467. विद्वन्मण्डन *Vidvanmaṇḍana.*

With the Commentary by Giridhara.

Substance, foolscap paper. 12½×5½ inches. Folia, 148. In Tripāṭha form. Character, modern Nāgara. Date, S. 1930. Appearance, fresh.

Colophon: इति श्रीमन्निजकटाक्षपाततरणिविघटितमायावादि-प्रभृतितमःपुञ्जविकशितश्रीगोकुलाधीशरतिसरसिज-श्रीमद्वल्लभ [लक्ष्म] दीक्षितात्मज श्रीविट्ठलदीक्षितविरचितं विद्वन्मण्डनं संपूर्णं ।

(*Comm.*) इति श्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्व्वचनीय-सरसावदाततामरसरससुधाह्रदावगाहिश्रीमदाचार्य्यपदाब्जकृपापारसार-श्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मज-गिरिधरविरचितविद्वन्मण्डनव्याख्या हरितोषिण्यपरपर्य्याया दीपिकाभिधा समाप्तिमभावीत् ।

Post: समाप्तोयं ग्रन्थः । श्रीसंवत् १९३०

मंगलमस्तु ॥

The Text refutes the doctrine of Māyā and presents the philosophy of Vallabhācārya in a succinct form. See L. 2115.

The Comm. begins: श्रीमुकुन्दरायो जयति etc.

श्रीनाथं च नमस्कृत्य नवनीतप्रियं तथा ।
मथुरेशविट्ठलेशरायं श्रीद्वारकाधिपं ॥
श्रीमद्गोकुलनाथं च सर्व्वकामार्थपूरकं ।
नमस्कृत्याथ तं नित्यं यः श्रीगोकुलचन्द्रमाः ॥
. . . . . .
नानामतेषु प्रविवेककारी श्रीपुष्टिमार्गप्रवहप्रदर्शी ।
श्रीवल्लभाचार्य्यपादारविन्दं सुषट्पदीभूतमना नतोस्मि ॥
श्रीमद्विट्ठलनाथपादयुगलं सर्व्वार्थसंसाधकं
नत्वा श्रीयदुनाथपादकमलद्वन्द्वं मनोहारि यत् ।
तद्वच्च श्रीमधुसूदनस्य चरणौ तापत्रयोन्मूलने
दक्षौ सर्व्वगुणाश्रयावतितरौ नौमि प्रभूतार्थदौ ॥

8791

1381. भक्तिहंस *Bhaktihaṁsa.*

By Viṭṭhala Dīkṣita.

Substance, country-made paper. 11¼×5½ inches. Folia, 8. Lines, 11 on a page. Extent in ślokas, 175. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

Printed in Bombay.

An essay on devotion or Bhakti to Śrīkṛṣṇa, as the only road and royal road to salvation, Tāntrika and Vedic rites being subservient to Bhakti. And Bhakti means the deepest *prema* as between husband and wife, in which one identifies oneself with the other. The sum and substance of the whole work is thus given in the following verse, leaf 7.

उपास्तिं मन्यन्ते मधुमथनभक्तिं निजकृता-
र्थतां तन्त्रोपास्यं परमपुरुषं चापि सुविदे ।
द्वयोः सारूप्यात्तद्भ्रमहतिकृते मानसं गतं
मुदा भक्तेहंसं प्रकटमकरोत् विट्ठलकृती ॥

There are frequent extracts from the *Bhāgavata* and the *Gītā*.

For beginning and end of the work, see C'G. p. III Vol. I.

8792

10281. *Bhaktihaṁsa.*

Substance, country-made yellow paper. 12×5 inches. Folia, 8. Lines, 11 on a page. Extent in ślokas, 196. Character, Nāgara. Appearance, fresh. Complete.

Colophon: इति श्रीमद्गोपीजनवल्लभैकचरणैकतानविट्ठल-दीक्षितविरचितो भक्तिहंसः सम्पूर्णः ।

Post-colophon: शुभमस्तु ॥ श्रीरस्तु ॥ श्रीवल्लभाय नमः ॥ यादृशमित्यादि ।

Beginning:

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ।
भक्तिः प्राप्ता तदन्याघमोहाभावश्च पण्डितैः ॥
मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्च्चनादिविधिभिर्यः ।
अस्पृष्टो रमते निजभक्तेषु स मेस्तु सर्व्वस्वम् ॥ २ ॥

ननु किमिव अपूर्व्वर(?)मिधोच्यते । सत्यं etc. etc.

8793

10282. **भक्तिहेतुनिर्णय** *Bhaktihetunirṇaya.*

By Viṭṭhaleśvara.

Substance, country-made paper. 12×5 inches. Folia, 6. Lines, 11 on a page. Extent in ślokas, 194. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon:

इति श्रीविट्ठलेश्वरविरचितो भक्तिहेतुनिर्णयः समाप्तः ॥

Devotion to God springs from the mercy of God himself, and no other cause.

Beginning: श्रीवल्लभाय नमः ॥

ब्रह्मादिदुर्लभकथं राधामानापनोदकं कृष्णं ।
तदनुग्रहैकलभ्यां भक्तिं च नुमस्तदीयां च ॥

नन्विदमनेकप्रमाणाविसंवादीव भवति यदनुग्रहेतरसाधनासाध्यत्वं भक्तौ ।

8794

8437. **गुप्तरस** *Guptarasa.*

By Viṭṭhala.

With a Commentary.

Substance, country-made paper. 10¾×4¼ inches. Folia, 2+7. Lines, 9 on a page. Character, Nāgara. Date, Saṁvat 1926. Appearance, fresh. Complete.

The Text in two leaves, begins:

श्रीहरिः ॥

पयोदध्यामिक्षाभिनवघृतगोधूमचणकैः
क्षीरैरत्युत्कृष्टैर्विविधरसभोज्यं प्रियहृदा ।

विधायाधायार्थोचितरुचिरपात्रेषु रहसि
प्रियं प्राप्याङ्कस्थं किमपि समवोचन् प्रियतमाः ॥
अस्मदीयपदार्थानां भोगः कार्य्यस्त्वयैव हि ।
अन्यथा मार्गमर्य्यादा नंक्ष्यत्यम्भोजलोचन ॥
इतरोपयोगदाका(?) दवदहनसुतसम्तैरस्माकं ।
स्वांगीकृतनवजलदैः शिशिरय गोपीजनप्राण ॥

It consists of 31 ślokas of which 1-26 ślokas are addressed by Gopikās to their lover Śrīkṛṣṇa.

St. 26.

अस्मदीयमखिलं भवदीयं तेन तद्ग्रहणतो न परस्य ।
कस्यचिन्न भविष्यति बुद्धिदोष इत्यमलवस्तुनिसर्गात् ॥

St. 27.

न ज्ञास्यत्यन्योपि प्रियाधयोश्चरणरेणुरपरं ।
श्रीविट्ठलोतिगुप्तं सर्व्वमिमं वेत्ति वृत्तान्तं ॥

St. 28.

इति प्रियतमावृन्दमुखपद्मवचोमधु ।
रसायनमिवापीय तथैव प्रभुराचरत् ॥

St. 31.

अयं मनोरथोन्यत्र भविता नैव पूरकः ।
नान्यः श्रीगोकुलाधीशात् ज्ञाताप्यन्यो न मां विना ॥

Colophon: इति श्री ६ विट्ठलेश्वरविरचितो गुप्तरसः समाप्तः ॥

The commentary begins:

प्रतिक्षणनिकुञ्जस्थलीलारससुपूरितान् ।
नमामि श्रीमदाचार्य्यान् निजानां निखिलेष्टदान् ॥ १ ॥

श्रीमद्गोकुलाधीशैकसर्व्वस्वानां प्रियसखीनां रहसि वृन्दीभूतानां अहर्निशं मनोरथशतैकभातीतेऽह्नि

श्रीमद्व्रजरत्नानां निजभुजयुगगतं विपाटितकञ्चुकपादिषु दत्तेक्षणं रसाविष्टं
प्रियं विलोक्य यदुदितं तमाहुः अस्मदीयेत्यादिनाचरदित्यन्तेन च ॥

It ends:

एवं चौर्य्यस्वरूपं प्रकटीकृतं श्रीमत्प्रभुचरणैरिति . . . . .
-रेतद्रसाभिज्ञैः विभावनीयं ॥

Colophon:

इति श्रीगुप्तरसटीका ।

Post-colophon:

संवत् १९३६ शमैमीः सावन सुदी १३ वार बुध ॥

8795

1385.

Substance, country-made paper. 10½×4½ inches. Folia, 24. Lines, 9 on a page. Extent in ślokas, 480. Character, Nāgara. Appearance, fresh. Prose. Generally correct. Complete.

Not entered in *Cat. Cat.* for want of a definite name.

This is a polemical treatise by one who describes himself as the servant of the servant of Vallabhācārya. It proves the absolute necessity of initiation as a Vaiṣṇava and considers all other forms of initiation inferior and partial.

Beginning and end:

अथेदं विचार्य्यते द्विजातीनां गायत्र्युपदेशातिरिक्त
उचितो न वेति किं तावत् प्राप्तं नेति कुतः ।
सर्वे शाक्ता द्विजाः प्रोक्ता न शैवा न च वैष्णवाः ।
यस्मादुपासते नित्यं गायत्रीं वेदमातरं ॥
इति विश्वामित्रवाक्ये सर्वेषां द्विजानां
जात्या शाक्तत्वकथनात् त्रैवर्णिकानां शाक्तत्वं
साहजिकं + + वैष्णवत्वादिकं तु पारिभाषिकत्वात्
कृत्रिममिति गायत्र्युपदेशापेक्षया अन्यस्य जघन्यत्वात्

किं च द्विजातीनां कर्म्मार्थत्वात् कर्म्मणां च श्रौतस्मार्त्तभेदेन
द्वैविध्यात् अन्येषां चेतोजघन्यत्वात् श्रौतस्मार्त्तकर्म्माधिकारस्य
गायत्र्युपदेशादेव सिद्धौ उपदेशान्तरस्य निरर्थकत्वात्
न च तद्विज्ञानार्थं स्वगुरुमेवाभिगच्छेत् समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिभिः . . . . . .

... ...

विना श्रीवैष्णवैर्दीक्षां प्रसादं सद्गुरोर्विना ।
विना श्रीवैष्णवं धर्म्मं कथं भागवतो भवेत् ॥

इत्यादिपाद्मोत्तरखण्डीयवाक्येभ्यस्तस्यावश्यकत्वं विभाव्यते ।

इत्यादि ॥

End:

एतेनैव अन्येऽपि भक्तिपन्थानो व्याख्याताः ज्ञेयाः
शङ्कापङ्कान्तरपरिहारश्च साक्षाद्भगवदुक्तिधाराभिरेव
विभाव्य साधनीयमित्यलं विस्तरेण ॥
इति श्रीवल्लभाचार्य्यदासदासेन निर्म्मितम् ॥

8796

10273. ब्रह्मवाद *Brahmavāda.*

By Hari Rāya.

Substance, country-made paper. 10½×6 inches. Folia, 4. Lines, 12 on a page. Extent in ślokas, 96. Character, Nāgara. Date, Saṁvat 1934. Appearance, discoloured. Complete.

Printed, ed. KSS., No. 62, Benares.

Conception of Brahma, as conceived by the school of Vallabha.

Beginning:

श्रीकृष्णाय नमोस्तु ।

भक्तिमार्गे माहात्म्यज्ञानजननहेतुतया आनुकूल्येनोक्तः कौसौ ब्रह्मवादः ? उच्यते—एक एवाद्वयं ब्रह्म पुरुष एवेदं सर्व्वं यैतदात्म्यमिदं सर्व्वं स वै

सर्व्वमिदं जगत् इत्यादिश्रुतिभिः प्रपञ्चरूपेणापि पूर्व्वं सन्नेव स्वस्याद्वयत्वेन तदतिरिक्तस्याभावात् स्वस्य क्रीड़ाधारत्वेन प्रपञ्चरूपं सम्पादयितुं तद्रूपेणाविर्भूतो भगवानेवेति श्रूतितात्पर्य्यरूपः। ननु भगवत एवं विलक्षणाभ्यां रूपाभ्यां द्वैतापत्तिरिति चेन्न। नेह नानास्ति किञ्चनेति अग्रिमश्रुत्या तद्वैलक्षण्यनिषेधात्। तदर्थस्तु, इह सर्व्वरूपतयाद्वये ब्रह्मणि प्रपञ्चरूपेपि सच्चिदानन्दरूपतया एकरूपे वस्तुतो नाना न। किन्तु अब्रह्मदशायामविद्यया भासत एव। अतो न वैलक्षण्यम्॥

End:

निजाचार्य्यानुकम्पातः संशयोयं निराकृतः।
हरिदासेन तुष्यन्तु तेन ते स्वामिनो मम॥

Colophon:

इति हरिरायविरचितो ब्रह्मवादः।

Post-colophon:

लिखितं व्रजभूषणदासेन, शुभं। मीती जेष्ट कृष्ण ५ सं १६३४ काशीमध्ये। यादृशी पुस्तके दृष्टा etc. etc.

8797

10286. ब्रह्मवादविचार *Brahmavādavicāra.*

By Haridāsa.

Substance, country-made paper. 11¾×5¼ inches. Folium, 1. Lines, 9+8. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon:

इति श्रीमद्वल्लभाचार्य्यचरणदासेन हरिदासेन कृतो ब्रह्मविचारः संपूर्णः।

It upholds the views of Vallabhācārya and refutes those of others on Godhead.

Beginning :

ब्रह्मभिन्नः प्रपञ्चश्चेदस्मद्दृग्विषयः कथं ।
ब्रह्माभिन्नः प्रपञ्चश्चेद् ब्रह्मविद्विषयः कथं ॥
अतो भेदस्तथाभेदः शक्यते वेदितुं कथं ।
इति तन्न तथा ब्रह्म रूप्यते तत्प्रपञ्चयोः ॥ etc., etc.

There are 11 ślokas.

End :

विचार्य्य वल्लभाचार्य्यं प्रचार्य्यं मतमाय्यजं ।
विदार्य्य संशयं कार्यमनार्य्यमतदूषणम् ॥

8798

10276. प्रतिबिम्बवाद *Pratibimbavāda.*

By Puruṣottoma, son of Pītāmbara.

Substance, country-made paper. $11\frac{3}{4}\times5$ inches. Folia, 7. Lines, 10 on a page. Extent in ślokas, 170. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon :

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीपीताम्बरतनुजपुरुषोत्तमेन कृतः अष्टमः प्रतिबिम्बवादः समाप्तिमभाधीत् ॥ इदं पुस्तकं समाप्तं ।

So it is apparent that Puruṣottama wrote series of works on the philosophy of the school of Vallabha, of which the present ms. contains the 8th on "the universe as a mere shadow," supported by quotations from the *Bhāgavata.*

Beginning :

श्रीकृष्णाय नमः ॥

ज्योतिस्तमालनीलं करुणाशीलं मुदा स्तौमि ।
हरति तमोनिचयं यत् प्रतिबिम्बं स्वकीयानां ॥

नन्वेतदयुक्तं। प्रतिबिम्बपदार्थस्यैवाभावात् दर्पणादिसन्निधानदोष-प्रतिहतपरावृत्तनयनकिरणस्य स्वमुखदर्शनमात्रेण दर्पणादौ प्रतिबिम्बाभिमानात्। न च प्राङ्मुखा ये प्रत्यङ्मुखत्वादिदर्शनात् नैवमिति वाच्यम्। दर्पणोपाधिसन्निधौ अदोषजन्यस्येदृशज्ञानस्य भ्रमत्वात्। न च बिम्बभेदानुभवान्नैवमिति वाच्यम्। तस्यापि भ्रमत्वात्। दर्पणे मन्मुखं भातीति स्वमुखभेदप्रत्यभिज्ञानेन तद्वांश्च दर्पणे मुखं नास्तीति ज्ञानाद्भेदज्ञानं भ्रम इति वाच्यम्। दर्पणे मुखसंसर्गमात्र++पि तादृग्-ज्ञानसंभवात्। etc., etc.

It ends:

केचित्तु तदधीनत्वे सति तत्सदृशत्वं प्रतिबिम्बत्वमित्याहुः। तन्न। छायायामतिव्याप्तेः। न च तदधीनप्रतीतिकत्वे सति तथात्वे विवक्षिते न दोष इति वाच्यम्। आभासेऽप्यतिव्याप्तेः। तस्मात् पूर्व्वोक्तमेव लक्षणम्। अतः पदार्थान्तरमेव प्रतिबिम्बः। मायिकत्वञ्चास्य 'यथाभासो यथा तम' इति द्वितीयस्कन्धीयभगवद्वाक्यादपि सिद्धं। अतो न कोपि बाधावसरः।

श्रीविट्ठलेशकृपया तत्त्वदीपप्रकाशतः।
प्रतिबिम्बं निश्चितवान् तद्दासः पुरुषोत्तमः॥

8799

1397. द्रव्यशुद्धिदीपिका *Dravyaśuddhidīpikā.*

By Puruṣottama, son of Pītāmbara.

Substance, country-made paper. 11½×4½ inches. Folia, 40. Lines, 9, 10 on a page. Extent in ślokas, 1150. Character, Nāgara. Appearance, tolerable. Prose. Generally correct. Complete.

It is a commentary on *Dravyaśuddhi.*

Leaf 1.

नत्वा श्रीवल्लभाचार्य्यान् हरिं सर्व्वोपकारिका।
बाह्या चाभ्यन्तरा द्रव्यशुद्धिरत्र विचार्य्यते॥
निबन्धेषु विविच्योक्ता ह्यधुना बुद्धिदोषतः।
यतो न भासते सम्यक् तत एव समुद्यमः॥

The 'Nibandhas' are by Vallabhācārya. So this is a commentary on one of Vallabhācārya's 'Nibandhas', on *Dravyaśuddhi.*

Colophon:

Leaf 40.

इति श्रीवल्लभाचार्य्यचरणाम्बुजदासदासेन पीताम्बरात्मजेन पुरुषोत्तमेन स्फुटीकृता द्रव्यशुद्धिदीपिका सम्पूर्णा।

शुभमस्तु। श्रीरस्तु। ग्रन्थसंख्या ११५०।

8800

1323. अवतारवादावली *Avatāravādāvalī.*

By Puruṣottama, son of Pītāmbara.

Substance, country-made paper. 14×7 inches. Folia, 67. Lines, 15 on a page. Extent in ślokas, 2500. Character, Nāgara. Date (?). Appearance, fresh. Prose. Generally correct.

This is the first part of a comprehensive work of the school of Vallabhācārya reviewing the theories of various Vaiṣṇava schools.

The manuscript wants the first leaf and has the first leaf marked 2.

For the beginning and end of the same, see L. 30,19.

Oxf. 38A notices the 13th chapter and IO Catal. No. 2497 chapters VIII, X, XI.

Authorities quoted and consulted—

शिवपुराण, अथर्व्वशिरः, सुदर्शनाचार्य्य, हरिवंश, अथर्व्वशिखा, नीलकण्ठ, चन्द्रशेखर, नृसिंहतापनीय, अमृतबिन्दु, नादबिन्दु, तैत्तिरीय-गीता, याज्ञवल्क्य, माण्डूक्य, मैत्रेयोपनिषत्, शङ्कराचार्य्यभाष्य, नृसिंहोत्तर-तापनी, विष्णुपुराण, पराशरोपपुराण, अप्ययदीक्षित, ब्रह्माण्डपुराण, आदित्य-पुराण, संक्षेपशारीरक, केनोपनिषत्, नारायणोपनिषत, कैवल्योपनिषत्, ईश्वरगीता, छान्दोग्य, शिवतत्त्वविवेक, उत्तरगीता, मात्स्य, मोक्षधर्म्म।

8801

1379. भागवततत्त्वार्थदीप-प्रकाशावरणभङ्ग

Bhāgavatatattvārthadīpaprakāśāvaraṇabhaṅga.

By Puruṣottama, son of Pitāmbara.

Substance, foolscap paper. 12¼×7¼ inches. Folia, 26. Lines, 9 on a page. Extent in ślokas, 700. Character, Nāgara. Date, Saṁ. 1856. Appearance, fresh. Prose. Generally correct.

The Third prakaraṇa only.

Vallabhācārya wrote a work entitled *Bhāgavatatattvārthadīpa, Tattvārthadīpa* or *Nibandha,* summarising the teachings in the *Bhāgavatapurāṇ,* according to his own doctrine. See **L. 1316.**

"अग्निश्चकार तत्त्वार्थदीपं भागवते महत् ।"

He wrote a commentary on it 'Tattvadīpaprakāśa' which begins: सर्व्वोद्धारप्रयत्नात्मा etc., etc. See *Cat. Cat.* Vol. III, pp. 87A.

Vallabha's great grandson, Pītāmbara began to write a commentary on it entitled "तत्त्वदीपप्रकाशावरणभङ्ग" of which the 'Śāstrārtha-prakaraṇa' alone is known from Ulwar extr. 128 and C" C., I. 146, which seems to be the first prakaraṇa.

The present manuscript represents the third prakaraṇa of the work by Puruṣottama, son of Pītāmbara. In this prakaraṇa the examination of the first *skandha* of the *Bhāgavata* comes to an end.

Colophon:

इति श्रीपीताम्बरतनुजपुरुषोत्तमविरचिते तत्त्वदीपप्रकाशावरणभङ्गे प्रथमस्कन्धविवरणं सम्पूर्णम् ।

After the maṅgalācaraṇa the commentator says:

पूर्व्वप्रकरणसमाप्तावेव एतदारम्भस्य समर्थितत्वात् तृतीयं प्रकरणं व्याख्यातुमेवारभन्ते भागवतेत्यादि, सङ्कीर्त्तनेत्यादि, सम्यक्स्वरूपकथनेन परवस्तूच्यते इत्यादि।

The second prakaraṇa also seems to have been written by Puruṣottama. His father's work ended with the first prakaraṇa.

8802

1324. प्रमेयरत्नार्णव *Prameyaratnārṇava.*

By Bālakṛṣṇa alias *Lālubhaṭṭa.*

Substance, country-made paper. 11×6 inches. Folia, 58. Lines, 9 on a page. Extent in ślokas, 928 Character, Nāgara. Date, Saṁvat, 1913. Appearance, fresh. Prose and verse. Complete.

Printed, ed. CHSS. No. 97, Benares.

A summary of the system of Vallabhācārya in seven chapters. It quotes verses and comments on them. The manuscript is, however, full of mistakes which a scribe not knowing Sanskrit is liable to make. An idea may well be obtained of the contents of the book from the colophons:

8B.

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्य्यश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालुभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे प्रपञ्चविवेकः सम्पूर्णः।

14B. • इति जीवविवेकः समाप्तिमगात्।

21B. ० मूलरूपविवेकः सम्पूर्णः।

22A. ० पुष्टिविवेकः समाप्तिमगात्।

40A. ० पुष्टिभक्त्यधिकारविवेकः सम्पूर्णः ।

43B. ० सर्व्वात्मभावविवेकः समाप्तः ।

58B. ० पुष्टिमार्गीयफलविवेकः समाप्तः ।

Beginning :

श्रीगिरिधारी तनोति मङ्गलानि ।

गोपीनूतनरूपयौवनमहामाधुर्य्याद्यभावात् प्रदं
वृन्दाकानननिर्म्मितोभ्वत्थमयस्वच्छन्दरासोत्सवं ।
श्रीमद्वल्लभविट्ठलप्रकटितप्रेमाख्यभक्तिप्रियं
वेदान्तोक्तरसात्मकं प्रभुमहं गोवर्द्धनेशं भजे ॥
नन्दाङ्गनालालितवक्त्रचन्द्रो विधीशदुष्प्रापपदारविन्दः ।
विराजतां मूर्द्धनि भक्तिगम्यः श्रीबालकृष्णः कुलदैवतं मे ॥ २ ॥

Two more verses on Maṅgalācaraṇa—

अथ सुबोधिनीनिबन्धभाष्यविद्वन्मण्डनादिषु स्थितानि प्रमेयाणि रत्नानीव सञ्चिनोमि । तत्र भगवद्भजनोपयोगितया प्रपञ्चस्वरूपज्ञानस्य निबन्धोक्तरीत्या प्रथमं तदेव विविच्यते ।

End :

निरोधलीलामुक्त्वाथ मुक्तिस्तदनु वर्ण्यते ।
मुक्तानामाश्रयः कृष्णः नान्येषामिति शास्त्रतः ॥

इति सुबोधिन्याः ।

Post-colophon :

संवत् १९१३ मिति अषाढ़ कृष्णपक्षे १० लि० सजीवनलाल ।

8803

8465. *Prameyaratnārṇava.*

Substance, country-made paper. 10¾×5¾ inches. Folia, 40. Lines, 11 on a page. Extent in ślokas, 960. Character, Nāgara. Date, Saṁvat, 1926. Appearance, fresh. Complete.

Last Colophon:

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्य्यश्रीविट्ठलेश्वरचरणानुचर-सेवकेन लालुभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे पुष्टिमार्गीयफलविवेकः समाप्तिं पत्तार्ण (?) समाप्तं पूर्व्वार्द्धं।

Post-colophon:

श्रीगिरिधारी विजयते। लिप्यकृत रामसहाय ब्राह्मणजातीगौड़-वासी देवगिरीमध्ये वावजीनरामरामवंच्याश्री यादृशं etc.

इति श्रीसंवत् १९२६ समैतीती भादौ वदी १४—१०

See our no. 1324.

8804

8466. विवेकधैर्य्याश्रय *Vivekadhairyāśraya.*

By Vallabhācārya with a Sanskrit commentary and a sub-commentary in Hindi.

Substance, country-made paper. $11\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 66. Lines, 9 on a page. Extent in ślokas, 1188. Character, Nāgara. Date, Samvat, 1864. Appearance, fresh. Complete.

The Text consists of 17 ślokas :

विवेकधैर्य्ये सततं रक्षणीये तथाश्रयः।
विवेकस्तु हरिः सर्व्वं निजेच्छातः करिष्यति ॥ १ ॥

प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात्।
सर्वत्र तस्य सर्व्वं हि सर्व्वसामर्थमेव च ॥ २ ॥

अभिमानस्तु संत्याज्यः स्वाम्यधीनत्वभावनात्।
विशेषतश्चेदाज्ञा स्यादंतःकरणगोचरा ॥ ३ ॥

कदा विशेषगत्यादि भाव्यं भिन्नं तु दैहिकात्।
आपद्गत्यादिकार्य्येषु हठस्त्याज्यश्च सर्वथा ॥ ४ ॥

अनाग्रहश्च सर्व्वत्र धर्म्माधर्म्माप्रदर्शनं ।
विवेकोयं समाख्यातः धैर्य्यं तु विनिरूप्यते ॥ ५ ॥
त्रिदुःखसहनं धैर्य्यमामृतेः सर्व्वतः सदा ।
तक्रवद्देहवद्भाव्यं जड़वद्गोपभार्य्यवत् ॥ ६ ॥
प्रतीकारो यदृच्छातः सिद्धश्चेन्नाग्रही भवेत् ।
भार्य्यादीनां तथान्येषामसतश्चाक्रमं सहेत् ॥ ७ ॥
स्वयमिन्द्रियकार्य्याणि कार्य्यवान् मनसा त्यजेत् ।
अशूरेणापि कर्त्तव्यं स्वस्य सामर्थ्यभावना ॥ ८ ॥
अशक्ये हरिरेवास्ति सर्व्वमाश्रयितो भवेत् ।
एतत् सहनमत्रोक्तमाश्रयोतो निरूप्यते ॥ ९ ॥
ऐहिके परलोके च सर्व्वत्र शरणं हरिः ।
दुःखहानौ तथा पापे भये कामार्थपूरणे ॥ १० ॥
भक्तद्रोहे भक्त्यभावे भक्तस्यातिक्रमे कृते ।
अशक्ये वा सुशक्ये वा सर्वथा शरणं हरिः ॥ ११ ॥
अहंकारकृते चैव पोष्यपोषणरक्षणे ।
पोष्यातिक्रमणे चैव तथान्तेवास्यतिक्रमे ॥ १२ ॥
अलौकिकमनःसिद्धौ सर्व्वार्थे शरणं हरिः ।
एवं चित्ते सदा भाव्यं वाचा च परिकीर्त्तयेत् ॥ १३ ॥
अन्यस्य भजनं तत्र स्वतो गमनमेव (च) ।
प्रार्थनाकार्य्यमात्रेपि तथान्यत्र विवर्ज्जयेत् ॥ १४ ॥
अविश्वासो न कर्त्तव्यः सर्व्वथा बाधकस्तु सः ।
ब्रह्मास्त्रघातकौ भाव्यौ प्राप्तं सेवेत निर्म्ममः ॥ १५ ॥
यथाकथञ्चित् कार्य्याणि कुर्य्यादुद्यावत्रान्यपि ।
किं वा प्रोक्तेन बहुना शरणं भावयेद्धरिं ॥ १३ ॥
एवमाश्रयणं प्रोक्तं सर्व्वेषां सर्व्वदा हितं ।
कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मतिः ॥ १७ ॥

The Sanskrit commentary begins:

श्रीमदाचार्य्यचरणनखचन्द्ररुचे नमः ।
हृदि प्रविश्य यद्ध्वान्तं निर्धूतं मे यया स्वतः ॥
यत्कृपातो विवेकादिधर्म्माः स्वीये भवन्ति हि ।
तत्पादतलसम्बन्धी रेणुः शरणमस्ति मे ॥

The Hindi commentator gives the name of the Sanskrit one as Gokulcśa.

Colophon:

इति श्रीवल्लभाचार्य्यविरचितो विवेकधैर्य्याश्रयः समाप्तः, च पुनः विवेकधैर्य्याश्रयविवृतिः संपूर्णा जाता ।

Post-colophon:

काशीवालाशेठजीहरिदासजीपठनार्थं । ग्रंथमे शुद्धरसभाव-गूढ़ अनन्यरसश्रीगोकुलेशजूके भगवदि मे प्रकाश ह्याय, etc., etc. संवत् १८६४ ।

8805

8436. भगवत्सेवाकौमुदी *Bhagavatsevākaumudī.*

By Lālu Bhaṭṭa.

Substance, country-made paper. 11×5 inches. Folia, 13. Lines, 17 on a page. Extent in ślokas, 208. Character, modern Nāgara. Date, Saṁvat, 1933. Appearance, fresh. To the end of the first prakaraṇa.

A Vaiṣṇava work on devotion to God, in its various aspects.

Beginning:

श्रीगोपीजनवल्लभाय नमः ।
श्रुतिसिद्धरसाम्भोधिरासमण्डलमण्डनं ।
गोपिकानयनानन्दं गोवर्द्धनधरं भजे ॥
श्रीवल्लभपदाम्भोजरजांसि प्रणमाम्यहं ।
यत्सम्पर्काद् व्रजाधीशे मम सेवां जनोश्नुते ॥
श्रीविट्ठलेश्वरं वंदे कृष्णसेवाप्रवर्त्तकं ।
येन गोवर्द्धनाधीशः सख्येनात्मवशीकृतः ॥

अथ पुष्टिभक्तिमार्गीयसेवा किंप्रमाणमूलिका
इत्यादि विचार आरभ्यते। तत्र सर्व्ववेदे—

इतिहासानां "निगमकल्पतरोर्गलितं फलं" इत्यादिवचःसहस्रैः सर्व्व-श्रुतिसारभूतत्वात् निखिलप्रमाणमूर्द्धन्यतासमाधिभाषारूपस्य श्रीभागवतस्य अभ्युपेया। निबन्धे च "वेदाः श्रीकृष्णवाक्यानि" इति सन्दर्भे उत्तरं पूर्व्व-सन्देहवारकं परिकीर्त्तितमित्यनेन सर्व्वसन्देहवारकत्वं श्रीभागवतस्य निरणायि। तत्र च 'श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम्॥ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नव-लक्षणा। श्रूयते भगवत्यध्वा तन्मन्येऽधीतमुत्तमम्' ॥

इत्यनेन नवविधभक्तेरेव मुख्यतया कर्त्तव्यतोपश्यिते।

End:

'भगवद्वाक्यं भजतां मुकुंदो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमि'त्यादिवचःसहस्रैः मोक्षाधिकत्वाच्चेत्यलं विस्तरेण॥

Colophon:

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाधीशश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालुभट्टेन रचितायां भगवत्सेवाकौमुद्यां प्रथमं प्रकरणं।

Post-colophon:

मि० मार्गशीर्ष कृष्ण १० सं १९३३ काशीमध्ये व्रजभूषणदास-गुर्ज्जर हीसाबालेन लिखितं। अक्षरकी चल कृपादृष्ट क्षमा करे।

8806

1805. बहिर्मुखमुखमर्दन

Bahirmukhamukhamardana.

By Jayagopāla Bhaṭṭa, son of Cintāmaṇi Dīkṣita, a Disciple of Viṭṭhaleśa.

Substance, country-made paper. 10½×4½ inches. Folia, 174. Lines, 7 on a page. Extent in ślokas, 2600. Character, Nāgara. Date, Sam. 1910. Appearance, fresh. Prose and verse. Generally correct. Complete.

80

A controversial Vaiṣṇavite work with its usual doctrine of Kṛṣṇa as the Supreme Deity, and His devotees as even superior to Brahmā.

Beginning:

श्रीगणेशाय नमः ॥

ननु जीवैः किं कर्त्तव्यमिति चेत्, अत्रोच्यते पूर्णपुरुषोत्तमभजनमेष कर्त्तव्यमिति। कोऽसौ पूर्णपुरुषोत्तमो यस्य भजनं भवतोपदिश्यत इति चेत्, सारस्वतकल्पो श्रुतीनामनुग्रहार्थं प्रादुर्भूतः सर्व्वावतारोऽस्मत्प्रभुः श्रीकृष्ण एवेति गृहाण। पुरुषोत्तमत्वं च शुद्धसत्त्वाव्यवहितत्वे सति आनन्दरूपाकारवत्त्वं ॥

It ends thus:

आस्ते न धीरधीरस्य भङ्गः सङ्गरकेलिष्विति न्यासादनेकतस्तत्-उत्कर्ष-कल्पना गलहस्तितव्येति न क्वचिदपि व्रजराजकुमारानुचराणामस्माकं पराजयः ॥ एवं सति सिद्धे सारस्वतकल्पीयैतत्कल्पीयश्रीकृष्णस्वरूपस्य सर्व्वोत्कर्षे सर्व्वसेव्यत्वं अपि तत्रैव विश्राम्यति इत्यानन्दसन्दोहतुन्दिलाशयमिति सर्व्वं चतुरस्रं ॥

तैलङ्गाभरणश्रीचिन्तामणिदीक्षिताङ्गजातेन।
जयगोपालेन कृता कृतिरेषा ६ चन्द्रतारकं जयतात् ॥
मूर्द्धाञ्जलिं ननु विधाय विधाय भूयो
भूयः कृपालुषु महत्सु निवेदयामि।
यत् किञ्चिदत्र मयका लिखितं भवद्भिः
तत् पुष्टिमार्गपथिकैः परिशोधनीयम् ॥
न दृष्टा यैर्वेदा न च जगति साङ्गोपनिषदः
पुराणाख्यानाद्या न च विविधविद्याः परिचिताः
मदीयेऽस्मिन् ग्रन्थे ददति ननु दोषं त इह चेत
तदा तेभ्यो दत्तः शपथ इह देव विजयताम् ॥

प्रथममिह विदूरात् बलानातिप्रगल्भै-
स्तदनु सविधमाप्तैः कर्त्तुमेतस्य भङ्गं ।
अथ हृदि धृतकम्पैः कैरपि स्फीतभारा-
ज्जनकधनुरिवेदं पुस्तकं स्पृश्यते नो ॥

Colophon:

इति श्रीमद्वल्लभाचार्य्यचरणकमलैकतानमानसेन श्रोमन्महाप्रभुविट्ठलेश्वर-कृपाकटाक्षोद्गच्छसुबुद्धिना श्रीमच्चिन्तामणिदीक्षितात्मजेन मठपतिकुलरत्नेन जयगोपालभट्टेन कृतो बहिर्मुखमुखध्वंसनापरपर्य्यायो बहिर्मुखमुखमर्द्दनग्रन्थः सम्पूर्णः ॥

श्रीरस्तु मिति चैत्र वदी १० रविवार लिखितं बलदेवगुजरातिचातुरवेदी मोढ़ ॥ संवत् १९१० शुभं भवतु ॥

1321. श्रुतिरहस्य *Śrutirahasya.*

By Giridhara Gosvāmī with the commentary प्रकाश *by Rāmakṛṣṇa Bhaṭṭanetā.*

Substance, country made paper. 12½×6½ inches. Folia, 117. Lines, 10 on a page, in the average. Extent in ślokas, 3500. Character, Nāgara. Date, Sam. 1887. Appearance, tolerable. Prose. Generally correct. Complete. In the Tripāṭha form, that is, the text in the middle and the commentary above and below.

Giridhara, the author is a descendant of Yadunātha, one of the seven sons of Viṭṭhaḷa, the son of Vallabha, the founder of the sect.

Colophon of the text: इति श्रीप्रभुचरणात्मजमहाराज-श्रीयदुनाथकुलोद्भव-गोस्वामिश्रीगिरिधरविरचितं श्रुतिरहस्यं समाप्तम् ।

See also leaf 114A.

The commentator, Rāmakṛṣṇa Bhaṭṭanetā was a Tailaṅga Brāhmaṇa. He lived at Gokula and was a disciple of Giridhara.

Colophon of the commentary:

इति श्रीमन्निजचरणनखचन्द्रप्रभाच्छटानिरस्तसमस्तजीवान्धकार-श्रीवल्लभाचार्य्यावतारकुलकमलविकाशकनिजशरणतापहरण-श्रीमद्गोस्वामि-श्रीगिरिधरचरणकोकनदमधुपायमानमानसतैलङ्गजातीयगोकुलग्रामस्थनेतोप-नामक-रामकृष्णभट्ट-प्रकाशित-श्रुतिरहस्यप्रकाशः सम्पूर्णतामव्राजीत् ।

Post-colophon:

श्रीमदाचार्य्यवर्य्यचरणौ जयतः

मुनिवसुवसुकलानिधिवलिताब्दाश्विनमासबलक्षपक्षहरिवासरेऽलेखि रामकृष्णभट्टेन श्रीमन्महाराजश्रीमद्गुरुचरणारविन्दार्थं ।

The object of the book is to prove that the texts of Śruti make Vallabha the Puruṣottama or Para Brahma.

Leaf 9B Text.

अथ श्रीवल्लभाचार्य्या रूपाष्टकसमन्विताः ।
निगमोदितवद्रूपं वर्णयामि यथामति ॥

Commentary: पूर्णपुरुषोत्तमवत् श्रीमदाचार्य्याणामपि निगमप्रति-पाद्यत्वं इति ज्ञानेन तच्छरणमवश्यं गन्तव्यं ।

Leaf 11. Text: अथ स्वाचार्य्यप्रादुर्भावप्रतिपादकनिगमः प्रदृश्यते तैत्तिरीये आनन्दवल्ल्यां ब्रह्मविद्यत्परमित्यन्ता ॥ व्यक्षरब्रह्मज्ञानं साधनं परब्रह्मफलञ्च निरूप्य तदेषाभ्युक्तेत्यारभ्य तस्यैव व्याख्यानं कोषादिजगदुत्पत्तिपर्य्यन्तं निरूप्य रसात्मकपुरुषोत्तमप्राप्तिप्रस्तावे तत्-साधनीभूतमाचार्य्यस्वरूपं निरूपयति ।

66A. इत्यादिपूर्व्वोक्तश्रुतिस्मृतिश्रीभागवताद्यनेकप्रमाणसिद्धत्वात् श्रीमदाचार्य्याणां पुरुषोत्तमत्वं सिद्धं ।

The Text begins:

श्रीमुकुन्दरायो जयति ।—

नौमि श्रीगोपालं प्राकृतमात्राशेषधर्म्मरहितं ।
वेदैकसमधिगम्यं स्वाभाविकसर्वधर्म्मरहितम् ॥ १ ॥

वन्दे श्रीवल्लभाधीनान् स्नेहमार्गाब्जभास्करान् ।
निजान्तरङ्गभक्तेभ्यः स्वस्वरूपप्रदर्शकान् ॥ २ ॥
तथापि श्रीमदाचार्य्यकृपया मयि बोधितं ।
कृतं श्रुतिरहस्यं मे विद्वद्भिर्दर्शितं मया ॥

The commentary begins (though the leaves begin from 1 the first four verses and threefourths of the 5th are wanting. The last pāda of the 5th is):

श्रीश्रीमद्वल्लभाख्यो जगति विजयते कापि मूर्त्तिः कृशानोः ॥ ५ ॥

तर्कतोयनिधिशोषकारिणम् मायिकुम्भिमृगराजचारिणम् ।
शिष्यबोधविधयेऽवतारिणम् विट्ठलेशमहमाश्रये मुहुः ॥ ६ ॥

. . . . . .

. . . . . .

श्रीम च्छ्रुतिरहस्याख्ये सन्देहध्वान्तघारकम् ।
नेतोपाह्वः रामकृष्णः प्रकाशं कुरुते सुधीः ॥ १३ ॥
यद्यप्ययोग्य एवाहं ईश्वरोक्तिविचारणे ।
श्रीमदाराध्यचरणाः क्षम्यन्तां मम साहसम् ॥ १४ ॥

8808

10295. शुद्धाद्वैतमार्त्तण्डः *Śuddhāduaitamārtaṇḍa.*

By Giridhara.

With the commentary entitled Śuddhādvaitamārtaṇḍa-prakāśā—By Rāmakṛṣṇa Bhaṭṭa.

Substance, country-made paper. 18×7¼ inches. Folia, 20. In Tripāṭha form. Character, Nāgara of the 19th century. Appearance, fresh. Complete.

An interesting work on Vedānta of the school of Vallabhācārya.

Printed, ed. Chss. No. 97, Benares.

Beginning :

श्रीमदाचार्य्यचरणौ श्रीविट्ठलपदाम्बुजे ।
श्रीमतां यदुनाथानां श्रीमद्गिरिधरः सुधीः ॥ १ ॥
चरणाम्बुजकिञ्जल्करागान् प्रणिपत्य तं ।
शुद्धाद्वैतविचाराकं तनुते सुधियां मुदे ॥ २ ॥
द्विधा ज्ञानं तु यद्यत् स्यान्नामरूपात्मना मुहुः ।
ईशजीवात्मनोरपि कार्य्यकारणतोथवा ॥ ३ ॥
द्वीतं तदेव द्वैतं स्यादद्वैतं तु ततोन्यथा ।
सर्व्वं खल्विदं ब्रह्म तज्जलानिति पठ्यते ॥ ४ ॥
सर्व्वं ब्रह्मात्मकं विश्वमिदमाबोध्यते पुरः ।
सर्व्वशब्देन यावद्धि दृष्टश्रुतमदो जगत् ॥ ५ ॥
बोध्यते तेन सर्व्वं हि ब्रह्मरूपं सनातनम् ।
कार्य्यस्य ब्रह्मरूपस्य ब्रह्मैव स्यात्तु कारणम् ॥ ६ ॥
जन्माद्यस्येत्यादि-सूत्रैर्व्यासपादैर्निरूपितम् ।
यतो वेत्यादिव्याक्येषु वेदे स्पष्टं प्रतीयते ॥ ७ ॥
साकारं सर्व्वशक्तेयकं सर्व्वज्ञं सर्व्वकर्त्तृ च ।
सच्चिदानन्दरूपं हि ब्रह्म तस्मादिदं जगत् ॥ ८ ॥
जड़जीवान्तःस्थितानां यथा क्रमश उद्गमः ।
अग्नेर्यथा विस्फुलिङ्गास्तथा जीवोद्गमः स्फुटः ॥ ९ ॥
विसर्पिगुणचैतन्योऽणुर्जीवोंशो हरेः स्मृतः ।
जड़े चिदानन्दयोस्तु चित्यानन्दस्य सर्व्वशः ॥ १० ॥
तिरोधानं हरीच्छातो निबन्धादिषु वर्णितम् ।
आविर्भावे तु सर्व्वं हि ब्रह्मैवेति न संशयः ॥ ११ ॥
रमणार्थमिदं सर्व्वं ब्रह्मैव स्वेच्छयाभवत् ।
यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः ॥ १२ ॥
न विकारि तथा ब्रह्म व्यासैः सूत्रे निरूपितम् ।
सुवर्णस्याविकारित्वं कामधेनोर्मणेरपि ॥ १३ ॥

आविर्भावतिरोभावौ पदार्थानां यतस्ततः ।
नानित्यता तु विज्ञेया शास्त्रविद्भिर्विचक्षणैः ॥ १४ ॥
तिरोभावे तु कार्य्यं हि वर्त्तते कारणात्मना ।
आविर्भावे तु कार्य्यं हि यथा मृदि घटादयः ॥ १५ ॥

The Text consists of 96 ślokas.

End सूर्य्योदये शीतमपैति सर्व्वं
मार्गावलोको जलजप्रकाशः ।
तमोनिवृत्तिर्द्विजकर्मवृत्ति-
स्तथैव मार्त्तण्डनिबन्धबोधे ॥

Colophon: इति श्रीमन्मुकुन्दराय-सहजमाधुरीपरमानिर्व्वचनीय-सरसवदनतामरससुधाह्रदावगाहिश्रीमदाचार्य्यकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भवगोस्वामिश्रीगोपालजनुषा श्रीगिरिधरेण विरचितः शुद्धाद्वैतमार्त्तण्डः समाप्तिमभाषीत् ॥

The commentary begins:-

श्रीगोपीजनजीवार्तुजयति ।
श्रीमन्मुकुन्दरायाख्यश्रीमद्गोपाललालयोः ।
अङ्घ्री श्रीवल्लभाचार्य्यश्रीविट्ठलपदाम्बुजे ॥ १ ॥

श्रीमतां यदुनाथानां तदीयान्वयशोभिनां ।
श्रीमद्गिरिधराख्यानां पादपद्मे प्रणम्य हि ॥ २ ॥

शुद्धाद्वैतविचारे ये तैः श्लोकाः समुदाहृताः ।
तदाशया तान् विशदीकरवाणि यथामति ॥ ३ ॥

The commentary ends:

इति श्रीयदुनाथानां कुलचूड़ामणेर्गुरोः ।
श्रीमद्गिरिधरस्याङ्घ्रि-सरोरुहपरागलिट् ॥ १ ॥
रामकृष्णः स्वबोधाय व्यरचत्तत्कृपाबलात् ।
शुद्धाद्वैताख्यसिद्धान्तमार्त्तण्डस्य प्रकाशकम् ॥ २ ॥
यदिदं सदसद्वापि प्रोक्तं वाक्पर्य्यान्मयाज्ञ हि ।
तत्र श्रीवल्लभाचार्य्याः कृपयन्तु निरोक्षणाः ॥ ३ ॥

Colophon:

इति श्रीमद्खण्डपण्डिताडम्बरखण्डनप्रचण्डवचन-मरीचिश्रीमदाचार्य्यात्मजश्रीमत्प्रभुचरणात्मजश्रीमहाराजयदुनाथकुलकमल-विकाशकरश्रीमद्गोपालात्मजश्रीमद्गिरिधरचरणकमलमकरन्द-मधुपायमान-नेतोपनामकरामकृष्णभट्टविरचितः शुद्धाद्वैतमार्त्तण्डप्रकाशः समाप्ति-मगमत् ॥

संपूर्णं । शुभमस्तु ॥ श्रीरस्तु ॥—

8809

10513. आत्मस्वरूपविचार *Ātmasvarūpavicāra.*

By Rāmakṛṣṇa Bhaṭṭa.

Substance, country-made paper. 11×5 inches. Folia, 5. Lines, 9 on a page. Extent in ślokas, 90. Character, Nāgara of the 18th century. Appearance, fresh. Complete.

A work of the school of Vallabhācārya.

Beginning: श्रीगोपीजनवल्लभाय नमः ।

भाष्यकारहरिवल्लभार्य्यपच्छ्रीसरोजमकरन्दमद्भुतं ।
विघ्ननाशनविधौ पटीयसं कृष्णचन्द्ररतिसख्यदं नुमः ।
श्रीविट्ठलप्रभुचरणान् श्रीयदुनाथान् महाराजान् ।
श्रीपुरुषोत्तमचरणान् भगवद्वत्सलात्मजान् वन्दे ॥
श्रीयदुनाथकुलाम्बुधिकलानिधीन् सर्व्वसौभाग्यान् गोपालसूनुषर्य्यान् ।
गिरिधरचरणान् नुमः पैताम्बरिश्रीपुरुषोत्तमानां
पादाराधन्द्वयसंश्रयेण ॥
उच्छिष्टमेषात्र तदीयमादितो श्रीरामकृष्णोत्र लिलेख वै मुदा ।
शङ्करादिमतमादितः स्फुटं वर्ण्यते निजमतं तत् स्फुटम् ॥

The object of the work.

बालबोधविधये मयाधुनाचार्य्यपादयुगलावलम्बनः ।
बृहच्चिन्तामणौ प्रोक्तो विस्तृतो मतसंग्रहः ॥
शीघ्रबोधाय पश्यन्तु लघुचिन्तामणिं बुधाः ॥

It ends:

तस्माद्देहादिभ्यो विलक्षण एवात्मेति साधनाय बहव आद्युस्तेषां मतानामुपन्यासः प्रस्थानरत्नाकरे श्रीपुरुषोत्तमचरणैः कृतः, स एव मयानूद्यते। . . . . . असङ्घातः अस्त्रिगुणत्वात् विवेकित्वात् अविषयत्वात् असामान्यत्वाच्चेतनत्वात् अप्रसवधर्म्मित्वाच्च यन्नैवं तन्नैवं।

Colophon:

इति श्रीमद्गोस्वामिश्रीगिरिधरचरणशरणनेतोपनामकसागरस्थ-गोकुलस्थ-रामकृष्ण-भट्टाविर्भावितोयं आत्मनः स्वरूपविचारः।

8810

1591. प्रबोधकादम्बरी *Prabodhakādambarī.*

By Gokulanātha.

Substance, country-made paper. 12½×4½ inches. Folia, 21. Lines, 18 on a page. Extent in ślokas, 2300. Character, Maithili. Date (?). Appearance, old. Generally correct. Complete.

Last colophon:

इति महामहोपाध्यायः जगद्गुरुश्रीमद्गोकुलनाथ-उपाध्यायविरचिते प्रबोधकादम्बरीप्रकरणे प्रथमः प्रमाणोल्लासः परिपूर्णः।

End:

तौ तावदेतस्य वा अक्षरस्य प्रशासने गार्गि द्यावाभूमी विधृते तिष्ठत इति श्रुतिः। प्रशासनं दण्डभूतः श्रेयान् 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः' इति स्मृतिः। उत्तमः सर्व्वज्ञः, परमः सर्व्वोपास्यः। लोकत्रयमिति। लोकान्तरस्याप्युपलक्षणम्। आविश्य प्रयानेनावस्थित्य अव्ययः आगन्तुकाविशेषगुणशून्य ईश्वरः षड्भैश्वर्य्यसम्पन्नः

सङ्गतौ तावत् रौद्रमंशं प्रतिपादयन्तः आगमाः संवदन्त्येवमन्यदपि स्वयमूहनीयम् ।

ब्रह्मस्तम्बकदम्बडिम्बकलिते दग्धे जगत्कानने
येषां नैष ललाटकोटरगतो निर्व्वाति कालानलः ।
ते घक्केन्द्वलकाधिवासविकृतोत्तंसभ्रमत्पन्नगाः
शिप्यन्ते जलवेगजर्ज्जरजटाजालाः परंस्तार्णघः (?) ॥

ब्रह्माण्डानि हिरण्यगर्भगुरुभिर्गर्भैरपां सम्परे
मग्नानि प्रतिपालयन्ति कतिचिन्नीलत्विषः पूरुषाः ।
संवर्त्तानलहेतुभिर्भ्भसितसाद्वृतानि(?)यान्यन्यतः
तैरुद्भूलनमाचरन्ति विकटभ्राम्यज्जटाग्रा नटाः ॥

आपः पुण्यतमेसुपर्व्वसरितस्तोये प्रविष्टा क्षितिः
तीरे नीरजघानिलेषु पवनतेजः परे ज्योतिषि ।
घत्सेत्वस्तनुभूतपञ्चकपृथग्भावे च तानास्य मे (?)
भागोऽखण्डमेव येन सकलाः पश्यामि शून्या दिशः ॥

Maṅgalācaraṇa.

ब्रह्मस्तम्बारविन्दान्यधिरलविदलद्दिग्दलान्यप्रगर्भ-
भ्राम्यत्स्वर्भानुभृङ्गं ग्रहणसहबृहत्पुष्पवत् कर्णिकानि ।
अस्मिन्नानन्दलीलासरसि जड़तया घर्ज्जते घीतपङ्के
जायन्ते कस्य हेतोः पुनरपि घिलयं तानि कस्मात् प्रयान्ति ॥

किमियं अघनिगगनगोलनागभघनगीर्व्वाणभुघन-घनगिरिसरित्-सरस्वतीसृष्टिराकस्मिकी न भघत्येघ, भघन्त्यपि घा न कारणमपेक्षते किंस्विदुपादानकारणादि कारकगणमपेक्ष्योत्पद्यमानापि न कमपि कर्त्तार-मुपजीघन्ति, किमुत कर्त्तृप्रयत्ने परतन्त्रैरुपादाना(दि)भिस्तदुत्पाद्यते ।

8811

1811. भक्तिसिद्धान्तविवृति *Bhaktisiddhāntavivṛti.*

By Gokulanātha.

Substance, country-made paper. 8×4½ inches. Folia, 18. Lines, 8 on a page. Extent in ślokas, 270. Appearance, tolerable. Prose. Generally correct. Complete. Date, Sam. 1744.

This is a commentary, not as Hall says, on *Śāṇḍilya-sūtra*, but on eight verses on Kṛṣṇa Worship, by the Ācāryas of Vallabha's school. The eight verses are:

श्रावणस्यामले पक्षे एकादश्यां महानिशि ।
साक्षाद्भगवता प्रोक्तं तदक्षरश उच्यते ॥ १॥

ब्रह्मसम्बन्धकरणात् सर्व्वेषां देहजीवयोः ।
सर्व्वदोषनिवृत्तिर्हि दोषाः पञ्चविधा मताः ॥२॥

सहजा दोषकालोत्था लोकवेदनिरूपिताः ।
संयोगजाः स्पर्शजाश्च न मन्तव्याः कथञ्चन ॥३॥

अन्यथा सर्व्वदोषाणां न निवृत्तिः कथञ्चन ।
असमर्पितवस्तूनां तस्माद् वर्ज्जनमाचयेत् ॥४॥

निवेदिभिः समर्प्यैव सर्व्वं कुर्य्यादिति स्थितिः ।
न मतं देवदेवस्य सामिभुक्तसमर्पणम् ॥५॥

तस्मादादौ सर्व्वकार्य्ये सर्व्ववस्तुसमर्पणम् ।
दत्तापहारवचनं तथा च सकलं हरेः ॥६॥

सेवकानां यथा लोके व्यवहारः प्रसिध्यति ।
तथा कार्य्यं समर्प्यैव सर्व्वेषां ब्रह्मता ततः ॥७॥

गङ्गात्वं सर्व्वदोषाणां गुणदोषादिवर्णना ।
गङ्गात्वेन निरूप्या स्यात्तद्वदत्रापि चैव हि ॥८॥

In *Sampradāyapradīpa* No. 1314, leaf 37B, while

describing the religius career of Vallabhācārya, we have 'पुनः समयान्तरे श्रावणस्यामले पक्षे एकादश्यां महानिशि

नव श्लोकाः श्रीवल्लभं प्रति साक्षाद् भगवता उक्ताः' ।

The author was perhaps a son of Viṭṭhala, son of Vallabhācārya.

The commentary begins thus:

श्रीगोपीजनवल्लभाय नमः ।

नत्वा पितृपदाम्भोजं सर्व्वाभीष्टप्रदायकं ।
कृष्णवाङ्मूलकाचार्य्यवचो व्याख्यातुमुद्यतः ॥ १ ॥

यद्यपीश्वरवाक्यानामभिप्रायोऽतिदुर्गमः ।
मदीयोऽयमिति ज्ञात्वा ज्ञापयिष्यत्युदारधीः ॥ २ ॥

अथ यदैव श्रीगोकुलस्वामी स्वमनोऽभिलषित-प्रकारकशुद्धपुष्टि-भक्तिमार्गं प्रकटयितुं मनः कृतवान् तदैव स्वमुखारविन्दरूपाचार्य्याणामेव तत्प्रकटनसामर्थ्यं ज्ञात्वा भुवि प्राकट्यार्थमाज्ञां दत्तवान्, तदाचार्य्या अपि भगवदभिप्रायं ज्ञात्वा तदुक्ताज्ञाप्रकारेणैव स्वप्राकट्यं विधाय भगवदभिमत-प्रकारकं भक्तिमार्गं प्रकटितवन्तः। तत्र स्वमार्गीयभक्तिस्वरूपं स्वमार्ग-सेव्यस्वरूपं च स्वमार्गीयसेवाप्रकारकं च मार्गान्तरीयभजनसाङ्कर्य्या-भावार्थं वैलक्षण्येन प्रमाणपूर्व्वकं निरूपितवन्तः। अन्येऽपि तत्तच्छास्त्रोक्ता धर्म्मा विवेकादयः चतुष्टयपुरुषार्थरूपास्त्यागादयश्च तत्तन्मार्गीयाः सन्ति। तेषां स्वप्रकटितपुष्टिमार्गविवेकादीनां च सन्देहाभावार्थं भिन्नत्वेन निरूपणं कृतवन्तः; तथापि यथा पूजामार्गे पूजार्थं तत्तन्मार्गोक्त-प्रकारेण सम्भावित-दोषनिवृत्तिपूर्व्वकं पूजाप्रकरणं निरूपितं, तथा स्वप्रकटितमार्गेऽपि सर्व्वदोष-निवृत्तिपूर्व्वकं सेवाप्रकारो न विचारित इति चिन्तया तद्विचारपरानाचार्य्यान् दृष्ट्वा स्वयं श्रीगोकुलेश मानन्दमात्रकरपादमुखोदरादिरूपेण प्रकटीभूय स्वसेवा-प्रतिबन्धकदोषनिवृत्तिप्रकारकं साधारणं कारणं तथा उपदिष्टवान् यथा अग्रेऽपि सेवायां यावज्जीवं दोषप्रवेशो न भवति। आचार्य्यास्तु भगवदुपदिष्टं स्वहृद्याधाय स्वकीयानपि ज्ञापयितुं भगवदुपदिष्टेन यथा सोकर्य्येण बोधो

भवति तदर्थं पद्यबन्धेन तत्र यस्मिन् मासे यस्मिन् पक्षे यस्मिंस्तिथौ यस्मिन् समये तद्ज्ञापनपूर्व्वकं वक्तुं प्रतिजानीते – श्रावणस्य etc., etc.

It ends thus:

भक्तिसिद्धान्तवाक्यानां श्रुतानां भगवन्मुखात् ।
स्वाचार्य्यैः पद्यबद्धानां स्वीयानां बोधसिद्धये ॥ १ ॥

व्याख्यानं कृतमाचार्य्यपादपद्माभिधेन मे ।
स्वाचार्य्यास्तेन तुष्यन्तु मयि निःसाधने स्वतः ॥ २ ॥

Colophon:

इति श्रीपितृचरणैकतानश्रीगोकुलनाथविरचिता भक्तिसिद्धान्तविवृतिः सम्पूर्णा ।

Post-colophon:

संवत् १७४४ धाम राम रा ।

8812

1332. निबन्धटीका *Nibandhaṭīkā.*

By Kalyāṇa Rāya.

Substance, country-made paper. 9½×4 inches. Folia, 30. Lines, 10 on a page. Extent in ślokas, 750. Character, Nāgara. Appearance, oldish. Prose. Generally correct.

At the end of the manuscript there are three lines in a different hand. *Granthasaṁkhyā* is given as 810.

On the blank page of the first leaf we have:—(in the same hand in which the manuscript is written)

निबन्धटीका श्रीकल्याणरायजी कृता ।

The *Nibandha* is a work of some authority, of the

Vallabha school, as would appear from a statement in *Prameyaratnārṇava*, No. 1324.

The commentary begins:

यः स्वीयभावेन विलज्जितानां मोदं दधाने विविधैर्विलासैः ।
दुग्धादिचौर्य्यैरपि सर्व्वसिद्धैः श्रीगोकुलेशोऽस्तु स मे प्रसन्नः ॥
वन्दे श्रीवल्लभाचार्य्यचरणाम्बु(ब्ज)द्वयं लसत् ।
यतो विन्दे व्रजाधीशपादाम्बुजमघापहम् ॥

The Text begins:

रूपनामविभेदेन etc., etc., etc.

The commentary quotes the *pratīkas* only.

The work treats of the usual topics of Vallabha's school.

The authorities consulted- काशीखण्ड, स्मृतिसारसमुच्चय, प्रह्लादसंहिता, पुरश्चरणचन्द्रिका, नारदपञ्चरात्र, ब्रह्मपुराण, स्कन्दपुराण, पद्मपुराण, ब्रह्माण्डपुराण—

8813

1429. आत्मवाद *Ātmavāda.*

By Gopeśvara.

Substance, country-made paper. 14×7 inches. Folia, 7. Lines, 15 on a page. Extent in slokas, 280. Character, Nāgara. Date (?). Appearance, fresh. Prose. Generally correct. Complete.

Beginning:

श्रीविट्ठलो जयति ।

प्रत्यक्षादिप्रमाणैर्यदगम्यं श्रुतिवाक्यतः ।
स्वतः प्रमाणभूतं यद् गम्यं तन्नः समाश्रयः ॥
नन्विदं असाम्प्रतं ईश्वरस्यानुमानगम्यत्वात्तथाहि न तत्र चाक्षुषं प्रत्यक्षं रूपाभावात्, नापि मानसं परात्मनः परेण मनसा प्रत्यक्षकारणाय

भात्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगत्वेन हेतुत्वस्या-
वश्यकतया ईश्वरे तदभावात तत्प्रामाण्यस्य ईश्वरसिद्धयधीनत्वम्।
इत्यादि ॥

The object of the work, leaf 7A.

अनधिगतार्थगन्तृत्वेनैव प्रामाण्यस्वीकारात्। नैयायिकमतादरस्तु नास्तिकादिदूषकत्वेन शिष्याणां भूषणधारणार्थं लाक्षाधारणवत् इदमभि-सन्धायोक्तमाचार्यैर्जन्मादिसूत्रभाष्ये इतरमतमनुपपत्तुमुक्तम् त्वौपनिषदं पुरुषं पृच्छामि केवलोपनिषद्धेतुत्वादुपेक्ष्यमिति तदेतन्निबध्य निष्कृष्टं

वेदाः श्रीकृष्णवाक्यानि व्यासमूत्राणि चैव हि।
समाधिभाषा व्यासस्य प्रमाणन्तु चतुष्टयम् ॥

इतरं पूर्व्वे सन्देहबाधकं परिकीर्त्तितम् इत्यनेन। अत एव, न च वेदादृते किञ्चिच्छास्त्रं ब्रह्माभिधायकमिति कौर्मे उक्तमिति सर्व्वश्रमं (?)।

It ends:

सर्व्वसाधनहीनेन कृपामात्रावलम्बिना।
कृतेनानेन प्रभवस्तुष्यन्तु मयि ते सदा ॥

Colophon:

इति श्रीबृन्मण्डनगोकुलोत्सवात्मकगोपेश्वरविरचितोय-
मात्मवादः सम्पूर्णः।

श्रीसिगोपाललालजी सदासहायजी—

8814

10277. वादकथा *Vādakathā.*

By Gopeśvara, son of Kalyāṇa Rāya.

Substance, country-made paper. 11¼×5 inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 250. Character, modern Nāgara. Date, Sam. 1931. Appearance, fresh. Complete.

A polemic tract directed against the rivals of Vallabhācārya.

Beginning :

श्रीगुरुभ्यो नमः ॥

विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत् ।
अशेषोपनिषद्वेद्यं परं ब्रह्म वयं स्तुमः ॥ १ ॥
निरस्य मतमासुरं श्रुतिशतैः सुतर्कैरपि
स्वकीयहरिवर्त्मनि निजजनोद्धृतवन्मुनाः (?) ।
कृपाजलधिराशया व्रजपतेरिहावातरं
स कोपि हरिर्वाक्पतिः स्फुरतु मे सदा सिद्धये ॥ २ ॥

इह खलु निखिलनिगमस्मृतिपुराणादिप्रमाणगणप्रतिपादितपरम-पुरुषार्थत्वपुरुषोत्तमभक्तित्वप्रत्यनीकसर्व्वालीकवादिप्रणीतत्वमायावादमहा-मिश्रविध्वंसनसहस्रकिरणायितकरुणाशालिश्रीवल्लभाचार्यविभाव सिद्धान्त-रहस्यरूपब्रह्मस्वरूपनिरूपकप्रतिघटविघटनपटुतरा श्रीमदस्मत्प्रभुचरणरचि-तानवद्यपद्यमवलम्ब्य विरुद्धवादिव्युदस्तये प्रस्तूयते ।

8815

1386. गोकुलेशलीलासुधासिन्धु

Gokuleśalīlāsudhāsindhu.

Substance, country-made paper. 11×5 inches. Folia, 70. Lines, 9 on a page. Extent in ślokas, 1180. Character, Nāgara. Date, Saṁvat 1909. Appearance, fresh. Verse. Generally correct. Complete.

A work of Vallabha's school. For the beginning and end, see Ulwar Extr. 378, p. 146.

It consists of 14 chapters :

3A. इति श्रीमद्गोकुलेशलीलासुधासिन्धौ श्रीमुखश्रीमदुक्तिमुक्तामये चतुर्दशकल्लोले प्रथमः फलपर्य्यवसायी लीलाश्रवणनिरूपकस्तरङ्गः ; 10B.

इति ० तृतीयः सर्व्वोत्तमभक्तलक्षणनिरूपकस्तरङ्गः ; 13B. ० चतुर्थो-यमुत्तमभक्तस्वभावनिरूपकस्तरङ्गः ; 16A. ० पञ्चमः प्रकृष्टभगवदीय-तारतम्यनिरूपकस्तरङ्गः ; 18B. ० षष्ठः दोषच्छित्युपपत्तिनिरूपकस्तरङ्गः ; 19B. ० सप्तमः तत्तदीयपरस्परप्रेमप्रसरणप्रकारनिरूपकस्तरङ्गः ; 20B. ० अष्टमोऽयमलौकिककृशरानिरूपकस्तरङ्गः ; 21B. ० नवमो जीवधातुविद्ध-निरूपकस्तरङ्गः ; 27B. ० दशमःसन्मार्गविवेचकस्तरङ्गः ; 29B. ० एकादशः पुष्टिमार्गफलानवधिकत्वप्रकाशकस्तरङ्गः ; 30B. ० द्वादशस्तल्लीलाकथन-पानकनिरूपकस्तरङ्गः ; 31A. ० त्रोयदशः श्रितभेदनिरूपकस्तरङ्गः ; 34B. ० चतुर्दशपटलः श्रीपुरुषोत्तमस्वरूपप्रतिपत्तिनिरूपकस्तरङ्गः ; 36B. ० पञ्चदशः पुरुषोत्तमप्राप्तिविशेषनिरूपकस्तरङ्गः ; 39B. ० षोड़शः भगवदीयानुसरणनिरूपकस्तरङ्गः ; 41B. ० सप्तदशः सावधानावस्थिति-निरूपकस्तरङ्गः ; 43A. ० अष्टादश आलस्यादिदोषनिरूपकस्तरङ्गः ; 44B. ० एकोनविंशोऽयमुत्तमभगवदीयलक्षणनिरूपकस्तरङ्गः ; 45B. ० विंशो भगवदीयरुच्यरुचिनिरूपकस्तरङ्गः ; 50A. ० एकविंशः प्रेम-पराक्रमनिरूपकस्तरङ्गः ; 51B. ० द्वाविंशो भक्तोपकाराधिक्यनिरूपक-स्तरङ्गः ; 53B. ० त्रयोविंशः कृपास्नेहपराक्रमनिरूपकस्तरङ्गः ; 54B. ० चतुर्व्विंशो मुख्यश्रीस्वामिनिर्गुणनिरूपकस्तरङ्गः ; 55B. ० पञ्चविंशस्तद्रूप-रुचिबीजनिरूपकस्तरङ्गः ; 60A. ० षड्विंशस्तदुत्कर्षनिरूपकस्तरङ्गः ; 62B. ० सप्तविंशो दुष्टजीवकृतार्थोपायनिरूपकस्तरङ्गः ; 66B. ० अष्टाविंशोयमलौकिकघाङ्निरूपकस्तरङ्गः ; 68B. ० एकोनत्रिंशो स-दोषभक्तोत्कर्षनिरूपकस्तरङ्गः ; 69B. ० तरङ्गार्थनिरूपकस्तरङ्गः ३० ।…

The last colophon:

इति श्रीमद्गोकुलेशलीलासुधानिधौ श्रीमुखश्रीमदुक्तिमुक्तामये श्रीगोकुलेशश्रीकल्याणभट्टसंवादे चतुर्दशकल्लोलः सम्पूर्णः। श्रीमद्-गोकुलेशोऽनेन प्रीयतां। लिखले न मेट्टी न बन्धुः दयासिन्धुर्दयासिन्धुः स पुरुषोत्तमः ॥

Post-colophon:

श्रीहरिः संवत् १९०१ वर्षे कार्त्तिकशुक्लपक्षे तुतिया २ शुक्रवासरे

लिखितं काशीमध्ये शुभं भूयात्। श्रीग्रन्थसंख्या १३४२। शुभमस्तु। श्रीकृष्णाय नमः। श्रीरामाय नमः॥

In the first five leaves the verses are numbered, but from the 6th leaf they are not so. Two different manuscripts seem to have supplemented each other, leaving a gap in which the colophon of the second chapter is lost.

8816

283B. It contains two works (A) त्रिमङ्गलवार्त्तिक *Trimaṅgalavārttika* and (B) its commentary. Rājendralāla has noticed this MS. under No. 3148.

The Text has 51 chapters and not 58 as Rājendralāla says, nor 58 as Aufrecht says.

The last colophon runs thus:

इति श्रीत्रिमङ्गलनाम्नि वार्त्तिके स्वरूपसुन्दरीतिलकरसमङ्गले परलोकपटोद्घाटनं नामैकपञ्चाशत्तमोध्यायः। शुभं भूयात्॥

The post-colophon statement:

श्रीः श्रीः श्रीः संवत् १९३० माघशुक्लदशम्यां १० भौमवासरे समाप्तम्।

It begins thus:

श्रीराधावल्लभो जयतु। श्रीगुरुचरणकमलेभ्यो नमः। अथ त्रिमङ्गलनामग्रन्थो लिख्यते॥

जय जयानन्दसिन्धो परमगुरो सर्वलोकाभिराम।
त्वत्पदकमलमकरन्द उरस्यमेव कामशिरोमणिः॥ १॥
यो यो दीर्घः कामः सकलो गम्यः शिरोमणेरन्तः।
हृदये सरसि प्रेम्ना जलेन सिञ्चावं—कमलम्॥ २॥
पदरजसो वन्दनतः सन्तापः संहृतः सकलः।
सहजैकदृशाश्रयो देहादवधूतपाप्मत्वात्॥ ३॥

सर्व्ववेदान् शास्त्रषट्कं साष्टादशपुराणकम् ।
अत्यगाधान् वर्णापत्तिमत्प्रभुः करुणानिधिः ॥ ४ ॥
यत्कृपालेशतः सर्व्वकार्य्यानुसारेण स्मृतः ।
भवाब्धिस्तन्तिमग्नोऽहं समाकृष्य समुद्धृतः ॥ ५ ॥
वह्नयब्धिमुनिचन्द्रे १७४३ऽब्दे सहजस्य प्रकाशने ।
हृदि श्रीसद्गुरोः सेवा पदाशाग्रहणानम ॥ (?) ६ ॥
कार्त्तिककृष्णा मायामुपदेशोदायि मुन्नस्य । (?)
आचिन्त्य वासुदेवः शुभं प्रवेशं व्यधात् हृदये ताः ॥ ७ ॥
तन्मन्त्रतेजसा जातः स्वनुरागो मयि प्रिये ।
संसारस्य सुखं यावत् नीरसं समदृष्टितः ॥ ८ ॥
यदा हृदयशुद्धत्वं जातं प्रियसहायतः ।
तद्वर्षे पौषकृष्णस्य द्वितीयायां कृपास्थितिः ॥ ९ ॥
मासाष्टकं यदातीतं प्रभुराश्चर्य्यमातनोत् ।
कृपाप्रबद्धा देहेऽस्मिन् मूलदेहस्मृतिप्रदा ॥ १० ॥
पित्रा स्मरति नो यद्वत् अहतो भुक्तये सुतः ।
तद्वद् भ्रमरतौ स्वीयं गृहं विस्मृतवानहं ॥ ११ ॥
ततोऽपि स्मरणं नाभून्मासद्वयमियाय च ।
वल्लभोऽतिकृपां चक्रे जाता मूलरतिर्मम ॥ १२ ॥
मूलप्रीतिर्यदोत्पन्ना संसारो नीरसो मम ।
मायां दुःखमयीमीक्षे सम्यक्तूं भाति न क्वचित् ॥ १३ ॥
पुनस्तद्ग्रिमवर्षेऽधिकं व्याकुलं मनः ।
वक्ष्येऽखिलं ब्रह्मवृत्तं संज्ञां कोऽपि न बुध्यति ॥ १४ ॥

It ends thus:

एतच्छुभश्रवणतः श्रवणानि सिद्धिं ।
संयान्ति हि श्रवणसारफलस्य लाभात् ॥
सङ्केतबुद्धिरखिलश्रवणस्य तस्य ।
श्रीसद्गुरोरुरसि यद्वरणौ सहायौ ॥ ७५ ॥

B. The commentary has the first leaf missing, and a good deal of information both as to the Text and its author is lost.

4A. इत्थञ्च चतुर्विंशमुख्या अवताराः नित्यं सुखं किमित्याकाङ्क्षया साधुशास्त्रेऽनुसरति। साधवस्ताघद् वैशेषिक-नैयायिक-पातञ्जल-साङ्ख्य-पूर्वोत्तरमीमांसकद्वय-चार्व्वाक-सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिक-दिगम्बरा इति द्वादशसूत्रदर्शनानुसारिणोऽन्ये च पाञ्चरात्र-पाशुपतहैरण्य-गर्भादयः साधान्तरभेदाः स्वस्वाभिमतां मुक्तिमुपदिशन्तो वेदार्थमेव व्याचक्षते। अपरेऽपि तत्तद्देशभाषाभिर्द्वादशमतान्तर्गतमेवार्थमाहुः। वेदार्थे त्वेकस्मिन् नो मतभेदः सम्भवति। न च विभिन्नपरिभाषा + + -स्तन्त्राण्येव वेदार्थभेदं द्योतयन्ति इति वाच्यं। भगवत्सङ्केतितानन्त-तात्पर्य्याय शक्तानाम् अनुलोमपरिणामार्थं प्रवृत्तेः। यतो न व्याख्यापरिणाम-लाभः, अतएव बृहदारण्यके तर्य्यामि ब्राह्मणे पृथिव्यग्नितेजोवायुाकाशादि-त्यचन्द्रतारकविद्युत्स्तनयित्नुसर्व्वलोकसर्व्ववेदसर्व्वयज्ञसर्व्वदेवभूतप्राणवाक्-चक्षुःश्रोत्रमनस्त्वक्तेजस्तमोरेत आत्मनां प्रेरक एतत् शरीर्य्यतैः (?)

. . . . . .

. . . . . .

4B. अभिभूताः प्रपञ्चेन ब्रह्माद्या न विदन्ति मामिति स्कन्द-पुराणं च उक्तमेवार्थं द्रढ़यति। एवमविद्याप्रवाहप्रवृत्त्या वेदं विहाय विविधसाधुशास्त्रप्रवृत्तौ मुमुक्षूणां मुक्तिमार्गाभावे सम्प्रति परमात्मा दृष्ट-सहजानन्दस्वरूपानन्ददृष्ट्या विद्याप्रवाहं प्रवर्त्तयन् कश्चिद्ध धीरः प्रत्यगात्मान-मैक्षदावृत्य चक्षुरमृतत्वमिच्छन्ति विभ्रत्यर्था "भक्तया मामभिजानाति यावान् यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"। अपरे वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्व्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा-हिता स्मृताः पितृदेवा मनुष्याणां वेदश्चक्षुः सनातनं। अशक्यश्चाप्रमेयश्च वेदशास्त्रमिति स्थितिः। उत्पद्यन्ते व्ययन्ते च यान्यन्यानि [च] कानिचित्॥ तान्यर्व्वाक्कालिकतया विष्ठुलान्यनृतानि चेत्यादिस्मृत्यर्थश्च व्यञ्जयन् श्रुतिसूत्रसङ्केतोद्धारणाय चतुस्त्रिंशोत्तरशतं सूत्राणि प्रणिनाय, तानि च परावृत्य शुद्धदृष्टौ च षण्ड्युत्तरशतश्लोकैः विवृतान्यप्यतिगम्भीराणीति

सूत्रच्छायाव्याख्यानाय त्रिमङ्गलाख्यं वार्त्तिकमारभमाणः स्वरूपानन्दं दृष्ट्वात्मागुरुपदः श्रीमद्गुरुपदवस्तुनिर्देशात्मकं मङ्गलमाचरति—जय जयेति।

. . . . . .

. . . . . .

5A. अत्रानन्दस्त्रिविधः परमानन्दः पूर्णानन्दः क्षुद्रानन्दश्चेति। तत्र परमानन्दः सच्चिदानन्दविग्रहः शुद्धात्माऽद्वितीयं ब्रह्मोच्यते। एषोऽस्य परमो लोकः एषोऽस्य परम आनन्दः एतस्यैवानन्दस्यान्यानि भूतानि मात्रा-मुपजीवन्ति को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यादित्यादि-श्रुतिभ्यः। पूर्णानन्दस्तु पूर्ण आनन्द इति व्युत्पत्त्या सहजात्मकर्मधिर-(?) गुरु-ब्रह्मदृष्टिप्र्यायः (?) यमभिप्रेत्य श्रुतिरानन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति आह। अयमेव स्वाङ्गरूपसखीनां बोधार्थमचिन्त्यशक्तया सहजानन्दनिरूपित-श्रुतिसङ्केतस्तन्त्राणां त्रिमङ्गलाख्यवार्त्तिकं विदधाति तमेतमर्थं परमात्मा स्वदृष्ट्या भूतार्थानुवादेन स्वाज्ञारूपाभिः श्रुतिभिः प्राह। तथा हि कठवल्ल्यां तावत् अविद्यायामन्तरे वे+यानाः स्वयं धीराः पण्डितं मन्यमानाः चन्द्रस्य मात्राः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः। स्वयं धीरा महान्तं विभुमात्मानं मत्वा धीरो न शोचति। अणुः पन्था वितरः पुराणः मा स्पृष्टोनु-वित्तो मयैव तेन धीरा अपियन्ति ब्रह्मवित् उत्क्रम्य स्वर्गलोकमितो विमुक्ता इत्यादि श्रुत्या धीरा गमनं विनैव स्वयमेव धीरा इति मन्यमाना न साम्परायः।

(5B.) प्रतिभाति बालं प्रसाधनं वित्तमोहेन मूढं अयं लोको नास्ति पर इति मानी पुनः पुनः वशमापद्यते मे इति श्रुतिस्थमृत्युवाक्यं श्रुतिस्थन-चिकेतसम्प्रति स च परलोकः श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः, आश्चर्य्यवक्ता कुशलोस्य लब्धा आश्चर्य्यज्ञाता कुशलोनु-शिष्टः। अस्य यल्लोकस्य वक्ता आश्चर्य्यो विचिन्त्य शक्तिः मयैवानुवित्त इत्युक्तत्वात् अस्य लब्धा कुशल आनन्दात्मा धीरः।

6A. जिज्ञासामुत्पादयन् परमात्मा समाहृतवेदार्थानां सूत्राणां त्रिमङ्गलाख्यवार्त्तिकमचिन्त्यशक्त्या धीरद्वारा प्रवर्त्तयामास।

7A. क्षुद्रानन्दस्तु ... ...

तदेव विषयसुखं क्षुद्रानन्द इत्युच्यते। यदा तु परमानन्दात्मानुग्रहेण ज्ञानं

भवेत्तदा काण्यानां ब्रह्मलोकान्तविषयाणां तुच्छत्वबोधादकामहतश्रोत्रियस्य चित्तवृत्तिशान्तिलक्षणं सुखमेव नित्यमस्ति इति। उक्तञ्च श्रीभागवते

. . . . . .

. . . . . .

अत्र वेदार्थव्यक्तिः सम्बन्धः। भगवत्पदस्वरूपनिरूपणम् विषयः। सर्व्वानर्थनिवृत्त्या भ[ग]वत्स्वरूपलाभः प्रयोजनम्। तत्कामोऽधिकारी।

8A. ग्रन्थकृत् स्वीयं वृत्तान्तं वक्तुमुपक्रमते वह्वयब्धीति। वह्वयब्धिमुनिचन्द्रेऽब्दे १७४३ वैक्रम इति शेषः। श्रीसद्गुरोः शुद्धात्मनः द्रष्टुर्यत् सहजं दृष्ट्याख्यं तस्य हृदि प्रकाशते इति स्नेहबहुरिव (?) सामान्याभासे जाते सति···इत्यादि—

8B. प्रभुकृपयेव इत्याह वल्लभ इति। अतिकृपां कृपास्थितावपि स्वरूपज्ञानात्मिकां।

The commentary is incomplete, coming to the end of the 7th chapter.

इति श्रीत्रिमङ्गलधार्त्तिकविवरणे परमार्थसारसूचनं सप्तमोऽध्यायः।

पूर्णा चैतत् आद्यं—ज्ञानरसमङ्गलम्।

8817

1309. नित्यकृत्य *Nityakṛtya.*

By Govinda, son of Dvārakānātha.

Substance, foreign paper. 9½×4¼ inches. Folia, 110. Lines, 8-9 on a page. Extent in ślokas, 2260. Character, Nāgara. Date, Sam. 1916. Appearance, fresh and new. Prose and verse. Generally correct. Complete.

A comprehensive and argumentative work on daily observances and ceremonies of Vaiṣṇavas of the school of Vallabhācārya.

It begins:

श्रीकृष्णाय नमः।

नत्वा श्रीवल्लभाचार्य्यान् गोविन्देन मया भृशम्।

नित्यकृत्यमिदं नाम विचार्य्य क्रियते पुनः॥ १॥

उडुपेन यथा कश्चित् सागरं तर्त्तुमिच्छति ।
तथैव संस्कृतं कर्त्तुं प्रवृत्तोऽल्पमनीषया ॥ २ ॥
यद्यप्ययोग्य एवास्मि करणे पितृकृतेरहं ।
कृपया तातचरणा मह्यं दास्यन्ति योग्यताम् ॥ ३ ॥

It ends:

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥ १ ॥
एतान् विचार्य्य कार्यकरणे कदापि क्लेशितो नो भवेत् ।
हरिस्तु भगवानेवास्ति परं यदा भक्तो भक्तिमान् तदा का चिन्ता ।
एवं चित्तं स्थिरीकृत्य ह्यस्याश्रयविवर्जितम् ।
कर्त्तव्या वैष्णवैः सेवा कथया स्मरणेन च ॥
पितृसूक्तिं समुच्छ्राय भाषमुक्ताः स्फुटीकृताः ।
बुधा भक्ताश्च ता धृत्वा वितापास्ते भवन्तु वै ॥

Colophon: श्रीहरिः । इति श्रीमद्गोकुलचन्द्रचरणनलिनचञ्चरीकेण प्रेममकरन्दं पायं पायं भक्तीभूय विस्मृतान्यरसेन श्रीद्वारकानाथतनुजेन श्रीगोविन्देन विरचितो नित्यकृत्यग्रन्थः समाप्तः ।

Post-colophon: शुभम् । श्रीसंवत् १९१६ मीति माघमासे शुक्लपक्षे षष्ठी ६ रविवासरे ॥

8818

884. अनुबन्धदर्शन *Anubandhadarśana.*

By Hariyaśāḥ, son of Ṭhākuradāsa.

For the manuscript, see L. 1785.

8819

2018. अष्टादशरहस्य *Aṣṭādaśarahasya.*

Substance, country-made paper. 13×4½ inches. Folia, 11. Lines, 10 to 12 on a page. Extent in ślokas, 400. Character, Nāgara. Date, Sam. 1826. Appearance, old and discoloured.

Beginning :

अयं चेतनः अनादिकर्म्मप्रवाहेण संसारमहार्णवे निमग्नः। अज्ञानेनात्मानमज्ञात्वा तेनाज्ञानेन हेतुना अहंकारममकारयुक्तः सन् अहंकारममकारहेतुभ्यां रागद्वेषपरवशः सन् कारणभूताभ्यां रागद्वेषाभ्यां पुण्यपापरूपाणि कर्म्माण्याचरन् पुण्यपापरूपहेतुभिः सुखदुःखानुभवोपकरणशरीराणि बिभ्रत्तापत्रयदुःखपरंपरां निरन्तरमनुभवन् कर्म्मपरतन्त्र[:] सन् संसरति। एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्म्मभिर्जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते।

The 18 rahasyas are :

2A, अर्था अष्टादश, ते—(१) प्रयत्नत्वं, (२) प्रपत्तिनैष्ठिकत्वम्, (३) निर्भरत्वं, (४) उपायशून्यत्वम्, (५) पारतन्त्र्यम्, (६) अप्राकृ[त]त्वम्, (७) एकान्तित्वम्, (८) नित्यरङ्गित्वम्, (९) परमैकान्तित्वम्, (१०) संबन्धनस्वरूपत्वम्, (११) शेषभूतत्वम्, (१२) शेषवृत्तिपरत्वम्, (१३) नित्यशूरत्वं, (१४) मुमुक्षुत्वम्, (१५) अधिधिगोचरत्वम्, (१६) पराकाष्ठत्वम्, (१७) उपाय-स्वरूपज्ञानत्वम्, (१८) आत्मारामत्वम्।

End : इति श्री अष्टादशरहस्यं संपूर्णं समाप्तम्।

Post-colophon : पुस्तकं श्रीमाहात्रार्षानुजीविनः कृष्णदासस्य—

ऋतुनयनवस्विन्दौ वर्षे मासे च फाल्गुने।
सभूगजत्रयोदश्यां लिखितं पुस्तकं शुभम्।

8820

1113. वैष्णवसिद्धान्तवैजयन्ती

(प्रकाशिकासहिता)

Vaiṣṇavasiddhāntavaijayantī (with Prakāśikā).
By Rāghavendra Muni.

Substance, country-made paper. 14×7½ inches. Folia, 98. Lines, 18 on a page. Character, Nāgara. Appearance, new. Prose and verse. Generally correct. Incomplete at the end.

For a full manuscript of the work, see L. 2108.

8821

8195. **मोक्षलक्ष्मीविलास** *Mokṣalakṣmīvilāsa.*

Being a commentary on Jābālopaniṣad.

By Vallabha.

Substance, country-made paper. 9½×4½ inches. Folia, 43. Lines, 12 on a page. Character, Nāgara of the 18th century. Appearance, old and discoloured. Incomplete at the end.

Beginning :

श्रीगणेशाय नमः ॥ etc.

विघ्नानशेषाननिशं निघ्नन्न्यायादनेकधा ।
विघ्नराजः सदा पायात् त्रिपुरघ्नाभिपूजितः ॥

उमासहायमोमर्थमेकमक्षव्ययान्वितम् ।
अक्षरं महतो हेतुं धीनुदं शिवमाश्रये ॥

यत्पादपद्मस्मरणात् ज्ञानश्रीयशसां निधिः ।
नरो भवति तान् वन्दे वासुदेवेन्द्रदेशिकान् ॥

गुरोरनुग्रहात् साक्षात् परमश्रेयसे नृणां ।
सम्यक् स्मृत्यर्थमखिलं पुराणैरधिगम्य च ॥

श्रीवल्लभेन क्रियते काशीं नत्वोपबृंहणैः ।
मोक्षलक्ष्मीविलासाख्या व्याख्या जाबालसुश्रुतेः ॥

बृहस्पतिर्देवाचार्य्य उवाच···पृष्टवान् ।—

8822

10512. **सर्वोत्कृष्ट** *Sarvotkṛṣṭa.*

By Gosvāmī Giridhara.

Substance, country-made paper. 11×5 inches. Folia, 9. Lines, 9 on a page. Character, Nāgara of the 19th century. Appearance, fresh. Complete.

It belongs to the school of Vallabha and proves Śrīkṛṣṇa to be the Supreme Deity.

Beginning :

श्रीमदाचार्य्यवर्य्यश्रीमते वल्लभाय हरये नमः ॥

आनन्दाश्रुवर्षणेन जनतातापाग्निनिर्वापकं

संसारार्णवशोषिशोणनयनं मायामतध्वंसकं ।

साकारश्रुतिगोचराद्वयबृहद्ब्रा(दा)र्थसंस्थापकं

श्रीश्रीवल्लभसेवनारसमयं श्रीवल्लभाय्यं नुमः ॥

Colophon :

इति श्रीमद्गोस्वामि-श्रीगिरिधराचार्य्यरचितोयं श्रीकृष्णस्य सर्व्ववेदान्तप्रतिपाद्यत्वप्रतिपादनपूर्व्वकं सर्व्वोत्कृष्टनामकोयं ग्रन्थः ॥—

The colophon is written in a different hand.

8823

10268. सत्सङ्गनिर्णय *Satsaṅganirṇaya.*

By Haridāsa.

Substance, country-made paper. 11×5 inches. Folium, one. Lines, 10 on a page. Extent in ślokas, 24. Character, modern Nāgara. Appearance, fresh. Complete.

A short work of the school of Vallabha, on company of pious men which gives one the knowledge of Brahman.

Colophon :

इति श्रीवल्लभाचार्य्यकृपामात्राभिकाङ्क्षिणा ।

हरिदासेन विहितो मुदा सत्सङ्गनिर्णयः ॥

संपूर्णः ॥

Beginning :

अथ सत्सङ्गनिर्णयो लिख्यते—

यथा जलात्तु प्रसृतं सर्व्वत्रैव च तिष्ठति ।

अतएव प्रयत्नेन लभ्यते खननादिना ॥

प्रयत्ने तारतम्येपि दृश्यते भूमिजे विदा ।

कचिच्छीघ्रं प्रकटति कचित् कालेन भूरिणा ॥

तथा ब्रह्म व्यापकत्वात् सर्व्वत्रैव हि तिष्ठति ।
ज्ञानिनां तत् प्रयत्नेन प्रकटीभवति स्वतः ॥

8824

10291. निबन्धशास्त्रार्थप्रकरण

Nibandhaśāstrārthaprakaraṇa.

Substance, country-made paper. 11½×5 inches. Folia, 7. Lines, 9 on a page. Character, modern Nāgara. Appearance, fresh. Incomplete.

Called on the obverse of the first leaf:

अथ निबन्धशास्त्रार्थप्रकरण-मूल—

The leaves are marked with the letters निबमू० ।

Evidently a work of the school of Vallabha shewing that all Śāstras (including the philosophical systems) point to God Hari.

Beginning:

श्रीकृष्णाय नमः ।
नमो भगवते तस्मै कृष्णायाद्भुतकर्मणे ।
रूपनामविभेदेन जगत् क्रीड़ति योगतः ॥

The object of the work:

सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः ।
भवान्तसम्भवा दैवात्तेषामर्थे निरूप्यते ॥
भगवच्छास्त्रमाधाय विचार्य्य च पुनः पुनः ।
यदुक्तं हरिणा पश्चात् सन्देहविनिवृत्तये ॥
एकं शास्त्रं देवकीपुत्रगीतम्
एको देवो देवकीपुत्र एव ।
मन्त्रोप्येकस्तस्य नामानि यानि
कर्माप्येकं तस्य देवस्य सेवा ॥

इत्याकलय्य सततं शास्त्रार्थसर्व्वनिर्णयः ।
श्रीभागवतरूपञ्च त्रयं वच्मि यथामति ॥
वेदान्ते च स्मृतौ ब्रह्म लिङ्गं भागवते तथा ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥
त्रितये त्रितयं वाच्यं क्रमेणैव मयात्र हि ।
वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ॥
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।
उत्तरं पूर्व्वसन्देहवारकं परिकीर्त्तितम् ॥
अविरुद्धं तु यत्तस्य प्रमाणं तच्च नान्यथा ।
एतद्विरुद्धं यत् सर्व्वं न तन्मानं कथंचन ॥
अथवा सर्व्वरूपत्वात् नामलीलाविभेदतः ।
विरुद्धांशपरित्यागात् प्रमाणं सर्व्वमेव हि ॥

8825

10288. वल्लभाचार्य्यभगवत्त्वनिरूपण

Vallabhācāryabhagavattvanirūpaṇa.

By Viṭṭhala Rāya.

Substance, country-made paper. 10½×5 inches. Folia, 8. Lines, 9 on a page. Extent in ślokas, 112. Character, Nāgara. Date, Saṁvat 1934. Appearance, fresh. Complete.

It proves Vallabha to be an incarnation of God.

Colophon:

इति श्रीमद्गोस्वामिदामोदरतनुज-श्रीविट्ठलरायविरचितं श्रीमद्-वल्लभाचार्य्याणां साक्षाद्भगवत्त्वनिरूपणं समाप्तिमगात् ।

Post-colophon:

व्रजभूषणदासेन लिखितं । संवत् १९३४ आश्विनकृष्ण ३ ।

Beginning:

भजे श्रीवल्लभाचार्य्यान् समस्तकरुणार्णवान् ।
सुधानिधिरभूद्यार्विर्यतः श्रीविट्ठलेश्वरः ॥

अथ चतुर्षु युगेषु यदा धर्म्मनिवृत्तिरधर्म्मवृद्धिश्च स्यात् तदा तदा धर्म्मरक्षार्थमधर्म्मनिवृत्त्यर्थञ्च भगवदवतारा भवन्ति—

Conclusion:

वल्लभपदस्य प्रियवाचकत्वेपि प्रियत्वस्यानन्दरूपत्वात् आनन्दस्य च परब्रह्मरूपत्वात् वल्लभाचार्य्याणां साक्षात्परब्रह्मरूपत्वं। निर्विवादमिति दिक्।

8826

10284.

Substance, country-made paper. 12×5 inches. Folia, 5. Lines, 11 on a page. Extent in ślokas, 135. Character, modern Nāgara. Appearance, fresh. Complete.

Four short works.

I A review of the *Jaiminisūtra* in 42 ślokas.

3A, इति श्रीवल्लभाचार्य्यविरचिता पूर्व्वमीमांसाकारिका समाप्ता ॥

Beginning:

श्रीवल्लभाय नमः ॥

लौकिको वैदिकश्चैष मार्गो नित्यो द्विधा मतः।
प्रवाहेण स्वरूपेण नित्यत्वं च तयोः क्रमात् ॥
अर्थ + + + लोके हि शब्दोऽन्यस्मिन्निति स्थितिः।
जलाग्नयोरेव संरक्षा तयोः कार्य्या मनीषिभिः ॥

End:

उच्यते काम्यतायां तद्विधिबोध्यैकसाध्यता।
प्रयोजिका फलत्वे हि तस्मात् सुष्ठूक्तमार्थिकम् ॥

II

3B, इति श्रीविट्ठलेश्वरेण विरचितं भुजङ्गप्रयाताष्टकं पूर्णम् ॥

End:

भुजङ्गप्रयाताष्टकेनानुयातो
भुजङ्गे शयानं हरिं संस्तवीति।
रतिस्तस्य कृष्णे भवत्याशु नित्या
किमन्यैः फलैः फल्गुभिः सेवकस्य ॥

III

4A, इति श्रीविट्ठलेश्वरचरणानां शिक्षापत्रपद्यानि।

Then 15 ślokas, containing lessons to be always borne in mind by a Vaiṣṇava.

Beginning:

सर्व्वदा सर्व्वभावेन भजनीयो व्रजेश्वरः।
करिष्यति स एवास्मद्दैहिकं पारलौकिकम् ॥
अन्याश्रयो न कर्त्तव्यः सर्वथा बाधकस्तु सः।
स्वकीयेष्वात्मभावश्च कर्त्तव्यः सर्व्वथा सदा ॥

IV

5B (Last work), इति श्रीमद्गोपीजनवल्लभचरणैकतान-श्रीविट्ठलेश्वर-विरचितो गीताहेतुनिर्णयः समाप्तः ॥—

The central idea of *Bhagavadgītā* as shewn by Vallabhācārya.

Beginning:

पितृपादाब्जयुगलं प्रणमामि कृपामधु।
यत् कुञ्जं गोकुलेशेन स्वीकृतं कृपया स्वतः ॥
अतस्तद्वदनाम्भोजच्युतगीतामृतं बुधैः।
आविर्भावे हेतुमीशानुग्रहाद्विमृशाम्यहम् ॥ २ ॥
स्वयं स्वतत्त्वं हि हरिः पार्थायोपादिशद् यतः।
तदादौ धृतराष्ट्रस्याभक्तस्य वचसा न हि ॥

उपक्रमो युक्ततरः तत्पुत्रस्यापि वा तथा।
पार्थस्यापि विषादोयम् अतद्रूपत्व + तथा॥
उपदेशे हेतुतया स उक्त इति चेन्न हि।
विक्षेपात्मततः शान्त्याद्यरूपत्वादपि स्फुटम्॥

8827

10283.

Substance, country-made yellow paper. 12×5 inches. **Folia, 15. Lines 11 on a page.** Character, modern Nāgara. Appearance, fresh.

Three short works of the school of Vallabha.

I. 4B,

इति श्रीचिट्ठलदीक्षितविरचितो जन्माष्टमीनिर्णयः समाप्तः।

II. 5A,

इति श्रीचिट्ठल० राम[नवमी]व्रतनिर्णयः समाप्तः।

The two are concerned with the proper times of the festivals, Janmāṣṭamī and Rāmanavamī.

III. Begins

श्रीकृष्णाय नमः॥

प्रसीदन्तु सदा रासलीलारसपयोधिषु।
निःकलङ्ककलानाथी भगवद्वाचोस्मदीश्वराः॥ १॥

ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने।
लीला या पूज्यते सम्यक् सा तूर्य्ये विनिरूप्यते॥

सर्व्वसामर्थ्यवत्त्वेन यदीयं पूर्व्वबद्धरिः।
दद्यात्तदोद्धतिर्व्यर्था भवेदेतद्दानतः॥

यस्मादेतादृशे वास्य रूपं न + न्यथाकृति।
देवस्य संभवत्येव + + + तत्र देवता॥

अतोयमेव युक्तोऽत्र प्रकारो नापरो मतः।
स्त्रिय एव + + यातु शक्ता यस्मात् पुमान् हरिः॥

अतो हि भजनानन्दः स्त्रीषु सम्यग् विधार्य्यते ।
अहर्निशं चात पव रेमेंतर्बाह्यभेदतः ॥

Thus it concerns itself with the spiritual significance of the *Rāsa* festival, justified by quotations (along with their interpretations) from the 'Rāsa-pañcādhyāya of the *Bhāgavata*.

Colophon:

इति श्रीविट्ठलेश्वरविरचितो भगवानपीत्यस्य स्वतन्त्रलिखनं नाम समाप्तं ॥ शुभमस्तु ॥

8828

10280.

Substance, foolscap paper. 12½×5 inches. Folia, 9. Lines, 9 on a page. Extent in ślokas, 180. Character, modern Nāgara. Appearance, fresh. Complete.

An extract from the *Avatāravādāvalī*.

Colophon:

इति श्रीमद्वल्लभाचार्य्यचरणनलिनानतोत्तमाङ्गश्रीश्रीपीताम्बर-तनुजपुरुषोत्तमकृतावतारवादावल्यां श्रीभागवतस्वरूपविषयकशङ्कानिरासवाद-स्त्रयोदशः समाप्तः ॥—

Beginning:

वेदवेदान्तसारं यद्व्यासखेदनिवर्त्तकम् ।
महापुराणमूर्द्धन्यं श्रीमद्भागवतं स्तुमः ॥

अत्रेदं विचार्य्यते । श्रीभागवतमष्टादशपुराणान्तर्गतम् अतिरिक्तं वा ।

8829

10293. स्वामिनीस्तोत्रविवृति *Svāminīstotravivṛti*.

Being a commentary on a hymn to Rādhā (of the school of Vallabha).

Substance, country-made paper. 11×4½ inches. Folia, 30. Lines, 9 on a page. Extent in ślokas, 540. Character, Nāgara. Date, Saṁ. 1926. Appearance, fresh. Complete.

Colophon: इति श्रीमन्निजाचार्य्यदासानुदासविरचिता स्वामिनी-स्तोत्रविवृतिः सम्पूर्णा।

Post-colophon: समत १९२६ मीः श्रावण शुदी १५।—

Beginning:

श्रीकृष्णाय नमः।

स्वामिनीभावरूपैकदास्यभावपरायणाः।

विराजन्तां सदा मूर्द्धि प्रभवो विट्ठलेश्वराः॥

अथास्मत्प्रभुचरणाः श्रीमदनन्यपूर्व्वा मुख्यस्वामिनीस्तोत्रं स्वस्य तत्सम्बन्धसिद्धये कर्त्तुमभीप्सवोऽन्यसम्बन्धत्यागपूर्व्वकप्रभुसम्बन्धकृति-हेतुकभाववत्तया प्रकृतिसाम्येन नान्यपूर्व्वा मुख्यस्वामिनीसम्बन्धित्वेन स्वस्य तदाज्ञयैव एतद्दास्यार्थमाकारणं सेवाविशेषोपयोगित्वाच्च प्रदर्शयित्वा दास्यं प्रार्थयितुं द्वादशाङ्गसार्थकत्वाय द्वादशभिः श्लोकैः प्रार्थयन्ते। यदैवेति॥

8830

10272. सर्वात्मभावनिर्णय *Sarvātmabhāvanirṇaya.*

By Viṭṭhala, son of Gokulanātha.

Substance, country-made paper. 11¼×5 inches. Folia, 11. Lines, 10 on a page. Extent in ślokas, 250. Character, modern Nāgara. Appearance, fresh. Complete.

A work of the school of Vallabha. It holds and explains the view of God as pervading all aspects of life and at the same time shews the necessity of *tyāga* (or sacrifice) and *ārādhanā* (worship).

Beginning:

श्रीगणेशाय नमः॥

वन्दे श्रीवल्लभाधीशं अधीशगुणवन्दितम्।

भञ्जनं सर्व्वदोषाणां तर्ज्जनं त्रिदशद्विषाम्॥

भुवो भावात्मकं वन्दे यशोदोत्सङ्गसङ्गिनम् ।
सर्व्वात्मभावकरणं शरणं शरणार्थिनाम् ॥

ननु कोयं सर्व्वात्मभावो यो भजनानन्दाद्यापत्तिहेतुत्वेनोच्यते ?

तत्राहन्तामममताविषयफलानि भगवति भावः स इति चेन्न । तथा सति सर्वत्यागस्य अनावश्यकत्वेन तदुक्तिवैयर्थ्यापत्तेः सन्त्यज्य सर्वविषयानिति वाक्येन तस्यावश्यकत्वबोधनात् । अत एव पादमूलप्राप्तौ तस्य हेतुत्वमुक्तमाचार्य्यैः ; अन्यथा पादमूलप्राप्तिरेव न स्यादिति कथनेन च सर्व्वात्मना सर्व्वांशेन भावः स इति वाच्यम् । भगवद्दास्यार्थत्वेनापि देहादौ अंशतः प्रीत्यभावे निरध्यस्तदेहानामिव ईक्षामण्डनादिकरणाभावप्रसक्तेः । न च "अञ्जन्त्यः काश्च लोचने" इति वाक्येन तसांगोक्त्या(?) तथैवास्तीति वाच्यं, "त्वयि धृतासव" इत्यग्रिमवाक्यविरोधापत्तेः । किञ्च एवं सर्व्वथा भगवदर्थत्वेनापि देहादिरागाभावे ज्ञानिसमत्वमेतेषु स्यात् भजनानुपपत्तिश्च । etc. etc.

It ends with 12 ślokas in honour of the author's ancestors, God Śrīkṛṣṇa and the author himself.

Colophon: इति श्रीमद्गोकुलनाथात्मजविट्ठलरायविरचितो सर्व्वात्मभावनिर्णयः समाप्तः ॥

8831

10270.

Substance, foolscap paper. 11¾×5 inches. Folia, 4. Lines, 9 on a page. Character, modern Nāgara. Appearance, fresh.

I. *1 Colophon*: इति श्रीगोस्वामिश्रीगोकुलनाथात्मजविट्ठलराय-'वरचितो जीवस्वरूपनिर्णयः ।

Begins:

श्रीकृष्णाय नमः ॥ श्रीहरिः ॥

श्रीकृष्णपरमानन्दो रसात्मकतया मतः ।
स एष पुच्छभागेन चाक्षरः परिकीर्त्तितः ॥ १ ॥

तदन्ता अप्यनन्ताः स्युस्तत्र ब्रह्माण्डकोटयः ।
तदैच्छिको हि भेदोयं जड़जीवान्तरात्मनः ॥ २ ॥
आनन्दांशतिरोधानात् परिच्छिन्नत्वतः स्फुटं ।
व्यवहाराः प्रवर्त्तन्ते विधिषेधपुरःसराः ॥ ३ ॥

There are 8 ślokas in this.

II. 2B, इति श्रीगोकुलनाथात्मजविट्ठलरायविरचितो ब्रह्मस्वरूप-निरूपणम् ॥ (There are 16 ślokas).

Begins:

बालकृष्णं नमस्कृत्य विट्ठलेशञ्च सद्गुरुम् ।
द्वैताद्वैतविवेकोयं विट्ठलेन विचार्य्यते ॥
आत्मा वा अरे द्रष्टव्यः ततः श्रोतव्य इतिरूप (?) ।
श्रुत्यर्थतात्मसिद्धयर्थं साधनत्वे त्विदं स्फुटम् ॥ २ ॥
आत्मनोपासनं नित्यं आत्मना परिकीर्त्तितम् ।
श्रवणं मननं चैव निदिध्यासनमात्मनः ॥

III. 3B, इति श्रीगोकुलनाथात्मजगोस्वामिविट्ठलरायविरचितो जीवब्रह्मणोरैक्यनिरूपणम् ॥ (There are sixteen ślokas).

Begins:

श्रीमद्वृन्दावने रम्ये पुष्पिते यमितीन् स वै ।
वेणुं संवादयन् बालैः स्थितः कृष्णः प्रसीदतु ।
बालकृष्णं भजेन्नित्यं गोपिकारतिसंप्रदं ।
नृत्यन्तं गीतसंसक्तं हैयङ्गवप्रलोभितम् ॥ २ ॥
बालकृष्णपदाम्भोजचिन्तिताधिकसंप्रदम् ।
नत्वा श्रीवल्लभाचार्य्यान् कुर्व्वेद्वैतनिरूपणम् ॥ ३ ॥
एकमेवाद्वितीयं यद्ब्रह्मज्योतिः सनातनम् ।
अस्थूलं निर्गुणं शान्तं व्यापकं हृदि संस्थितम् ॥ ४ ॥
तद्वै शक्तिमात्मभूतां धर्म्मरूपासमाश्रिताम् ।
एकं नानात्ममन्विच्छन् बहुः स्यामिति तत्तथा ॥ ५ ॥

IV. Begins in 3B:

ब्रह्मर्षिर्वल्लभाचार्य्यो विट्ठलेशश्च तत्सुतः ।
सप्तर्षवत्सस्य सुतास्तद्वंश्याश्च स्वगोत्रिणः ॥ १ ॥
गोस्वामिनो गोकुलस्थाः श्रीगोवर्द्धनभृज्जुषः ।
अतस्तदीयानामार्षं प्रमाणं सर्व्वमेव हि ॥ २ ॥
गोविन्दच्छीत(?)परमानन्दनन्दचतुर्भुजाः ।
सूरकुम्भनकृष्णाय जगुर्मन्त्रविदुहिते ॥ (?)
व्राह्मे फाल्गुनामलपक्षस्य पुष्यक्षद्वादशीयुता ।
गोविन्दद्वादशी नाम महापातकनाशनी ॥
अस्मिन् गोविन्दपूजोपवासादिकं कार्य्यम् . . . . . .
. . . . . .
प्रथमगिरिधरोभूच्चानु गोविन्दरायः
तदनु सुतनुबालकृष्णजिद् गोकुलेशः ।
रघुपतियदुनाथौ श्रीघनश्यामसंज्ञो
गिरिधरतनयः श्रीविट्ठलेशाङ्गजाताः ॥
श्रीमद्गोकुलनाथ संशृणु वचः पूर्व्वं त्वयैव प्रभो
मालादूषकघावदूकविजयं कृत्वा च यं रक्षितः ।
धर्म्मस्तद्वदिहात्र वै पुनरपि श्रीद्वारकाधीश्वर-
स्थाने यः सुमहान् धर्म्मनिचयो दूरीकृतः श्रीमता ॥
एतत्कर्म्मकृता शृणुष्व भवता सर्व्वासु दिक्षु ध्रुवम्
कर्पूरोज्ज्वलरात्रिनाथविमलं स्वीयं यशो विस्तृतम् ।
मन्ये त्वां हि यशःस्वरूपिणमहं श्रीगोकुलेशः प्रभो
श्रीमद्वल्लभवंशभूषणमणे त्वं जीव बह्वीः समाः ॥

इदं पुस्तकं समाप्तम् ।

Here ends the ms.

8832

10265,

Substance, country-made paper. 10¾×5½ inches. Folia, 4. Lines, 9 on a page. Extent in ślokas, 70. Character, modern Nāgara. Appearance, fresh.

It contains a commentary on a portion of *Śruti-rahasya*, a work apparently embodying the views of the school of Vallabha on Śruti. The portion of it in question relates to the incarnation of God in Vallabha.

Beginning:

अथ श्रुतिरहस्यान्तर्गतः श्रीमहाप्रभुप्रादुर्भाव[:] लिख्यते। अत्र यजनं सेवैव। पूजा तु पुष्टिमार्गातिरिक्तमार्गे पूजायां विभूतिरूपो भगवान् सेव्यः। सेवायां तु साक्षात् पुष्टिपुरुषोत्तमः सेव्य इति महाभेद इत्यन्यत्र विस्तरः। यद्यत्र यजधातोः पूजार्थकतैव तर्हि ते ह नाकं महिमानः स च त इति विरोधापत्तिः। तत्र परमानन्दानुभवफलाभावात्। etc., etc.

End:

श्रीवामनावतारस्य भविष्यस्य तत्कर्म्मणश्च त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे पृथिवीमेष एताम्। यतो विष्णुर्विचक्रमे। इदं विष्णुर्विचक्रमे इत्यादिश्रुतिभिरुक्तत्वात् नित्यत्वे सत्येव संगच्छते। एवं सर्व्वलीलानां वेद्यमानत्वेन श्रुतीनामनुभवत्वाद्भविष्यतीनामपि भूतत्वेन निर्द्देश— इति दिक्।

8833

10266

Writings of the school of Vallabha.

Substance, country-made paper. 11×5 inches. Folia, 5. Lines, 10 on a page. Character, modern Nāgara. Appearance, fresh.

I.

Beginning:

गोपीजनवल्लभाय ॥

नाश्रितो वल्लभाधीशं न च दृष्टा सुबोधिनी।
नाराधि राधिकानाथो वृथा तज्जन्म भूतले ॥

Colophon:

इति श्रीहरिदासविरचितं जन्मवैफल्याष्टकं सम्पूर्णम् ॥

II.

Beginning :

ननु जन्मोत्सवलीलानुकरणे षष्ठ-दिन-कर्त्तव्यं षष्ठिकापूजनं जन्मदिन पवार्द्धरात्रे जन्मानुकरणोत्तरमेव कुतः क्रियत इति चेदत्रायं भावः— अनुकरणादि यथास्थितमेव कार्य्यम्। न त्वन्यथा। तत्र प्रथमपर्य्याये जन्मोत्सव एव कृतोऽर्द्धरात्रमारभ्य न तु जन्मदिवसोत्सवोपि स्नानतिलकादि-रूपः। षष्ठिकापूजनं तु तदा न जातमेव श्रीनन्दचरणानाम् उत्सवकरणानुपद-मेव करदानार्थमेव मथुरां गतत्वेन स्वगृहे स्थितत्वात्। etc. etc.

End :

'कृपयन्तु निजाचार्य्याः स्वदासे मयि सर्व्वदे'ति।

श्रीहरिरायविरचितः षष्ठिकापूजनविचारः सम्पूर्णः।

III.

Beginning : श्रीकृष्णाय नमः।

भक्ति[:]सर्व्वे लक्ष्यरूपा पुनस्तेषामाज्ञा दत्ता यूयं व्रजे वासं कुरुत भगवदङ्गीकारस्तत्र भविष्यति। भगवता स्वनेत्रतः सृष्टिद्वयं प्रकटितं दैवी आसुरी च। पुनरेतयोरङ्गीकारो न कृतः। तदनन्तरं कस्मिंश्चित् समये व्रजे रमणं कुर्व्वता विचारितं दैवसृष्ट्यास्तु अङ्गीकारः कर्त्तव्यः। तदा श्रीमदाचार्य्यै आज्ञां दत्तवान्, भवन्तो दैवे सृष्ट्यङ्गीकारं कुर्व्वन्तु। तदाचार्य्यास्तूष्णींभूय स्थिताः। पुनरपि आज्ञां दत्तवान्। तदा आचार्य्याः श्रीलक्ष्मणभट्टगृहे प्रकटीभूय तथैव कृतवन्तः। इदं प्रथमतः प्रादुर्भावचरितम्।

Then follows an enumeration of the dogmatic creeds.

End : श्रीमत्स्वामिन्योक्तम्। महाप्रभो मत्स्वरूपं द्वितीयं च देहं क्रीड़ां पश्यामि। तदा भगवता आज्ञा दत्ता। तदा श्रीमत्स्वामिनीहृदयतः श्रीराधिका प्रादुर्भूता।

Colophon : इति श्रीहरिदासोदितस्वमार्गानुक्रमध्यानप्रकारः।—

Post-colophon : श्रीहरिः। इदं पुस्तकं बंबइ-मध्येश्रीजीवनलाल-श्रीमहाराजके प्रति सा ली०।—

IV

Beginning :

अथ अग्निपुराणान्तर्गतपुरुषोत्तमसिद्धान्तः लिख्यते ।—

श्रीगोपीजनवल्लभाय नमः ॥

शृणु शौनकसिद्धान्तं पुरुषोत्तमसंज्ञिकं ।
द्विजो भक्तो हरेश्चैव अग्निबिन्दुः पुरा ह्यभूत् ॥
एकाङ्गं च तपस्तेपे पत्राहारी जितेन्द्रियः ।
पुरुषोत्तमक्षेत्रे च ब्रह्मकल्पे समाहितः ॥
तदा मधुवने प्राप्ते हरौ वैष्णवसंज्ञिके ।
तत्कुले भक्तक्षेत्रे हि प्रविष्टे द्विजसत्तमे ॥
वाणीं चैवं ततः श्रुत्वा श्रवणाय परो ह्यभूत् ।
सांवत्सरेण तपसा भक्तिस्ते समुपाश्रितः ॥
शय्याभोजनशृङ्गारा एते तु मम वल्लभाः ।
तैरेवं मयि कार्य्या च त्वया भक्तिरहर्निशम् ॥
एवं विद्या परा भक्तिः कर्त्तव्या मम तुष्टये ।
स्नेहमार्गेण कर्त्तव्या सेवनं मे हिताय च ॥
मासमेकेन तुष्यामि प्रेमभक्त्या न संशयः ।
बहुभिस्तपोयोगैः किं भक्त्यल्पो मम तोषणम् ॥ (?)

4B. स्नेहमार्गशते वर्षे ज्ञानी भवति सर्व्वथा ।
पुनरेवं तथोत्पत्तिर्भविष्यति कलौ युगे ॥
तदाहं द्विजरूपेण अवतीर्य्य च भूतले ।
स्नेहमार्गप्रवृत्त्यर्थं हिताय च कुले तव ॥
घोरे कलियुगे प्राप्ते प्रकटस्तु स्वयं वने ।
अग्निरूपो द्विजाचारो भविष्यामि ह वल्लभः ।
वल्लभो ह्यग्निरूपः स्याद्विट्ठलः पुरुषोत्तमः ।
पुष्टिमार्गप्रवक्ता च मायावादनिषेधकः ॥
पुष्टिप्रवाहमर्य्यादाप्रदाता च भविष्यति ।
तदीया सन्ततिः सर्व्वा मामकी तनुरेव च ॥

End :

एतानि कृतपुण्यानां भक्तानां पुरुषोत्तमे ।
एवं तव कुलख्यातिर्भविष्यति कलौ युगे ॥
वल्लभाचार्य्यमारभ्य विशेषो विट्ठलात् पुनः ।
एवमुक्त्वा तु तत्रैव हरिरन्तर्दधे स्वयम् ॥
सोपि भक्त्या हरिप्राप्तो ह्यग्निबिन्दुद्विजोत्तमः ॥

Colophon :

इति श्री-अग्निपुराणे भविष्योत्तरखण्डे श्रीपुरुषोत्तमसिद्धान्तः सम्पूर्णः ।—

5 Miscellaneous Vaiṣṇava schools.

8834

10224. आलुवन्दारु *Āluvandāru*

By Yāmuna Muni

With a Commentary

Substance, country-made paper. 12×5 inches. Folia, 10. In Tripāṭha form. Character, Nāgara. Appearance, fresh. Complete. Date, S. 1888.

An ode to Āluvandāru, otherwise called Yāmunācarya, who is considered as an incarnation of Viṣṇu. The first seven verses are taken up with obeisances to the succession of *Gurus* from Āluvandāru to Śaṭhakopasūri, who was the Guru of our author Yāmunamuni. (The names of the Gurus are Yāmunācārya, pupil of Rāmamiśra, Nāthamuni, Parāśara, Śaṭhakopasūri). The Text consists of 68 verses.

Beginning : ॐ श्रीमते रामानुजाय नमः ।

(T.) स्वादयन्निह सर्व्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥
नमो यामुनपादाब्जरेणुभिः पावितात्मने ।
विदिताखिलवेद्याय गुरवे विदितात्मने ॥

नमो चित्ताद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ etc.

(*Comm.*)

श्रीमत्समस्तकल्याणगुणात्मकः सर्व्वेश्वरः स्वाज्ञाः (?) रूपवेद-मार्गमतीत्य अनर्थे प्रवृत्तचेतनान् वीक्ष्य दयमानमनास्तदङ्गीकारार्थमिह लोके यामुनाचार्य्यरूपेणावतीर्य्य महाकुलप्रसूतसत्सम्प्रदायनिरतं श्रीराममिश्रमाश्रित्य वेदवेदाङ्गोपाङ्गशब्दतर्कोभयमीमांसादिसकलशास्त्राण्यधीत्य दिगन्तविश्रान्त-महाप्राज्ञो भूत्वा समस्तदुष्टकुदृष्टीर्निर्जित्य पण्डितपामरविभागरहितसर्वजनै-रपि वन्द्यमानः महादेशिको भूत्वा आकस्मिककृपया तत्कालीनसकल-लोकानुज्जीवयित्वा सकलेतरशास्त्राण्यनादृत्य वेदान्तशास्त्रमेव प्रवर्त्तयन् तदनन्तरं तावन्मात्रेण तृप्तिमनवाप्य इदानीन्तनसर्व्वजनोज्जीवनार्थं ग्रहीतुम-शक्यं वेदान्तार्थं सर्ववर्णाश्रमैरप्यधिकर्त्तुं स्तोत्ररूपेण चकार । तदादाविष्ट-देवतानमस्कारादिकस्य शिष्टाचारत्वात् गुरून् नमस्कृत्य मुमुक्षुभिः + दानु-संधेयमर्थपञ्चकं वेदान्तादिसकलशास्त्रप्रतिपाद्यत्वात् ... ...
... ...

यामुनमुनिरित्याह्वयो नामधेयं यस्य तं श्रीआलुवंदारुं वंदे नमस्करोमि ॥१॥

3A. (The Commentary on the 8th verse).

अथ यामुनमुनिः यन्मूर्द्धि इति आरभ्य स्तोत्रसमाप्तिपर्य्यन्तं नारायणं वर्णनाशक्यताद्यनेकप्रकारेण वर्णयति ।

The Text ends:—

अकृत्रिमचरणारविन्द प्रेम[प्र]कर्षावधिमात्मवन्तं ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्दत्तमचिन्तयित्वा ॥
यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

Colophon: इति श्रीयामुनाचार्य्यविरचितं आलुवन्दारु समाप्तम् ॥

Col. (Comm.) इति श्रीआलुवंदारुमूलव्याख्यानं समाप्तम् ॥

Post-colophon:
रामार्पणं । संवत् १८८८ ज्यैष्ठवदी १४ गुरुवासरे ॥

8835

8586. **सन्मनोरमा** *Sanmanoramā* or a commentary on the first verse of *Vivekacūḍāmaṇi* by Raghunātha Varmā Udāsīna, a disciple of Rāmadayālu Udāsīna, belonging to the Śikh community.

Substance, country-made paper. 12½×4½ inches. Folia, 13. Lines, 9 on a page. Extent, 300 ślokas. Character, Nāgara. Date, Saṁ. 1869. Fresh, complete.

Copied in Saṁvat 1869. Complete in 13 leaves. It explains the 1st verse of the *Vivekacūḍāmaṇi* which runs thus:

सर्व्ववेदान्तसिद्धान्तगोचरं तमगोचरं ।
गोविन्दं परमानन्दं सद्गुरुं प्रणमाम्यहं ॥

The last Colophon.

इति सद्गुणभूरुहारण्यश्रीमन्नानकोद्भवसद्वंशसद्भोक्तिकश्रीमद्रामदयालू-दासीनवर्य्यशिष्येण रघुनाथधर्म्मोदासीननिर्म्मिता विवेकचूड़ामणिप्रथम-पद्यव्याख्या सन्मनोरमाख्या समाप्ता ।

संवत्सरे १८८९ समै नाम आश्विनी मासे कृष्णपक्षे षष्ठ्यां शनिवारे लीखीत्वा मनोरथकायस्थ ।

8836

8440. **विष्णुधर्ममीमांसा** *Viṣṇudharmamīmāṁsā*

By Nṛsiṁha Bhaṭṭa, son of Soma Bhaṭṭa.

Substance, country-made paper. 11×4½ inches. Folia, 149. Lines, 11 on a page. Extent in ślokas, 4900. Character, Nāgara of the 18th century. Appearance, discoloured and repaired. Complete.

Colophon:

इति पदवाक्यप्रमाणज्ञसोमभट्टतनूजश्रीनृसिंहभट्टविरचिता श्रीविष्णु-धर्म्ममीमांसा समाप्ता ।

Post-colophon:

ग्रन्थसंख्या ४५०० (In a later hand).

A dissertation on the worship of Viṣṇu. For a description of the work, see I.O. Catalogue No. 2512.

8837

257. रङ्गभृङ्गवल्ली (टीकासहिता)

Raṅgabhṛṅgavallī (with commentary)

For the manuscript, see L 1419. The MS. is incomplete at the end, and the commentator's name is not found. The Text is by Raṅgācārya and takes its name from that of the author.

A Vaiṣṇava work.

The authorities quoted and consulted—

Ṣaṣṭhaskandha (*Bhāgavata*), *Pañcarātra*, *Bhāgavata*, *Nāradīya*, *Bhagavadgītā*, *Parāśarasmṛti*, *Pātañjala*, *Śāṇḍilyasūtra*, *Kāśikhaṇḍa*, *Nārāyaṇopaniṣad*, *Muṇḍakopaniṣad*, *Brahmavaivarta*, *Mokṣadharma* *Mahābhārata*, *Mahabhāgavata*.

Mostly the colophons are imperfect, dropping sometimes two, sometimes three intermediate letters.

The Colophons of the 5th and 6th only are fully given. They are:

इति रङ्गभृङ्गवल्ल्यां भजनज्ञानमार्गे भेदाभेदयोर्गुणदोषप्रदर्शनं नाम पञ्चमः पल्लवः (79B).

॰ भगवद्रूपप्रदर्शनं नाम षष्ठः पल्लवः (94B.)

The 7th is incomplete.

8838

638. भगवद्भक्तिचन्द्रिकोल्लास (सटीक)

Bhagavadbhakticandrikollāsa (with commentary).

For the manuscript, see L 1468.

Aufrecht says that Ātmārāma Yati, the author of *Rāghavollāsa* has a work of the name of *Bhakti-candrikā*, mentioned in *Rāghavollāsa*.

8839

8910. *Bhagavadbhakticandrikollāsa* (with a commentary).

Substance, country-made paper. 12½×5 inches. Folia, 58. In Tripāṭha form. Character, modern Nāgara. Appearance, fresh. Incomplete.

The first 15 leaves have the commentary only, then a page and a half blank. From leaf 16 the text is given in the middle and the commentary above and below it.

The first chapter comes to an end in leaf 10A, the second in leaf 21B, the third in 23B. But 51 Ślokas are missing. The 7th comes to an end in leaf 46, the 5th in leaf 38, the 6th in leaf 41A.

8840

1243. प्रमेयसंग्रह *Prameyasangraha*

By Konerārya Narasiṁha, son of Satyānandārya.

Substance, country-made paper. 8½×5 inches. Folia, 19. Lines, 11 to 14 on a page. Extent in ślokas, 450. Character, Nāgara. Appearance tolerable. Prose. Generally correct. Complete.

It begins thus:—

श्रीनृसिंहो जयति ।

एवमनन्ताद्यवतारात्मकश्रीलक्ष्मीनारायणस्य मोक्षानुग्रहपात्रभूतः मुख्याधिष्ठानभूतः सर्व्वकार्येषु प्रधानाङ्गभूतः . . . . .

. . . . . .

प्राणादिरूपेण मुख्यपञ्चकरूपः गरुड़ः मध्यपञ्चकरूपः मुख्य-वायुसूनवः प्राणाद्या वायवः अवमः पञ्चकः शेषश्चिन्द्रमुख्यवायु-रुद्रेन्द्राः चतुर्थः प्राणादिपञ्चकः । उक्तञ्च छान्दोग्यभाष्ये प्रथमाध्याये ।

End : एवं भागवतानां कदापि पुनरावृत्तिर्नास्ति "अनावृत्तिः शब्दादि"ति सूत्रात्। अत एव युक्तं रत्युत्तमपुरुषार्थमिति।

सत्यानन्दार्यपुत्रो यः कोनेराय्योयमुत्थितः।
नारसिंहः कृतस्तेयं प्रमेयस्य च संग्रहः॥
सृष्ट्यादिप्रलयान्तस्य मोक्षस्यापि यथामति।
यत् पुण्यं कारितं तेन समाप्नोतु गुरोर्मम॥
इत्यशेषमतिमङ्गलम्॥

Colophon : इति प्रमेयसंग्रहः समाप्तः।

156

8841

Substance, country-made paper. $7\frac{1}{2}\times4\frac{1}{2}$ inches. Folia, 11. Lines, 13-15 on a page. Character, modern Nāgara. Appearance, fresh.

A MS. without a title & without beginning & end.

Beginning :

एवं ·तत्त्वमस्यादिवाक्यानां अभेदतात्पर्य्यग्राहकतया भेद-निन्दावाक्यान्युक्त्वा प्रकृताभेदवाक्यान्येवोदाहरति—आत्मैवेदं। स्वपक्षस्य शब्दनित्यत्वादेर्यानि साधनादीनि हेत्वादिवाक्यानि तैरकार्य्यमपि कार्य्यान्वित-मप्यर्थमाह चेत् प्रतिपादयति चेत् वक्ता तैरवयवैवाक्यैः परोपि श्रोता कार्य्यान्वितमर्थं वेद चेत् जानाति चेत् श्रुतेरकार्य्यपरादपि वेदान्तवाक्यात् परात्मदृक्सिद्धब्रह्मबोधः न किं कुतो नेत्यर्थः। एषः वक्ष्यमाणः पन्था उपायः आत्मज्ञानं.....तस्मात् आत्मज्ञानमार्गात्॥ ता वक्ष्याम इति वाक्यशेषः। तानि वयांसि इति एको राशिः वंगा अवगधा इत्येकराशिः, चः समुच्चयार्थः etc., etc.

1B. एवमभिधेयपरत्वेन विश्वशब्दं व्याख्यायाभिधानात्मकौंकार-परत्वेनापि व्याख्यातुमादौ तस्य ब्रह्माभेदे सर्व्वात्मकत्वे विलुतौ च श्रुति-स्मृतीरुदाहरति—अन्यत्रेत्यादि।

2A. विष्णुभक्तलक्षणप्रतिपादकवचनपर्य्यालोचनयापि विष्णुस्तुत्यादिकं हिंसारहितेन कर्त्तव्यमिति वक्तुं तल्लक्षणप्रतिपादकवचनान्युदाहरति—मत्कर्म्म॥

श्रद्धयैव स्तुतिनमस्कारादि कर्त्तव्यमिति श्रद्धाया अंगत्वं वक्तुं श्रुतिस्मृतीरुदाहरति—श्रद्धया देयं। etc.

2B. तन्मयत्वेनाभेदेन जगद्गुरुं गोविन्दं समाराध्येति योजना ... ...श्रद्धाभक्त्योरभावेपि भगवन्नामकीर्त्तनं दुरितादि दूरीकरोतीति नामकीर्त्तनविषये विशेषं वक्तुं वचनान्युदाहरति —अवशेनापि॥ जानंतो जना अस्य भगवतः नाम चिन्नामान्यपि— ... ... हे विष्णो व्यापक ते महः त्वत्स्वरूपप्रकाशिकां सुमतिं सत्काररूपां भजामहे अत्रापि लकारव्ययश्छान्दसः। भजेमहीति ब्रह्मविद्यामाशासाना (?) नामानि कीर्त्तयतेत्यर्थः॥ विष्णुशब्दस्य प्रथमनिरुक्तौ भारतानुसारित्वदर्शनाय निर्वचनांतरदर्शनाय च मोक्ष(CA.)धर्म्मस्थं(?) वचनं मे मया रोदसी द्यावापृथिव्यौ व्याप्ते पठति व्याप्तेन इति कांतिश्चाभ्यधिका अतो वा विष्णुः वैति दीप्यत इति etc., etc.

11A. त्रिषु लोकेषु धृत् धृतिनदपतनानुकूलप्रयत्नविशेषोस्येति त्रिलोकधृत् मेधे अध्वरेऽश्वमेधरूपे निमित्ते जातो मेधजः श्रीरामरूपः विषयारण्ये धावत इन्द्रियवाजिनः रश्मिसदृशेन भगवत्प्रसादेन बध्नाति भक्त इत्यर्थः। षट्सु भावविकारेष्वन्तिमो विकारोऽग्रमित्युच्यते चत्वारो वेदा एव यज्ञपुरुषस्य चत्वारि शृंगाणीत्यर्थः। तेनाग्रे चराचरसृष्टिः पूर्व्वं हिरण्यगर्भरूपेण जातत्वात् etc., etc.

From what has been quoted above, it is clear that this no. contains a fragment of a Commentary on some work of Vaiṣṇava Bhaktiśāstra.

8842

8637

Substance, country-made paper. 18½×5¼ inches. Folia, 363. Lines, 13, 15, 16 on a page. Extent in ślokas, 21000. Character, Nāgara. Date, Saṁ. 1904. Good, complete.

Another copy of the same as above.

The four chapters complete:—

The 1st chapter ends in leaf 15.

The 2nd chapter ends in leaf 66.

The 3rd chapter ends in leaf 87.
The 4th chapter ends in leaf 195.

8843

4101A

Substance, palmleaf. 11½×1½ inches. Folia, 12. Lines, 4 on a page. Character, Udiya of the 19th century. Appearance, good. Incomplete at the end.

Beginning:

श्रीकृष्णाय नमः। श्रीश्यामसुन्दरो जयति।

वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं
सृष्टिस्थितिप्रलयकारणमामनन्ति।
तं श्यामसुन्दरमविक्रियमात्ममूर्त्तिं
सर्व्वेश्वरं प्रणतिमात्रदृशं भजामः॥
गजपतिरनुकम्पासम्पदा यस्य सद्यः
समजनि निरवद्यः सान्द्रमानन्दमृच्छन्।
निवसतु मम तस्मिन् कृष्णचैतन्यरूपे
मतिरतिमधुरिम्ना दीप्यमाने मुरारौ॥

... ...

... ...

ननु किन्तस्य पुरुषोत्तमस्य स्वरूपं, के तस्य गुणाः, कीदृशाश्च ते यद्विज्ञानाद्विमुक्तिरिति चेदुच्यते—विज्ञानानन्दस्तस्य स्वरूपम्। विज्ञानमानन्दं ब्रह्म, रातेर्दातुः परायणम्, आनन्दो ब्रह्मेति व्यजानात्, रसो वैष इति श्रवणात् तदेष विग्रहरूपमिति मन्तव्यम्। न तु स्वरूपावग्रहस्यातिरेकः, यदात्मको भगवांस्तदात्मिका व्यक्तिः। किमात्मको भगवान्? ज्ञानात्मक ऐश्वर्य्यात्मकः शक्त्यात्मकश्चेति बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे। बुद्धिमान् जनो वा अनङ्गप्रत्यङ्गवानितीति तमेकं गोविन्दं सच्चिदानन्द-विग्रहमिति अङ्गमात्रात्मको रामो ब्रह्मानन्दैकविग्रह इति चैवमादिश्रवणात्। ज्ञानानन्दविग्रहता तु तस्य श्रुतिमात्रादेवं विग्रहस्यैव ब्रह्मत्वात्तस्य वैष्णव-वाक्यात् यदन्यथाप्रत्यायनं तत्तु आसुरान् प्रति माययैव।

8844

6547. रामभक्तिरसायन *Rāmabhaktirasāyaṇa*

By Kāśīnātha, son of Jayarāma Bhaṭṭa and Vārāṇasī.

Substance, country-made paper. $10\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 27. Lines, 7 per page. Extent in ślokas, 470. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon: इति श्रीमद्भट्टोपनामक-जयरामभट्टसुतवाराणसी-गर्भसम्भव-काशीनाथविरचितं रामभक्तिरसायनं समाप्तम् ।

Post-colophon: श्रीरामेश्वरार्पणमस्तु । मालधीयबालमुकुन्दस्येदं पुस्तकम् ।—

Beginning: श्रीगणेशाय नमः । etc., etc.

श्रीमत्सीतारामौ जयतः कामाभिरामकौ देवौ ।
शब्दग्रहाभिरामौ पूरितकामौ मनोरमौ कामम् ॥
अप्रमेयत्रयातीतनिर्म्मलज्ञानमूर्त्तये ।
मनोगिरां विदूराय दक्षिणामूर्त्तये नमः ॥
नत्वा श्रीशङ्कराचार्य्यचरणाम्भोरुहद्वयम् ।
काशीनाथः प्रतनुते रामभक्तिरसायनम् ॥
तत्र रामभक्तिर्द्विविधा मुख्या गौणी चेति ।
तत्रेश्वरविषयकोऽनुरागाख्यचित्तवृत्तिविशेषो मुख्यभक्तिः ।
तथा च भक्तिमीमांसासूत्रम्—सा परानुरक्तिरीश्वरे ।

8845

4270. भक्तिरहस्य *Bhaktirahasya.*

Substance, palmleaf. Folia, 17. Lines, 5 on a page. Extent in ślokas, 525. Character Udiya, written about a hundred years back. Complete.

A metrical tract on the worship of Gopāla.

Beginning:

गृह्णन् व्रजपालबालवेशं
कलयन् मानसमोहि कृष्णनाम ।

कुरुतामुरुतापशान्तिमन्तः
करुणापूरकरम्बितं महो नः ॥

The object of the work.

अथ कथयामि रथाङ्गपाणिसेवा-
विधिमधिकृत्य मनोरमं प्रकारम् ।
भवभयभञ्जकमञ्जसा श्रितानां
(?) भविकमनन्तमनन्तरं ददानम् ॥

स्वचेतसा कल्पितसाधनेन
संसेवितो यः सकृदेव देवः ।
संसाधयेदेव समीहितानि
सनातनं तं कतमो जहातु ॥

विष्णोरशेषा मनवो मनोहराः
पराः समृद्धीः परिवर्द्धयन्ति ।
तेष्वेव गोपालमनूननुत्तमान्
अगण्यपुण्याः पुरुषा लभन्ते ॥

अभ्यक्षरं लक्षजपैकसाध्यम्
वक्ष्यामि साक्षात्फलदानदक्षम् ।
मनुप्रधानं श्रवणं दिशन्तं
मनोमनोहारि मुरारिभक्तौ ॥

जयप्रदं भयचयनाशनं सदा
सुधारुणामयविलयैककारणम् ।

. . . . . .

संकीर्त्य मन्त्रमेनं पुरुषार्थचतुष्टयं लभते ॥

Colophons:

2B, इति श्रीभक्तिरहस्ये प्रथमः प्रकाशः ; 4B, ० द्वितीयः प्रकाशः ; 8A, ० तृतीयः प्रकाशः ; 10A, ० चतुर्थः प्रकाशः ; 11B,

० पञ्चमः प्रकाशः ; 12B, ० षष्ठः प्रकाशः ; 15A, ० सप्तमः प्रकाशः ; 17A, अष्टमः प्रकाशः ।—समाप्तोऽयं ग्रन्थः ॥

It ends thus :—

अवतारमिमं मुक्त्वा मुक्त्वा मन्त्रमिमं पुनः ।
कलौ कलुषचित्तानां कोऽन्य आकर्षको भवेत् ॥
गोप्याद् गोप्यतमः सम्यक् प्रकारोऽयं प्रकाशितः ।
क्रियतामात्मरक्षार्थं सुधीभिश्चित्तभूषणम् ॥

8846

1681 राधाकृष्णगणोद्देशदीपिका

Rādhākṛṣṇagaṇoddeśadīpikā

Substance, country-made paper. 12×4½ inches. Folia, 9. Lines, 7 on a page. Extent in ślokas, 140. Character, Nāgara. Date, Sam. 1863. Verse, complete.

Colophon :

शाके द्रगस्व्यशक्रे (?) नभसि नभमणिदिने षष्ठ्यां ।
व्रजपतिसद्मनि राधाकृष्णगणोद्देशदीपिका अदीपि ॥

Last Colophon :—

इति गणोद्देशदीपिका समाप्ता ।

Post-colophon :

मिती चैत्रवदी १२ संवत् १८६३ ।

For a description of the work, see Ulwar 1590 Ext. 397.

This is a description of the relative and friends of Rādha and Kṛṣṇa at Vṛndāvana.

His grandfather was पर्ज्यन्य, his grandmother वरीयसी, his mother's father समुख, his mother's mother पाटला. His father was नन्द and mother यशोदा. His elder stepmother was Rohiṇī. His father's elder brothers were Upānanda and Abhinanda

and younger brothers Sananda and Nandana. His father's sister was Nandanī and her husband Nīla.

8847

10811. **नामगणनाक्रम** *Nāmagaṇanākrama*

By Gopāla Siṁha.

Substance, country-made paper. 12½×4½ inches. Folia, 3. Lines, 7 on a page. Character, Bengali of the 18th century. Appearance, discoloured.

A Vaiṣṇava work of the school of Caitanya on the mode of counting the sacred names of God.

Colophon :

इति श्रीकृष्णचैतन्यपादपद्ममधुव्रत-महाराजाधिराजश्रीश्रीगोपालसिंह-प्रकाशितो नामगणनाक्रमः समाप्तः ।

Beginning :

श्रीश्रीराधाकृष्णौ जयताम् ।
सुधीनां चान्द्रीणामपि मधुरिमोन्माददमनी
दधाना राधादिप्रणयघनसारैः सुरभितां ।
समन्तारसन्तापोद्यमविषमसंशयसरणी
प्रणीतां ते कृष्णां हरतु हरिलीलाशिखरिणी ॥

The first leaf does not belong to the ms.

8848

3589. **हरिनामपटल** *Harināmapaṭala*

Substance, country-made paper. 12½×4½ inches. Folia, 18. Lines, 9 on a page. Extent in ślokas, 890. Character, Bengali. Date, Sana 1111. Appearance, discoloured.

An interlocution between Sanātana and Caitanya on the subject of the Kṛṣṇa worship according to the Tāntrika fashion. It is complete in six paṭalas.

It begins thus :

श्रीराधाकृष्णचरणे शरणम् ।
श्रीचैतन्यमनोऽभीष्टस्थापिता येन भूतले ।
स्वयं रूपं कदा मह्यं ददाति स्वपदान्तिकम् ॥

Colophons :

4B : इति श्रीचैतन्यसनातनसंवादे हरिनामपटलः प्रथमोऽध्यायः ; 8A, ० हरिनामपटलः द्वितीयोऽध्यायः ; 10A, इति ० व्रजसिद्धप्राङ्गणे हरिनामपटलः तृतीयाध्यायः ; 10B, ० हरिनामपटलः चतुर्थोऽध्यायः ; 12B, ० उपासनातत्त्वनिरूपणं नाम पञ्चमोऽध्यायः ; 13A, हरिनाम-पटलग्रन्थः सम्पूर्णमस्तु ॥

Postcolophon :

यथादृष्टमित्यादि । सन ११११ साल तारिख १९शे आषाढ़ वेला दुइप्रहरे ग्रन्थ सम्पूर्ण ।

लिखितं बहुयत्नेन, यो हरेत् पुस्तकं ममेत्यादि ।

8849

8330. रागचूड़ामणिरुचिमालिका

Rāgacūḍāmaṇirucimālikā

Substance, country-made paper. 11×4 inches. Folia, 43. Lines, 7 on a page. Extent in ślokas, 800. Character, Nāgara of the 18th century. Appearance, old and discoloured. Complete.

On the religion of love, as preached by Caitanya. It is a treatise on the worship of Kṛṣṇa with Rādhā and his associates, and also Śrīcaitanya.

Beginning : श्रीराधागोविन्ददेवौ जयतां ।

अथ गुरुगायत्री ॥

गुरुदेवपदं तत्तु परतत्त्वपदं तथा ।
विद्महे धीमहीत्यन्तं तन्नो गुरुः प्रचोदयात् ॥

इत्येषा गुरुगायत्री सर्व्वतन्त्रेषु गोपिता ।
यस्याः संस्मरणादेव गुरुदेवः प्रसीदति ॥

अथ गौरमन्त्रः ॥—

विश्वम्भरपदं तत्तु गौरकृष्णपदं तथा ।
विग्महे धीमहीत्यन्तं तन्नो गौरः प्रचोदयात् ॥

इत्येषा गौरगायत्री प्रेमपात्री महाप्रभोः ।
सकृद् यः प्रजपेदेनां स गौरप्रीतिभाग् भवेत् ॥

14B.

श्रीरागचुम्बकमणिरुचिमालिकेयं
स्पृष्टा भवेद्यदि जनेन यदृच्छया वा ।
सद्यस्तमेव नयते रसिकानुयातां
रागानुगै[क]प[द]धीमपि कर्मशुरं (?) ॥

इति श्रीरागचुम्बकमणिरुचिमालिकायां रागाङ्गोङ्गसाधनोद्देशिप्रथम-सरणी—

अथ कृष्णचन्द्रस्य कारणानां निदानता—

22A.

श्रीरागचुम्बकमणिरुचिमतामालिकायां (?)
रागाध्वसाधनमयी सरणिः द्वितीया ॥
यासां निमग्नमनसो धृतकृत्यसेवा
शेषाद्रि केलिकमलं सहसा भजन्ते ॥

इति श्रीरागचुम्बकमणिरुचिमालिकायां द्वितीयसरणी—

The ms. ends abruptly.

8850

120. वस्तुतत्त्व *Vastutattva*

The present manuscript has been fully described by Rājendralāla Mitra under No. 923, on the Divinity of Kṛṣṇa by Rāmasundara Vidyāvāgīśa.

Composed in शाके सप्तयुगाद्रिचन्द्रगणिते = १७२७ Śaka.

8851

80616.

Substance, country-made paper. 13×3 inches. Folia, 32-40. Lines, 6 on a page. Character, Bengali of the early nineteenth century. Appearance, old and discoloured. A mere fragment.

A fragment of some Vaiṣṇava work in Sanskrit.

It may be a fragment of Jīva Gosvāmi's work, *Kramasandarbha.*

8852

7931. कैवल्यदीपिका *Kaivalyadīpikā*

Being Hemādri's Commentary on Vopadeva's *Muktāphala,* a summary of Vaiṣṇava doctrines, as propounded in the *Bhāgavata.*

Substance, country-made paper. 11¼×5 inches. Folia, 30. Lines, 8 on a page. Character, Nāgara of the 18th century. Appearance, discoloured. A mere fragment.

See IO. Catalogue, no. 3542.

8853

5075. योगोपनिषत्संहिता *Yogopaniṣatsaṁhitā*

Substance, country-made paper. 13×3 inches. Folia, 16. Lines, 5 per page. Extent in ślokas, 150. Character, Bengali of the early nineteenth century. Appearance, discoloured. Complete.

Beginning :

नमो गणेशाय ।

भद्राश्रमे पदे रम्ये सिद्धगन्धर्व्वसेविते ।

त्रैलोक्यविश्रुते देशे नानाद्रुमसमाकुले ॥

. . . . . .

कृष्णद्वैपायनस्तत्र सन्तिष्ठेत् स महामुनिः ।

. . . . . .

तस्य पुत्त्रो महायोगी वेदशास्त्रार्थपारगः ।

मायातीतः स गर्भेषु द्वादशाब्दं प्रतिष्ठितः ॥

गर्भस्थः पितरं व्यासं समाभाष्य वचोऽब्रवीत् ।

शुक उवाच ।

चतुरशीतिसहस्रेषु यद्दुःखं नरकेषु च ।
तद्दुःखमेकं गर्भेषु भुक्तं लक्षगुणं मया ॥

. . . . . .

यदि तात मुहूर्त्तैकं विष्णुमाया निषिध्यते ।
तदाहं निःसरिष्यामि नान्यथैव कदाचन ॥
तस्य तद् वचनं श्रुत्वा व्यासः शोकाकुलोऽभवत् ।

. . . . . .

त्रैलोक्यनाथो भगवान् यत्र तिष्ठति केशवः ।
विष्णुमाराध्य यत्नेन प्रार्थयित्वा शुभक्षणम् ॥
ईषत्तुष्टो मुनिव्यासः पुनरेवागतं गृहम् ।
तस्मिन् शुभक्षणे भूते विष्णुमायाविवर्जितः ॥
गर्भाद्विनिःसृतः शुकस्तत्क्षणाद् गन्तुमुद्यतः ॥

Then follows a long discussion between Vyāsa and Śuka, the father shewing the advantages of the householder's life and the son repudiating them.

8A.

एवं निराकृतो व्यासः शुकेनैव महात्मना ।
पुत्रशोकेन सन्तप्तो गतः शीघ्रं सुरालयम् ॥
सुरनाथं समभ्यर्च्चय रम्भामादाय तत्क्षणात् ।
आगतो भगवान् व्यासः पुत्रस्नेहान्निजालये ॥

. . . . . .

ततः सा शुकमासाद्य रम्भा वचनमब्रवीत् ।

रम्भोवाच ।

वसन्तमासे कुसुमौघसङ्कुले
वनान्तरे पुष्पनिरन्तरान्तरे । etc., etc.
कामान्तरं यः पुरुषो न सेवते वृथान्तरं तस्य नरस्य जीवनम् ॥

. . . . . .

शुक उवाच। मायाविमोहक्षयकारिकान्तरं
नेत्रान्तरं ध्याननिमीलितान्तरम्।
योगान्तरं यः पुरुषो न सेवते। वृथान्तरं तस्य नरस्य जीवनम्॥

Rambhā goes on tempting Śuka for sensuous enjoyments and Śuka answers her by exposing their emptiness.

Colophon :

इति श्रीयोगोपनिषत्संहितायां शुकव्यासोत्तरं रम्भायाः संवादप्रश्नः समाप्तः।

Postcolophon :

लिखितं श्रीरामतारणशर्मणा॥

8854

3800. हरिभक्तिकल्पलतिका *Haribhaktikalpa-latikā.*

by Śrīkṛṣṇa Sarasvatī

Substance, country-made paper. 12½×4 inches. Folia, 38. Lines, 8 on a page. Extent in ślokas, 912. Character, Bengali Date, (Sana) B.S. 1182. Appearance, old and discoloured. Complete.

Colophon :

इति श्रीहरिभक्तिकल्पलतिकायां चतुर्थः स्तबकः। समाप्तेयं हरिभक्तिकल्पलतिका।

Postcolophon :

सन ११३२ एगार सत्त बत्तिस् तारिख १ आषाढ़ मङ्गलवार।

A treatise in fourteen stabakas, on devotion to Śrīkṛṣṇa and the devotees of various grades.

The verses are numbered up to the leaf 18A. The last one marked is 169.

See IO Catalogue, No. 2508. The IO. MS. gives the author's name as Śrīkṛṣṇa Sarasvatī.

8855

6591. B. विष्णुप्रीति *Viṣṇuprīti.*

Substance, country-made paper. Folia, 2. Lines, 6 on a page. Extent in ślokas, 60. Character, Bengali of the 18th century. Appearance, fresh. Complete.

The name, *Viṣṇuprīti* is written on the left hand margin of both the leaves.

It establishes God as personal and as full of love and bliss.

It begins : अथ देवताचैतन्यवादिमतेपि यत्र विष्णुप्रीत्यादिरूप-फलकामसमभिव्याहारस्तत्रागतिरेव विष्णावीश्वरे प्रीतिपदार्थस्य सुखस्य नैयायिकादिभिरनभ्युपगमात् ईश्वरसुखाङ्गीकर्त्तृभिरपि तत्सुखस्य जन्यत्वा-नभ्युपगमेन तत्फलत्वाप्रसङ्गे etc., etc.

B. Other schools of philosophy.

THE BHAKTI CULT

8856

8905. शाण्डिल्यसूत्र *Śāṇḍilyasūtra,*

called (भक्तकण्ठाभरण) *Bhaktakaṇṭhābharaṇa* with the *commentary by Raghunātha.*

Substance, country-made paper. 11×5 inches. Folia, 62. In Tripāṭha form. Character, Nāgara of the 19th century. Appearance, discoloured. Complete.

Printed, ed. Mahesh Pal, Calcutta; P.O., Allahabad; J. R. Ballantyne, Calcutta; translated into English by Cowell, Complete in 62 leaves.

For the text, see L. 1224.

The Ṭīkā is not known to Aufrecht.

The Ṭīkā bigins thus—

निर्णीय कारुण्यसुधार्णवस्य स्वयाक्यतः स्वाश्रितमात्रवश्यतां ।
तद्भक्तिकामो रघुनाथनामा तद्भक्तकण्ठाभरणं तनोति ॥

श्रीभक्तिमीमांसां प्रारिप्समानो ग्रन्थकृच्छिष्टाचारपरिप्राप्तमथ-शब्दोच्चारणात्मकं मङ्गलं कुर्व्वन्नेव स्वाभिधेयप्रयोजने दर्शयति ॥ अथेति ॥

The col. of the ṭīkā runs thus—

इति श्रीभक्तिमीमांसावृत्तौ चतुर्थाध्यायस्य तृतीयः पादः । समाप्तश्चायं ग्रन्थः ॥

8857

1328. शाण्डिल्यसुत्रप्रवचन

Sāṇḍilyasūtrapravacana

Substance, country-made paper. 11×5 inches. Folia, 19. Lines, 9 on a page. Extent in ślokas, 475. Character, Nāgara. Date, (?). Appearance, tolerable. Prose. Generally correct. Complete.

A commentary on *Sāṇḍilyasūtra*. Anonymous. With a long epilogue and prologue.

Biginning :

ॐ नमो गुरभ्यः ।

यो ब्रह्माणं विदधाति पूर्व्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

अथ—

ईशानं सर्व्वविद्यानां भगवन्तं महेश्वरं
पञ्चवदनं चतुर्म्मुखं परिसमेत्योवाच—

प्रब्रूहि भगवन्, का भक्तिः, का संसृतिः, का मुक्तिः, का च जीवन्मुक्तिरिति ? रुद्रस्तं प्रोवाच—

यस्यांशांशाः जीवलोकाः समस्ताः
वृत्वा भूमिं सर्व्वतो योऽत्यतिष्ठत् ।
तेजोनिधेस्तस्य लेशोऽस्ति कश्चित्
ब्रह्मन्नित्थं भावना भक्तिरुक्ता ॥

The prologue continues in this way to 4B, where the regular commentary on the Sūtras commences.

The last sūtra is commented on in leaf 17A, the two last leaves being covered by an epilogue.

End :

ॐ नमो ब्रह्मणे तुभ्यमसिताय च ते नमः ।
देवलाय नमस्तेऽस्तु शाण्डिल्याय महर्षये ॥
शन्नो वातः पवतां शन्नस्तपतु सूर्य्यः ।
शन्नः कणिक्रदद्देव पर्जन्योऽभिवर्षतु ॥

Colophon : इति शाण्डिल्यसूत्रप्रवचने
तृतीयोऽध्यायः ॥ श्रीरामाय नमः ॥

8858

1102. भगवद्भक्तिचन्द्रिका *Bhagavadbhakticandrikā*

By Nārāyaṇa(tīrtha).

Substance, country-made paper. 14×5½ inches. Folia, 68. Lines, 13-14 on a page. Extent in ślokas, 3250. Character, Nāgara. Appearance, fresh. Prose. Generally correct. Complete.

A copious commentary on *Śāṇḍilyasūtra* by Nārāyaṇatīrtha.

Beginning :

श्रीमन्नारायणाय नमः ।

गानैर्नारदगोपिकादिषु निजप्रेमान् वर्द्धयन्
स्वे स्वे कर्म्मणि योजयन् सुरमुखान् शुद्धात्मबुद्धिप्रदः ।
नित्यं स्यात् सनकादिकेभ्य उरुधीर्गीतः श्रुतौ राजते
सत्यज्ञानसुखात्मकं तमनिशं कृष्णाभिधानं नमः ।

. . . . . .

विनेयैर्जिज्ञास्यामृतफलपराभक्तिरखिलैः
शुभस्तैर्मानाद्यैर्विलसदनुबन्धाः प्रथमतः ।

मनोज्ञं शाण्डिल्यो मधुरतरमङ्गल्यवचसा
निबध्नाति न्यायैरथ पद्मुखेनातिविशदम् ॥ १३

अथातो भक्तिजिज्ञासा···

It ends:

इत्यास्तां विस्तरः ।
संवित्सत्यसुखाद्वयं सुविमलं ज्ञात्वा धिया निर्भिया
प्रेम्नि प्राप्तरसोऽभवत् भगवतः तृप्तान्त इत्थं मुनिः ।
शाण्डिल्यः परमानुरक्तिमधिपे संसूत्रयामास तत्
या तेने हरितुष्टये मुनिवरो नारायणाख्यो यतिः ॥
अधीत्य सर्व्वशास्त्राणि वासुदेवदयानिधेः ।
तीर्थश्रीरामगोविन्दकृपयैषा कृतिर्मम ॥
रामगोविन्दतीर्थानां गुरूणामन्वहं मम ।
तीर्थश्रीवासुदेवानां चरणौ शरणं सदा ॥

Colophon: इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीनारायण-तीर्थकृता भगवद्भक्तिचन्द्रिका समाप्ता । शुभमस्तु ।

MISCELLANEOUS PHILOSOPHICAL WORKS ON RELIGION, etc.

8859

8577. याज्ञवल्क्यगीता *Yājñavalkyagītā*

Substance, country-made paper. 10½×4½ inches. Folia, 22. Lines, 12 on a page. Extent in ślokas, 800. Character, Nāgara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse, generally correct.

फलश्रुति Eleven chapters and forty-three verses with The work is very nearly complete.

8860

10207 दत्तात्रेयगीता *Dattātreyagītā*

Substance, country-made paper. 9×4 inches. Folia, 2-15. Lines, 8-10 on a page. Character, Nāgara of the 18th century. Appearance, discoloured. Incomplete, both ends.

Every leaf is marked on the reverse side with the letters द० गीं Cp. *Avadhūtagītā* (L. 669).

5B.

इति श्रीदत्तात्रेयभगवत्कृते वेदान्तशास्त्रे गुरुशिष्यसंवादे स्वात्मसंवित्युपदेशो नाम प्रथमसंक्षेपः ॥ १ ॥

7B.

इति श्रीदत्तात्रेयगीतात्मसंवित्युपदेशो भेदखण्डनसंक्षेपः द्वितीयः सर्गः ॥ २ ॥

9A.

इति श्रीदत्तात्रेयगीतास्वात्मसंवित्युपदेशो ज्ञानामृतं तृतीयः संक्षेपः ॥ ३ ॥

10A.

इति श्रीअवधूतस्वात्मसंवित्युपदेशो निर्व्वाणस्वरूपचतुर्थः संक्षेपः ॥ ४ ॥

13A.

इति श्रीदत्तात्रेयभगवत्कृते वेदान्तशास्त्रे गुरुशिष्यसंवादे समदृष्टिस्वात्मसंवित्युपदेशे पञ्चमसंक्षेपः ॥ ५ ॥

14B.

इति श्रीदत्तात्रेयभगवत्कृते वेदान्तशास्त्रे गुरुशिष्यसंवादे स्वात्मसंवित्युपदेशे षष्ठः संक्षेपः ॥ ६ ॥

15B.

इति श्रीस्वात्मसंवित्युपदेशे नारीनिरशया (?) योगो नाम सप्तमसर्गः ॥ ७ ॥

The ms. ends abruptly in the 2nd stanza of the 8th chapter.

8861

8789. दत्तात्रेये सिद्धान्तसप्तश्लोकीगीता

Dattātreye Siddhāntasaptaślokīgītā.

Substance, country-made paper. 5½×4 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 40. Character, Nāgara. New. Complete,

Complete in seven leaves and seven stanzas. It begins thus—after the manner of हस्तामलक, *Hastāmalaka* by Śaṅkarācārya.

कस्त्वं शिष्य कस्य कुतोसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वद त्वं मम सुप्रसिद्धं
मत्प्रीतये प्रीतिविवर्द्धनोऽसि ॥

The last colophon runs thus—

इ(ति) श्रीदत्तात्रेये सिद्धान्तसप्तश्लोकी गीता सम्पूर्णा ।

8862

9145. मदालसाष्टक *Madālasāṣṭaka.*

Substance, country-made paper. 13×6 inches. Folium, 1 only. Lines, 11 on a page. Extent in ślokas, 16. Character, Nāgara. Appearance, dilapidated and pasted. Verse. Correct.

Leaf 1B is written in a neater and smaller hand.

Madālasāṣṭaka is so named from Madālasā, the woman who addresses this to her little child, embodying in it the most essential points of the Vedānta doctrine in eight verses.

It begins:

ॐ शुद्धोऽसि बुद्धोऽसि निरञ्जनोसि
संसारमायापरिवर्ज्जितोऽसि ।
संसारस्वप्नं त्यज मोहनिद्रां
मदालसा वाक्यमुवाच पुत्रं ॥ १ ॥

शुद्धोऽसि रे तात न तेऽस्ति नाम
कृतं हि ते कल्पनयाधुनैव ।
पञ्चात्मकं देहमिदं न तेऽस्ति
नैवास्य त्वं रोदिषि कस्य हेतोः ॥ २ ॥

It ends:

पीनं क्षितौ पीनगतश्च देहे
देहेपि चान्यः पुरुषो निविष्टः ।
ममत्वमुर्व्यां न यथा स्वदेहे
तथेति मा ते बत मूढ़तैषा ॥ ८ ॥

इति श्रीमदालसाष्टकं सम्पूर्णं । ॐ तत् सत्, ब्रह्मणे नमः ।

After the colophon there are stray verses.

8863

9190. निर्वाणषट्क *Nirvāṇaṣaṭka.*

Substance, country-made paper. 12×7 inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 12. Date, ?. Appearance, fresh. Verse. Generally correct. Complete. Neatly written.

It runs thus:

श्रीगणेशाय नमः ।

मनोबुद्ध्यहङ्कारचित्तादि नाहं
न श्रोत्रं न जिह्वा न च घ्राणनेत्रं ।
न च व्योम भूमिर्न तेजो न वायुः
चिदानन्दरूपः शिवोहं शिवोहं ॥ १ ॥

अहं प्राणवर्गो न तु पञ्चवायुर्न वा सप्तधातुर्न च पञ्चकोषः ।
न वाक् पाणिपादौ न चोपस्थवायुश्चिदानन्दरूपः शिवोहं
शिवोहं ॥ २ ॥

न पुण्यं न पापं न सुखं न दुःखं न मन्त्रं न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपः शिवोहं
शिवोहं ॥ ३ ॥

न मृत्युशङ्का न मे जातिभेदाः पिता नैव मे न माता न जन्म ।
न बन्धुर्न मित्रं न गुरुर्नैव शिष्याश्चिदानन्दरूपः शिवोहं
शिवोहं ॥ ४ ॥

न मे रागद्वेषौ न मे लोभमोहौ मदो नैव मे न मात्सर्य्यभावः ।
न धर्म्मो न चार्थो न कामो न मोक्षश्चिदानन्दरूपः शिवोहं
शिवोहं ॥ ५ ॥
अहं निर्विकल्पो निराकाररूपो विभुर्व्यापि सर्व्वत्र सर्व्वेन्द्रियाणां ।
न वा बन्धनं नैव मुक्तिर्न भीतिश्चिदानन्दरूपः शिवोहं शिवोहं ॥ ६ ॥

इति श्रीनिर्वाणषट्कं समाप्तं ।

8864

8566. शुकाष्टक *Śukāṣṭaka.*

with a commentary. *By Gaṅgādharendra Sarasvatī.*

Substance, country-made paper. 9¼×4½ inches. Folia, 8. Lines, 11 on a page. Extent in ślokas, 250. Character, Nāgara. Date, ?. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Eight verses attributed to Śukadeva, son of Vyāsa with a commentary by Gaṅgādharendra Sarasvatī, a disciple of Rāmacandra Sarasvatī.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्रामचन्द्रसरस्वती-पूज्यपादशिष्यगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षुणा कृतं शुकाष्टकव्याख्यानं समाप्तं ।

8865

8231. रम्भाशुकसंवाद *Rambhā-Śukasaṁvāda.*

Substance, country-made paper. 7½×4½ inches. Folia, 8. Lines, 13, 14 on a page. Extent in ślokas, 170. Character, Nāgara of the 19th century. Appearance, old and discoloured. Complete.

Colophon:

इति (रम्भा)शुकसंवादः समाप्तः ।

Post-colophon:

संव ११५० (?)

For a good description of the work, see the Catalogue of the Bishop College manuscripts.

8866

9199. अर्थपञ्चक (*Arthapañcaka*)

By Nārāyaṇa Yati

Substance, country-made paper. 12×6½ inches. Folia, 7. Lines, 12 on a page. Extent in ślokas, 210. Character, Nāgara. Date ? Appearance, tolerable. Prose. Generally correct. Complete.

श्रीमते निगमान्तगुरवे नमः ।

श्रीमानखिललोकानां नायकः करुणाकरः

करोतु मङ्गलं पुंसां कमलानायको हरिः । १ ।

अथार्थपञ्चकं निरूप्यते । ते च जीवेश्वरोपायफलविरोधिनो ह्यर्थाः । तत्र जीवलक्षणं शेषत्वे सति ज्ञातृत्वं जीवत्वं, ते च पञ्चविधाः नित्यमुक्तकेवल-बद्धमुमुक्षुभेदात् ।

तत्र नित्याः असंस्पृष्टसंसाराः अनन्तगरुड़विश्वक्सेनादयः ।

कुर्व्वन् पूर्व्वोक्तरीत्योत्क्रम्यार्चिरादिगत्या वा हार्द्दपुरुषसङ्कल्पात् प्राप्त-वेदात्मविहगेश्वरवाहनेन भगवता सह भगवत्तरातिशयसम्पल्लक्षणाल्पकाल-भगवत्प्राप्तिसम्पादकभगवन्मार्गेण वा प्राप्य देशं प्राप्यानुकूलदेहसम्बन्ध-रक्षकभगवदनुभवजनितप्रीतिकारितकैङ्कर्य्यैश्वर्य्यं समाप्नोति ।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमन्नारायणयतीश्वरकृतार्थपञ्चकं समाप्तं ।

This is a work by Nārāyaṇayati, entitled **अर्थपञ्चक**. It treats of the five following stages of the soul (1) absolutely liberated, not in touch with the world, (2) liberated but still in touch with the world, (3) soul whose only concern is serving God, (4) soul seeking liberation and (5) soul tied to the world. It further deals with five tattvas of God, five means for the elevation of soul and their results, and lastly their opposite.

8867

7956 अर्थपञ्चकविवेक *Arthapañcakaviveka*

By Śaṭhakopadāsa.

Substance, country-made paper. 12½×5½ inches. Folia, 9. Lines, 10 on a page. Extent in ślokas, 270. Character, modern Bengali. Appearance, fresh. Complete.

Maṅgalācaraṇa and the object of the work.

श्रीश्रीरामचन्द्रो जयति—

लक्ष्मीशोखिललोकेशः कृपाब्धिर्वैकुण्टालयः ।
तनोतु मंगलं पुंसां श्रीनिवासः परात् परं ॥
श्रीरङ्गार्यं नमस्कृत्य वक्ष्ये पूर्व्वोक्तवर्त्मना ।
संग्रहेणार्थकं पंच मुमुक्षूणां मुदावहं ॥
मुमुक्षुभिः सदा ज्ञेयं परज्ञानादिसिद्धये ।
प्रत्येकं पञ्चधा प्रोक्तं प्रबुद्धैरर्थपञ्चकं ॥
क्षेत्रज्ञ ईश्वरश्चैव तदुपायः फलं तथा ।
तद्विरोधीति पंचार्थाः प्रत्येकं पञ्च पञ्चधा ॥
तत्र जीवः परिज्ञेयो ज्ञातृत्वादिसधर्म्मकः ।
तत्तत्कर्म्मानुसारेण पञ्चधावस्थितः पुमान् ॥
बद्धो मुमुक्षुः कैवल्यो मुक्तनित्य इति क्रमात् ।
तत्र बद्धं विजानीयात् प्रकृत्या वशगो हि यः ॥

2B, इति शठकोपदासविरचिते अर्थपंचकविवेके जीवपंचको नाम प्रथमो विवेकः ।

अधिकारानुगुण्ये तु परस्यार्थे श्रियाः पतेः।
कृपया दर्शितं रूपं ज्ञेयं तदपि पंचधा ॥
परविह्वौ च (?) विभवो अन्तर्यामि ततः परं ।
यच्चावतार इत्येवं पञ्चधा चेश्वरः स्मृतः ॥

4B, इति शठकोपदासस्य कृतेषु श्रीमदर्थपंचकविवेके ईश्वरपंचक-नामा द्वितीयो विवेकः ॥

उपायाः कथिताः कर्म्मज्ञानभक्तिप्रपत्तयः ।
सदाचार्य्याभिमानश्च इत्येवं पञ्चधा मता[ः] ॥

6A, ० उपायपञ्चको नाम तृतीयो विवेकः ।
पुरुषैरर्थ्यते यत्तु पुरुषार्थेति कथ्यते ॥
बुधैः ... ... तदपि पञ्चधा
... ...धर्म्मार्थकामकैवल्यभगवत्प्राप्तिभेदतः ॥

7B, ० फलपञ्चको नाम चतुर्थो विवेकः ॥
अथ विरोधिरूपन्तु कथ्यते तद्धि पञ्चधा ।
स्वस्वरूपविरोधि च परस्य च ततः परं ॥
तथा फलविरोधीति तदुपायविरोधि (च ?) ।
तथा प्राप्यविरोधि स्यात् पञ्चधा भण्यते बुधैः ॥

It ends:

दिव्यदम्भेत्यनुमतो भूत्वा नस्तादिसूरीणां (?) ।
नित्यमन्यतृदो (?) भूत्वा सर्व्वावस्थासु सर्व्वदा ॥
कैङ्कर्य्यनिरतो भूत्वा + बन्धद्वन्द्वविवर्ज्जितः ।
आनन्दनिर्भरो नित्यं वैकुण्ठकिङ्करानघः ॥
दिव्यैश्वर्य्यमवाप्नोति यस्मान्नावर्त्तते पुनः ॥
निखिलनिगमसारं लक्षतः सज्जनानां
स्वपरविशदबोधी मोक्ष-सोपान + + ।
स भवतु परितुष्ट्यै वैष्णवानां मुदे च ।
शठकोपरचितो यः पञ्चकानां विवेकः ॥

Colophon:

इति शठकोपदासस्य कृतेषु श्रीमदर्थपञ्चकविवेके विरोधिपञ्चककथन-पूर्व्वकप्रपन्नस्ये(?) कालक्षेपक्रमो नाम पञ्चमो विवेकः सम्पूर्णः ।

Post-colophon:

लिखितं श्रीश्रीकान्तसेनगुप्तस्य निवास छातना सामन्तभुम ।—

8868

8691. **रामरत्नाकरटीका** A comm: on *Rāmaratnākara.*

By Mahāmudgala.

Substance, country-made paper. 11½×6 inches. Folia, 136. Lines, 10 on a page. Extent in ślokas, 1700. Character, Nāgara. Date, Sam. 1941. Good. Complete.

Complete in 136 leaves and in eight उद्भेद।

Colophon in leaf 17A.

श्रीमन्महाकृष्णचरणभावनाप्रभावलब्धायां कनकाभिसंज्ञायां राम-रत्नाकरटीकायां महामुद्गलकृतायां जीवब्रह्माभेदो नाम प्रथम उद्भेदः।

Colophon in leaf 32A—

अहमध्यासोपवर्णनं नाम द्वितीय उद्भेदः।

8869

8286. **मुक्तिस्वयंवर** *Muktisvayaṁvara.*

By Rāmacandra.

Substance, country-made paper. 11×4½ inches. Folia, 10. Lines, 9 on a page. Extent in ślokas, 220. Character, Nāgara. Date, S. 1750. Appearance, old and discoloured. Complete.

Colophon: इति मुक्तिस्वयंवरः।

Post-colophon: कदा वाराणस्यामित्यादि।

संवत् १७५० समय कुआरमासे सुकलपक्षे तिथि वार सुकरवारके पोथी समाप्तं।

Beginning: श्रीगणेशाय नमः॥

श्रीशेषमण्डननृसिंहपदारविन्दे
मन्देतरेष्टफलकामनयाभिवन्दे।
सन्देहहीनमुपयन्ति फलं स्मरन्तो
यं देहिनः सफलकर्म्मसु भक्तिभाजः॥ १॥

विश्वेश्वरानुमतितः किल मोक्षलक्ष्मीं
गङ्गातटेऽधिमणिकर्णिकमत्र काश्यां ।
दृष्ट्वा स्वयंवरविधौ कृतसत्प्रतिज्ञा
योग्यं वरं मृगयते श्रुतिसिद्धमेतत् ॥ २ ॥

End :

श्रीशेषपण्डितनृसिंहसुतो विधाय
मुक्तिस्वयंवरमिदं किल रामचन्द्रः ।
प्रोक्तं क्रमेण निजमुक्तिसुखाप्तिकामः
काव्यं नृसिंहचरणेऽत्यदधात् मुदेऽस्य ॥ १२० ॥

8870

10589. **सारहस्य** *Sārarahasya.*

Substance, country-made paper. $8\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 139. Lines, 11 on a page. Extent in ślokas, 1251. Character, Nāgara. Date, Saṁ. 1690. Appearance, discoloured. Defective in the beginning. The first two leaves are missing.

Extracts from the works of Śruti and Vedānta and Tantra, such as *Yogavāśiṣṭha, Gītā, Akulāgama* Tantra.

Colophon :

इति श्रीसाररहस्यग्रन्थः समाप्तः ।

Post-colophon :

उज्जयिन्यां शिप्रातीरे महाकाल-वनोत्तमे श्रीमहाकालेश्वरज्योतिर्लिंगस्य सन्निधौ कृतोऽयं ग्रन्थसंग्रहः ।

Then follow 5 ślokas, after which comes the date :—

संवत् १६९० वर्षे कार्त्तिक वदि+तीयायां तिथौ भौमे कृतोऽयंग्रन्थः ।

8871

10470. त्रिविधजनपरीक्षा *Trividhajanaparīkṣā.*

Substance, country-made paper. 6×3½ inches. Folia, 5. Lines, 7 on a page. Extent in ślokas, 50. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

Colophon :

इति त्रिविधजनपरीक्षा ।

An examination of the characteristics of three classes of human beings from spiritual standpoint.

Beginning :

अथ त्रिविधजनपरीक्षा, सिद्धसाधकजडाश्चेति । तेषां लक्षणानि, तत्र सिद्धलक्षणानि चत्वारि । यथा, नित्यमुक्तो देहमुक्तो विदेहमुक्तो जीवन्मुक्त इति । तत्र नित्यमुक्तः ईश्वरो रामकृष्णाद्यवतारवान् । देहमुक्तो देहावच्छिन्नोपि सुषुप्तिवत् जड़भरतादि । विदेहमुक्तो बालवर्ज्जनकादि । जीवन्मुक्तश्च । तत्र जीवन्मुक्तो द्विविधः । एकः कर्म्मप्रवृत्तः, अन्यः कर्म्म निवृत्त इति ।

MISCELLANEOUS PHILOSOPHICAL WORKS

8872

8892. तर्ककुतूहल *Tarkakutūhala.*

By Viśveśvara.

Substance, country-made paper. 13½×5 inches. Folia, 73. Lines, 18 per page. Character, modern Nāgara. Appearance, fresh. Incomplete at the end.

Leaf 34A.

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले
अद्वैतार्थत्वमध्यक्षविरोधाद्वीक्षितं श्रुतेः ।

Leaf 50A.

वेदाविरुद्धयुक्तीनामर्के तर्ककुतूहले
श्रुतेर्विघातात् पर्य्यस्तं श्रुतितात्पर्य्यमद्वये ।

It ends thus:—

